# ऋग्वेद-संहिता—मण्डल १

## Ṛgveda-Saṁhitā—Maṇḍala 1

1.001.01a अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।

1.001.01c होतारं रत्नधातमम् ॥

1.001.01a agnim iḷe purohitaṁ yajñasya devam ṛtvijam |
1.001.01c hotāraṁ ratnadhātamam ||

1.001.02a अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ।

1.001.02c स देवाँ एह वक्षति ॥

1.001.02a agniḥ pūrvebhir ṛṣibhir īḍyo nūtanair uta |
1.001.02c sa devām̐ eha vakṣati ||

1.001.03a अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ।

1.001.03c यशसं वीरवत्तमम् ॥

1.001.03a agninā rayim aśnavat poṣam eva dive-dive |
1.001.03c yaśasaṁ vīravattamam ||

1.001.04a अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।

1.001.04c स इद्देवेषु गच्छति ॥

1.001.04a agne yaṁ yajñam adhvaraṁ viśvataḥ paribhūr asi |
1.001.04c sa id deveṣu gacchati ||

1.001.05a अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।

1.001.05c देवो देवेभिरा गमत् ॥

1.001.05a agnir hotā kavikratuḥ satyaś citraśravastamaḥ |
1.001.05c devo devebhir ā gamat ||

1.001.06a यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।

1.001.06c तवेत्तत्सत्यमङ्गिरः ॥

1.001.06a yad aṅga dāśuṣe tvam agne bhadraṁ kariṣyasi |
1.001.06c tavet tat satyam aṅgiraḥ ||

1.001.07a उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् ।

1.001.07c नमो भरन्त एमसि ॥

1.001.07a upa tvāgne dive-dive doṣāvastar dhiyā vayam |
1.001.07c namo bharanta emasi ||

1.001.08a राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।

1.001.08c वर्धमानं स्वे दमे ॥

1.001.08a rājantam adhvarāṇāṁ gopām ṛtasya dīdivim |
1.001.08c vardhamānaṁ sve dame ||

1.001.09a स नः पितेव सूनवेऽग्ने सूपायनो भव ।

1.001.09c सचस्वा नः स्वस्तये ॥

1.001.09a sa naḥ piteva sūnave 'gne sūpāyano bhava |
1.001.09c sacasvā naḥ svastaye ||

1.002.01a वायवा याहि दर्शतेमे सोमा अरंकृताः ।

1.002.01c तेषां पाहि श्रुधी हवम् ॥

1.002.01a vāyav ā yāhi darśateme somā araṅkṛtāḥ |
1.002.01c teṣām pāhi śrudhī havam ||

1.002.02a वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः ।

1.002.02c सुतसोमा अहर्विदः ॥

1.002.02a vāya ukthebhir jarante tvām acchā jaritāraḥ |
1.002.02c sutasomā aharvidaḥ ||

1.002.03a वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ।

1.002.03c उरूची सोमपीतये ॥

1.002.03a vāyo tava prapṛñcatī dhenā jigāti dāśuṣe |
1.002.03c urūcī somapītaye ||

1.002.04a इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् ।

1.002.04c इन्दवो वामुशन्ति हि ॥

1.002.04a indravāyū ime sutā upa prayobhir ā gatam |
1.002.04c indavo vām uśanti hi ||

1.002.05a वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू ।

1.002.05c तावा यातमुप द्रवत् ॥

1.002.05a vāyav indraś ca cetathaḥ sutānāṁ vājinīvasū |
1.002.05c tāv ā yātam upa dravat ||

1.002.06a वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् ।

1.002.06c मक्ष्विश्त्था धिया नरा ॥

1.002.06a vāyav indraś ca sunvata ā yātam upa niṣkṛtam |
1.002.06c makṣv i1tthā dhiyā narā ||

1.002.07a मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।

1.002.07c धियं घृताचीं साधन्ता ॥

1.002.07a mitraṁ huve pūtadakṣaṁ varuṇaṁ ca riśādasam |
1.002.07c dhiyaṁ ghṛtācīṁ sādhantā ||

1.002.08a ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ।

1.002.08c क्रतुं बृहन्तमाशाथे ॥

1.002.08a ṛtena mitrāvaruṇāv ṛtāvṛdhāv ṛtaspṛśā |
1.002.08c kratum bṛhantam āśāthe ||

1.002.09a कवी नो मित्रावरुणा तुविजाता उरुक्षया ।

1.002.09c दक्षं दधाते अपसम् ॥

1.002.09a kavī no mitrāvaruṇā tuvijātā urukṣayā |
1.002.09c dakṣaṁ dadhāte apasam ||

1.003.01a अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ।

1.003.01c पुरुभुजा चनस्यतम् ॥

1.003.01a aśvinā yajvarīr iṣo dravatpāṇī śubhas patī |
1.003.01c purubhujā canasyatam ||

1.003.02a अश्विना पुरुदंससा नरा शवीरया धिया ।

1.003.02c धिष्ण्या वनतं गिरः ॥

1.003.02a aśvinā purudaṁsasā narā śavīrayā dhiyā |
1.003.02c dhiṣṇyā vanataṁ giraḥ ||

1.003.03a दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः ।

1.003.03c आ यातं रुद्रवर्तनी ॥

1.003.03a dasrā yuvākavaḥ sutā nāsatyā vṛktabarhiṣaḥ |
1.003.03c ā yātaṁ rudravartanī ||

1.003.04a इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।

1.003.04c अण्वीभिस्तना पूतासः ॥

1.003.04a indrā yāhi citrabhāno sutā ime tvāyavaḥ |
1.003.04c aṇvībhis tanā pūtāsaḥ ||

1.003.05a इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।

1.003.05c उप ब्रह्माणि वाघतः ॥

1.003.05a indrā yāhi dhiyeṣito viprajūtaḥ sutāvataḥ |
1.003.05c upa brahmāṇi vāghataḥ ||

1.003.06a इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।

1.003.06c सुते दधिष्व नश्चनः ॥

1.003.06a indrā yāhi tūtujāna upa brahmāṇi harivaḥ |
1.003.06c sute dadhiṣva naś canaḥ ||

1.003.07a ओमासश्चर्षणीधृतो विश्वे देवास आ गत ।

1.003.07c दाश्वांसो दाशुषः सुतम् ॥

1.003.07a omāsaś carṣaṇīdhṛto viśve devāsa ā gata |

1.003.07c  dāśvāṁso dāśuṣaḥ sutam ||

1.003.08a विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः ।

1.003.08c उस्रा इव स्वसराणि ॥

1.003.08a  viśve devāso apturaḥ sutam ā ganta tūrṇayaḥ |
1.003.08c  usrā iva svasarāṇi ||

1.003.09a विश्वे देवासो अस्रिध एहिमायासो अद्रुहः ।

1.003.09c मेधं जुषन्त वह्नयः ॥

1.003.09a  viśve devāso asridha ehimāyāso adruhaḥ |
1.003.09c  medhaṁ juṣanta vahnayaḥ ||

1.003.10a पावका नः सरस्वती वाजेभिर्वाजिनीवती ।

1.003.10c यज्ञं वष्टु धियावसुः ॥

1.003.10a  pāvakā naḥ sarasvatī vājebhir vājinīvatī |
1.003.10c  yajñaṁ vaṣṭu dhiyāvasuḥ ||

1.003.11a चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।

1.003.11c यज्ञं दधे सरस्वती ॥

1.003.11a  codayitrī sūnṛtānāṁ cetantī sumatīnām |
1.003.11c  yajñaṁ dadhe sarasvatī ||

1.003.12a महो अर्णः सरस्वती प्र चेतयति केतुना ।

1.003.12c धियो विश्वा वि राजति ॥

1.003.12a  maho arṇaḥ sarasvatī pra cetayati ketunā |
1.003.12c  dhiyo viśvā vi rājati ||

1.004.01a सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।

1.004.01c जुहूमसि द्यविद्यवि ॥

1.004.01a  surūpakṛtnum ūtaye sudughām iva goduhe |
1.004.01c  juhūmasi dyavi-dyavi ||

1.004.02a उप नः सवना गहि सोमस्य सोमपाः पिब ।

1.004.02c गोदा इद्रेवतो मदः ॥

1.004.02a upa naḥ savanā gahi somasya somapāḥ piba |
1.004.02c godā id revato madaḥ ||

1.004.03a अथा ते अन्तमानां विद्याम सुमतीनाम् ।

1.004.03c मा नो अति ख्य आ गहि ॥

1.004.03a athā te antamānāṁ vidyāma sumatīnām |
1.004.03c mā no ati khya ā gahi ||

1.004.04a परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम् ।

1.004.04c यस्ते सखिभ्य आ वरम् ॥

1.004.04a parehi vigram astṛtam indram pṛcchā vipaścitam |
1.004.04c yas te sakhibhya ā varam ||

1.004.05a उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत ।

1.004.05c दधाना इन्द्र इद्दुवः ॥

1.004.05a uta bruvantu no nido nir anyataś cid ārata |
1.004.05c dadhānā indra id duvaḥ ||

1.004.06a उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः ।

1.004.06c स्यामेदिन्द्रस्य शर्मणि ॥

1.004.06a uta naḥ subhagām̐ arir voceyur dasma kṛṣṭayaḥ |
1.004.06c syāmed indrasya śarmaṇi ||

1.004.07a एमाशुमाशवे भर यज्ञश्रियं नृमादनम् ।

1.004.07c पतयन्मन्दयत्सखम् ॥

1.004.07a em āśum āśave bhara yajñaśriyaṁ nṛmādanam |
1.004.07c patayan mandayatsakham ||

1.004.08a अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः ।

1.004.08c प्रावो वाजेषु वाजिनम् ॥

1.004.08a asya pītvā śatakrato ghano vṛtrāṇām abhavaḥ |
1.004.08c prāvo vājeṣu vājinam ||

1.004.09a तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।

1.004.09c धनानामिन्द्र सातये ॥

1.004.09a taṁ tvā vājeṣu vājinaṁ vājayāmaḥ śatakrato |
1.004.09c dhanānām indra sātaye ||

1.004.10a यो रायो३ऽवनिर्महान्सुपारः सुन्वतः सखा ।

1.004.10c तस्मा इन्द्राय गायत ॥

1.004.10a yo rāyo3 'vanir mahān supāraḥ sunvataḥ sakhā |
1.004.10c tasmā indrāya gāyata ||

1.005.01a आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।

1.005.01c सखाय स्तोमवाहसः ॥

1.005.01a ā tv etā ni ṣīdatendram abhi pra gāyata |
1.005.01c sakhāya stomavāhasaḥ ||

1.005.02a पुरूतमं पुरूणामीशानं वार्याणाम् ।

1.005.02c इन्द्रं सोमे सचा सुते ॥

1.005.02a purūtamam purūṇām īśānaṁ vāryāṇām |
1.005.02c indraṁ some sacā sute ||

1.005.03a स घा नो योग आ भुवत्स राये स पुरंध्याम् ।

1.005.03c गमद्वाजेभिरा स नः ॥

1.005.03a sa ghā no yoga ā bhuvat sa rāye sa purandhyām |
1.005.03c gamad vājebhir ā sa naḥ ||

1.005.04a यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः ।

1.005.04c तस्मा इन्द्राय गायत ॥

1.005.04a yasya saṁsthe na vṛṇvate harī samatsu śatravaḥ |

1.005.04c tasmā indrāya gāyata ||

1.005.05a सुतपाव्ने सुता इमे शुचयो यन्ति वीतये ।

1.005.05c सोमासो दध्याशिरः ॥

1.005.05a sutapāvne sutā ime śucayo yanti vītaye |

1.005.05c somāso dadhyāśiraḥ ||

1.005.06a त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः ।

1.005.06c इन्द्र ज्यैष्ठ्याय सुक्रतो ॥

1.005.06a tvaṁ sutasya pītaye sadyo vṛddho ajāyathāḥ |

1.005.06c indra jyaiṣṭhyāya sukrato ||

1.005.07a आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः ।

1.005.07c शं ते सन्तु प्रचेतसे ॥

1.005.07a ā tvā viśantv āśavaḥ somāsa indra girvaṇaḥ |

1.005.07c śaṁ te santu pracetase ||

1.005.08a त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो ।

1.005.08c त्वां वर्धन्तु नो गिरः ॥

1.005.08a tvāṁ stomā avīvṛdhan tvām ukthā śatakrato |

1.005.08c tvāṁ vardhantu no giraḥ ||

1.005.09a अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् ।

1.005.09c यस्मिन्विश्वानि पौंस्या ॥

1.005.09a akṣitotiḥ saned imaṁ vājam indraḥ sahasriṇam |

1.005.09c yasmin viśvāni pauṁsyā ||

1.005.10a मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः ।

1.005.10c ईशानो यवया वधम् ॥

1.005.10a mā no martā abhi druhan tanūnām indra girvaṇaḥ |

1.005.10c īśāno yavayā vadham ||

1.006.01a युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।

1.006.01c रोचन्ते रोचना दिवि ॥

1.006.01a yuñjanti bradhnam aruṣaṁ carantam pari tasthuṣaḥ |
1.006.01c rocante rocanā divi ||

1.006.02a युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।

1.006.02c शोणा धृष्णू नृवाहसा ॥

1.006.02a yuñjanty asya kāmyā harī vipakṣasā rathe |
1.006.02c śoṇā dhṛṣṇū nṛvāhasā ||

1.006.03a केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

1.006.03c समुषद्भिरजायथाः ॥

1.006.03a ketuṁ kṛṇvann aketave peśo maryā apeśase |
1.006.03c sam uṣadbhir ajāyathāḥ ||

1.006.04a आदह स्वधामनु पुनर्गर्भत्वमेरिरे ।

1.006.04c दधाना नाम यज्ञियम् ॥

1.006.04a ād aha svadhām anu punar garbhatvam erire |
1.006.04c dadhānā nāma yajñiyam ||

1.006.05a वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।

1.006.05c अविन्द उस्रिया अनु ॥

1.006.05a vīḻu cid ārujatnubhir guhā cid indra vahnibhiḥ |
1.006.05c avinda usriyā anu ||

1.006.06a देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः ।

1.006.06c महामनूषत श्रुतम् ॥

1.006.06a devayanto yathā matim acchā vidadvasuṁ giraḥ |
1.006.06c mahām anūṣata śrutam ||

1.006.07a इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।

1.006.07c म॒न्दू स॑मा॒नव॑र्चसा ॥

1.006.07a indre̍ṇa̱ saṁ hi dṛkṣa̍se sañjagmā̱no abi̍bhyuṣā |
1.006.07c ma̱ndū sa̍mā̱nava̍rcasā ||

1.006.08a अ॒न॒व॒द्यैर॒भिद्यु॑भिर्म॒खः सह॑स्वदर्चति ।

1.006.08c ग॒णैरिन्द्र॑स्य॒ काम्यैः॑ ॥

1.006.08a a̱na̱va̱dyair a̱bhidyu̍bhir ma̱khaḥ saha̍svad arcati |
1.006.08c ga̱ṇair indra̍sya̱ kāmyai̍ḥ ||

1.006.09a अतः॑ परिज्म॒न्ना ग॑हि दि॒वो वा॑ रोच॒नादधि॑ ।

1.006.09c सम॑स्मिन्नृञ्जते॒ गिरः॑ ॥

1.006.09a ata̍ḥ parijma̱nn ā ga̍hi di̱vo vā̍ roca̱nād adhi̍ |
1.006.09c sam a̍sminn ṛñjate̱ gira̍ḥ ||

1.006.10a इ॒तो वा॑ सा॒तिमीम॑हे दि॒वो वा॒ पार्थि॑वा॒दधि॑ ।

1.006.10c इन्द्रं॑ म॒हो वा॒ रज॑सः ॥

1.006.10a i̱to vā̍ sā̱tim īma̍he di̱vo vā̱ pārthi̍vā̱d adhi̍ |
1.006.10c indra̍m ma̱ho vā̱ raja̍saḥ ||

1.007.01a इन्द्र॒मिद्गा॒थिनो॑ बृ॒हदिन्द्र॑म॒र्केभि॑र॒र्किणः॑ ।

1.007.01c इन्द्रं॒ वाणी॑रनूषत ॥

1.007.01a indra̱m id gā̱thino̍ bṛ̱had indra̍m a̱rkebhi̍r a̱rkiṇa̍ḥ |
1.007.01c indra̱ṁ vāṇī̍r anūṣata ||

1.007.02a इन्द्र॒ इद्धर्यो॒ः सचा॒ सम्मि॑श्ल॒ आ व॑चो॒युजा॑ ।

1.007.02c इन्द्रो॑ व॒ज्री हि॑र॒ण्ययः॑ ॥

1.007.02a indra̱ id dharyo̱ḥ sacā̱ sammi̍śla̱ ā va̍co̱yujā̍ |
1.007.02c indro̍ va̱jrī hi̍ra̱ṇyaya̍ḥ ||

1.007.03a इन्द्रो॑ दी॒र्घा॒य चक्ष॑स॒ आ सूर्यं॑ रोहयद्दि॒वि ।

1.007.03c वि गोभि॒रद्रि॑मैरयत् ॥

1.007.03a indro dīrghāya cakṣasa ā sūryaṁ rohayad divi |
1.007.03c vi gobhir adrim airayat ||

1.007.04a इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।

1.007.04c उग्र उग्राभिरूतिभिः ॥

1.007.04a indra vājeṣu no 'va sahasrapradhaneṣu ca |
1.007.04c ugra ugrābhir ūtibhiḥ ||

1.007.05a इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।

1.007.05c युजं वृत्रेषु वज्रिणम् ॥

1.007.05a indraṁ vayam mahādhana indram arbhe havāmahe |
1.007.05c yujaṁ vṛtreṣu vajriṇam ||

1.007.06a स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि ।

1.007.06c अस्मभ्यमप्रतिष्कुतः ॥

1.007.06a sa no vṛṣann amuṁ caruṁ satrādāvann apā vṛdhi |
1.007.06c asmabhyam apratiṣkutaḥ ||

1.007.07a तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः ।

1.007.07c न विन्धे अस्य सुष्टुतिम् ॥

1.007.07a tuñje-tuñje ya uttare stomā indrasya vajriṇaḥ |
1.007.07c na vindhe asya suṣṭutim ||

1.007.08a वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा ।

1.007.08c ईशानो अप्रतिष्कुतः ॥

1.007.08a vṛṣā yūtheva vaṁsagaḥ kṛṣṭīr iyarty ojasā |
1.007.08c īśāno apratiṣkutaḥ ||

1.007.09a य एकश्चर्षणीनां वसूनामिरज्यति ।

1.007.09c इन्द्रः पञ्च क्षितीनाम् ॥

1.007.09a ya ekaś carṣaṇīnāṁ vasūnām irajyati |
1.007.09c indraḥ pañca kṣitīnām ||

1.007.10a इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।

1.007.10c अस्माकमस्तु केवलः ॥

1.007.10a indraṁ vo viśvatas pari havāmahe janebhyaḥ |
1.007.10c asmākam astu kevalaḥ ||

1.008.01a एन्द्र सानसिं रयिं सजित्वानं सदासहम् ।

1.008.01c वर्षिष्ठमूतये भर ॥

1.008.01a endra sānasiṁ rayiṁ sajitvānaṁ sadāsaham |
1.008.01c varṣiṣṭham ūtaye bhara ||

1.008.02a नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै ।

1.008.02c त्वोतासो न्यर्वता ॥

1.008.02a ni yena muṣṭihatyayā ni vṛtrā ruṇadhāmahai |
1.008.02c tvotāso ny arvatā ||

1.008.03a इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि ।

1.008.03c जयेम सं युधि स्पृधः ॥

1.008.03a indra tvotāsa ā vayaṁ vajraṁ ghanā dadīmahi |
1.008.03c jayema saṁ yudhi spṛdhaḥ ||

1.008.04a वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् ।

1.008.04c सासह्याम पृतन्यतः ॥

1.008.04a vayaṁ śūrebhir astṛbhir indra tvayā yujā vayam |
1.008.04c sāsahyāma pṛtanyataḥ ||

1.008.05a महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे ।

1.008.05c द्यौर्न प्रथिना शवः ॥

1.008.05a mahāṁ̐ indraḥ paraś ca nu mahitvam astu vajriṇe |
1.008.05c dyaur na prathinā śavaḥ ||

1.008.06a समोहे वा य आशत नरस्तोकस्य सनितौ ।

1.008.06c विप्रासो वा धियायवः ॥

1.008.06a samohe vā ya āśata naras tokasya sanitau |
1.008.06c viprāso vā dhiyāyavaḥ ||

1.008.07a यः कुक्षिः सोमपातमः समुद्र इव पिन्वते ।

1.008.07c उर्वीरापो न काकुदः ॥

1.008.07a yaḥ kukṣiḥ somapātamaḥ samudra iva pinvate |
1.008.07c urvīr āpo na kākudaḥ ||

1.008.08a एवा ह्यस्य सूनृता विरप्शी गोमती मही ।

1.008.08c पक्वा शाखा न दाशुषे ॥

1.008.08a evā hy asya sūnṛtā virapśī gomatī mahī |
1.008.08c pakvā śākhā na dāśuṣe ||

1.008.09a एवा हि ते विभूतय ऊतय इन्द्र मावते ।

1.008.09c सद्यश्चित्सन्ति दाशुषे ॥

1.008.09a evā hi te vibhūtaya ūtaya indra māvate |
1.008.09c sadyaś cit santi dāśuṣe ||

1.008.10a एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या ।

1.008.10c इन्द्राय सोमपीतये ॥

1.008.10a evā hy asya kāmyā stoma ukthaṁ ca śaṁsyā |
1.008.10c indrāya somapītaye ||

1.009.01a इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ।

1.009.01c महाँ अभिष्टिरोजसा ॥

1.009.01a indrehi matsy andhaso viśvebhiḥ somaparvabhiḥ |
1.009.01c mahāṁ abhiṣṭir ojasā ||

1.009.02a एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने ।

1.009.02c चक्रिं विश्वानि चक्रये ॥

1.009.02a em enaṁ sṛjatā sute mandim indrāya mandine |
1.009.02c cakriṁ viśvāni cakraye ||

1.009.03a मत्स्वा सुशिप्र मन्दिभि स्तोमेभिर्विश्वचर्षणे ।

1.009.03c सचैषु सवनेष्वा ॥

1.009.03a matsvā suśipra mandibhi stomebhir viśvacarṣaṇe |
1.009.03c sacaiṣu savaneṣv ā ||

1.009.04a असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत ।

1.009.04c अजोषा वृषभं पतिम् ॥

1.009.04a asṛgram indra te giraḥ prati tvām ud ahāsata |
1.009.04c ajoṣā vṛṣabham patim ||

1.009.05a सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् ।

1.009.05c असदित्ते विभु प्रभु ॥

1.009.05a saṁ codaya citram arvāg rādha indra vareṇyam |
1.009.05c asad it te vibhu prabhu ||

1.009.06a अस्मान्सु तत्र चोदयेन्द्र राये रभस्वतः ।

1.009.06c तुविद्युम्न यशस्वतः ॥

1.009.06a asmān su tatra codayendra rāye rabhasvataḥ |
1.009.06c tuvidyumna yaśasvataḥ ||

1.009.07a सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् ।

1.009.07c विश्वायुर्धेह्यक्षितम् ॥

1.009.07a saṁ gomad indra vājavad asme pṛthu śravo bṛhat |
1.009.07c viśvāyur dhehy akṣitam ||

1.009.08a अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमम् ।

1.009.08c इन्द्र ता रथिनीरिषः ॥

1.009.08a asme dhehi śravo bṛhad dyumnaṁ sahasrasātamam |
1.009.08c indra tā rathinīr iṣaḥ ||

1.009.09a वसो॒रिन्द्रं॒ वसु॑पतिं गी॒र्भिर्गृ॒णन्त॑ ऋ॒ग्मिय॑म् ।

1.009.09c होम॒ गन्ता॑रमू॒तये॑ ॥

1.009.09a vaso̱r indra̱ṁ vasu̍patiṁ gī̱rbhir gṛ̱ṇanta̍ ṛ̱gmiya̍m |
1.009.09c homa̱ gantā̍ram ū̱taye̍ ||

1.009.10a सु॒तेसु॑ते॒ न्यो॑कसे बृ॒हद्बृ॑ह॒त एद॒रिः ।

1.009.10c इन्द्रा॑य शू॒षम॑र्चति ॥

1.009.10a su̱te-su̍te̱ nyo̍kase bṛ̱had bṛ̍ha̱ta ed a̱riḥ |
1.009.10c indrā̍ya śū̱ṣam a̍rcati ||

1.010.01a गाय॑न्ति त्वा गाय॒त्रिणोऽर्च॑न्त्य॒र्कम॒र्किणः॑ ।

1.010.01c ब्र॒ह्माण॑स्त्वा शतक्रत॒ उद्वं॒शमि॑व येमिरे ॥

1.010.01a gāya̍nti tvā gāya̱triṇo 'rca̍nty a̱rkam a̱rkiṇa̍ḥ |
1.010.01c bra̱hmāṇa̍s tvā śatakrata̱ ud va̱ṁśam i̍va yemire ||

1.010.02a यत्सानोः॒ सानु॒मारु॑ह॒द्भूर्य॒स्पष्ट॒ कर्त्व॑म् ।

1.010.02c तदिन्द्रो॒ अर्थं॑ चेतति यू॒थेन॑ वृ॒ष्णिरे॑जति ॥

1.010.02a yat sāno̱ḥ sānu̱m āru̍ha̱d bhūry aspa̍ṣṭa̱ kartva̍m |
1.010.02c tad indro̱ artha̍ṁ cetati yū̱thena̍ vṛ̱ṣṇir e̍jati ||

1.010.03a यु॒क्ष्वा हि के॒शिना॒ हरी॒ वृष॑णा कक्ष्य॒प्रा ।

1.010.03c अथा॑ न इन्द्र सोमपा गि॒रामुप॑श्रुतिं चर ॥

1.010.03a yu̱kṣvā hi ke̱śinā̱ harī̱ vṛṣa̍ṇā kakṣya̱prā |
1.010.03c athā̍ na indra somapā gi̱rām upa̍śrutiṁ cara ||

1.010.04a एहि॒ स्तोमाँ॑ अ॒भि स्व॑रा॒भि गृ॑णी॒ह्या रु॑व ।

1.010.04c ब्रह्म॑ च नो वसो॒ सचेन्द्र॑ य॒ज्ञं च॑ वर्धय ॥

1.010.04a ehi̱ stomā̍m̐ a̱bhi sva̍rā̱bhi gṛ̍ṇī̱hy ā ru̍va |
1.010.04c brahma̍ ca no vaso̱ sacendra̍ ya̱jñaṁ ca̍ vardhaya ||

1.010.05a उ॒क्थमिन्द्रा॑य॒ शंस्यं॒ वर्ध॑नं पुरुनि॒ष्षिधे॑ ।

1.010.05c शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥

1.010.05a uktham indrāya śaṁsyaṁ vardhanam puruniṣṣidhe |
1.010.05c śakro yathā suteṣu ṇo rāraṇat sakhyeṣu ca ||

1.010.06a तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।

1.010.06c स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥

1.010.06a tam it sakhitva īmahe taṁ rāye taṁ suvīrye |
1.010.06c sa śakra uta naḥ śakad indro vasu dayamānaḥ ||

1.010.07a सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।

1.010.07c गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥

1.010.07a suvivṛtaṁ sunirajam indra tvādātam id yaśaḥ |
1.010.07c gavām apa vrajaṁ vṛdhi kṛṇuṣva rādho adrivaḥ ||

1.010.08a नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।

1.010.08c जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥

1.010.08a nahi tvā rodasī ubhe ṛghāyamāṇam invataḥ |
1.010.08c jeṣaḥ svarvatīr apaḥ saṁ gā asmabhyaṁ dhūnuhi ||

1.010.09a आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।

1.010.09c इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥

1.010.09a āśrutkarṇa śrudhī havaṁ nū cid dadhiṣva me giraḥ |
1.010.09c indra stomam imam mama kṛṣvā yujaś cid antaram ||

1.010.10a विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ।

1.010.10c वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥

1.010.10a vidmā hi tvā vṛṣantamaṁ vājeṣu havanaśrutam |
1.010.10c vṛṣantamasya hūmaha ūtiṁ sahasrasātamām ||

1.010.11a आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब ।

1.010.11c नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥

1.010.11a ā tū na indra kauśika mandasānaḥ sutam piba |

1.010.11c navyam āyuḥ pra sū tira kṛdhī sahasrasām ṛṣim ||

1.010.12a परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।

1.010.12c वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥

1.010.12a pari tvā girvaṇo gira imā bhavantu viśvataḥ |
1.010.12c vṛddhāyum anu vṛddhayo juṣṭā bhavantu juṣṭayaḥ ||

1.011.01a इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः ।

1.011.01c रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥

1.011.01a indraṁ viśvā avīvṛdhan samudravyacasaṁ giraḥ |
1.011.01c rathītamaṁ rathīnāṁ vājānāṁ satpatim patim ||

1.011.02a सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।

1.011.02c त्वामभि प्र णोनुमो जेतारमपराजितम् ॥

1.011.02a sakhye ta indra vājino mā bhema śavasas pate |
1.011.02c tvām abhi pra ṇonumo jetāram aparājitam ||

1.011.03a पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।

1.011.03c यदी वाजस्य गोमत स्तोतृभ्यो मंहते मघम् ॥

1.011.03a pūrvīr indrasya rātayo na vi dasyanty ūtayaḥ |
1.011.03c yadī vājasya gomata stotṛbhyo maṁhate magham ||

1.011.04a पुरां भिन्दुर्युवा कविरमितौजा अजायत ।

1.011.04c इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥

1.011.04a purām bhindur yuvā kavir amitaujā ajāyata |
1.011.04c indro viśvasya karmaṇo dhartā vajrī puruṣṭutaḥ ||

1.011.05a त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।

1.011.05c त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥

1.011.05a tvaṁ valasya gomato 'pāvar adrivo bilam |
1.011.05c tvāṁ devā abibhyuṣas tujyamānāsa āviṣuḥ ||

1.011.06a तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।

1.011.06c उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥

1.011.06a tavāhaṁ śūra rātibhiḥ praty āyaṁ sindhum āvadan |
1.011.06c upātiṣṭhanta girvaṇo viduṣ ṭe tasya kāravaḥ ||

1.011.07a मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।

1.011.07c विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥

1.011.07a māyābhir indra māyinaṁ tvaṁ śuṣṇam avātiraḥ |
1.011.07c viduṣ ṭe tasya medhirās teṣāṁ śravāṁsy ut tira ||

1.011.08a इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।

1.011.08c सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥

1.011.08a indram īśānam ojasābhi stomā anūṣata |
1.011.08c sahasraṁ yasya rātaya uta vā santi bhūyasīḥ ||

1.012.01a अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।

1.012.01c अस्य यज्ञस्य सुक्रतुम् ॥

1.012.01a agniṁ dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam |
1.012.01c asya yajñasya sukratum ||

1.012.02a अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।

1.012.02c हव्यवाहं पुरुप्रियम् ॥

1.012.02a agnim-agniṁ havīmabhiḥ sadā havanta viśpatim |
1.012.02c havyavāham purupriyam ||

1.012.03a अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।

1.012.03c असि होता न ईड्यः ॥

1.012.03a agne devām̐ ihā vaha jajñāno vṛktabarhiṣe |
1.012.03c asi hotā na īḍyaḥ ||

1.012.04a ताँ उशतो वि बोधय यदग्ने यासि दूत्यम् ।

1.012.04c देवैरा सत्सि बर्हिषि ॥

1.012.04a tām̐ uśato vi bodhaya yad agne yāsi dūtyam |
1.012.04c devair ā satsi barhiṣi ||

1.012.05a घृताहवन दीदिवः प्रति ष्म रिषतो दह ।

1.012.05c अग्ने त्वं रक्षस्विनः ॥

1.012.05a ghṛtāhavana dīdivaḥ prati ṣma riṣato daha |
1.012.05c agne tvaṁ rakṣasvinaḥ ||

1.012.06a अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।

1.012.06c हव्यवाड्जुह्वास्यः ॥

1.012.06a agnināgniḥ sam idhyate kavir gṛhapatir yuvā |
1.012.06c havyavāḍ juhvāsyaḥ ||

1.012.07a कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।

1.012.07c देवममीवचातनम् ॥

1.012.07a kavim agnim upa stuhi satyadharmāṇam adhvare |
1.012.07c devam amīvacātanam ||

1.012.08a यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।

1.012.08c तस्य स्म प्राविता भव ॥

1.012.08a yas tvām agne haviṣpatir dūtaṁ deva saparyati |
1.012.08c tasya sma prāvitā bhava ||

1.012.09a यो अग्निं देववीतये हविष्माँ आविवासति ।

1.012.09c तस्मै पावक मृळय ॥

1.012.09a yo agniṁ devavītaye haviṣmām̐ āvivāsati |
1.012.09c tasmai pāvaka mṛḷaya ||

1.012.10a स नः पावक दीदिवोऽग्ने देवाँ इहा वह ।

1.012.10c उप यज्ञं हविश्च नः ॥

1.012.10a sa naḥ pāvaka dīdivo 'gne devām̐ ihā vaha |

1.012.10c  upa yajñaṁ haviś ca naḥ ||

1.012.11a स न स्तवान आ भर गायत्रेण नवीयसा ।

1.012.11c रयिं वीरवतीमिषम् ॥

1.012.11a  sa na stavāna ā bhara gāyatreṇa navīyasā |
1.012.11c  rayiṁ vīravatīm iṣam ||

1.012.12a अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः ।

1.012.12c इमं स्तोमं जुषस्व नः ॥

1.012.12a  agne śukreṇa śociṣā viśvābhir devahūtibhiḥ |
1.012.12c  imaṁ stomaṁ juṣasva naḥ ||

1.013.01a सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते ।

1.013.01c होतः पावक यक्षि च ॥

1.013.01a  susamiddho na ā vaha devām̐ agne haviṣmate |
1.013.01c  hotaḥ pāvaka yakṣi ca ||

1.013.02a मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।

1.013.02c अद्या कृणुहि वीतये ॥

1.013.02a  madhumantaṁ tanūnapād yajñaṁ deveṣu naḥ kave |
1.013.02c  adyā kṛṇuhi vītaye ||

1.013.03a नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये ।

1.013.03c मधुजिह्वं हविष्कृतम् ॥

1.013.03a  narāśaṁsam iha priyam asmin yajña upa hvaye |
1.013.03c  madhujihvaṁ haviṣkṛtam ||

1.013.04a अग्ने सुखतमे रथे देवाँ ईळित आ वह ।

1.013.04c असि होता मनुर्हितः ॥

1.013.04a  agne sukhatame rathe devām̐ īḷita ā vaha |
1.013.04c  asi hotā manurhitaḥ ||

1.013.05a स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः ।

1.013.05c यत्रामृतस्य चक्षणम् ॥

1.013.05a stṛṇīta barhir ānuṣag ghṛtapṛṣṭham manīṣiṇaḥ |
1.013.05c yatrāmṛtasya cakṣaṇam ||

1.013.06a वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः ।

1.013.06c अद्या नूनं च यष्टवे ॥

1.013.06a vi śrayantām ṛtāvṛdho dvāro devīr asaścataḥ |
1.013.06c adyā nūnaṁ ca yaṣṭave ||

1.013.07a नक्तोषासा सुपेशसास्मिन्यज्ञ उप ह्वये ।

1.013.07c इदं नो बर्हिरासदे ॥

1.013.07a naktoṣāsā supeśasāsmin yajña upa hvaye |
1.013.07c idaṁ no barhir āsade ||

1.013.08a ता सुजिह्वा उप ह्वये होतारा दैव्या कवी ।

1.013.08c यज्ञं नो यक्षतामिमम् ॥

1.013.08a tā sujihvā upa hvaye hotārā daivyā kavī |
1.013.08c yajñaṁ no yakṣatām imam ||

1.013.09a इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ।

1.013.09c बर्हिः सीदन्त्वस्रिधः ॥

1.013.09a iḷā sarasvatī mahī tisro devīr mayobhuvaḥ |
1.013.09c barhiḥ sīdantv asridhaḥ ||

1.013.10a इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये ।

1.013.10c अस्माकमस्तु केवलः ॥

1.013.10a iha tvaṣṭāram agriyaṁ viśvarūpam upa hvaye |
1.013.10c asmākam astu kevalaḥ ||

1.013.11a अव सृजा वनस्पते देव देवेभ्यो हविः ।

1.013.11c प्र दातुरस्तु चेतनम् ॥

1.013.11a ava sṛjā vanaspate deva devebhyo haviḥ |
1.013.11c pra dātur astu cetanam ||

1.013.12a स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे ।

1.013.12c तत्र देवाँ उप ह्वये ॥

1.013.12a svāhā yajñaṁ kṛṇotanendrāya yajvano gṛhe |
1.013.12c tatra devām̐ upa hvaye ||

1.014.01a ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये ।

1.014.01c देवेभिर्याहि यक्षि च ॥

1.014.01a aibhir agne duvo giro viśvebhiḥ somapītaye |
1.014.01c devebhir yāhi yakṣi ca ||

1.014.02a आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः ।

1.014.02c देवेभिरग्न आ गहि ॥

1.014.02a ā tvā kaṇvā ahūṣata gṛṇanti vipra te dhiyaḥ |
1.014.02c devebhir agna ā gahi ||

1.014.03a इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् ।

1.014.03c आदित्यान्मारुतं गणम् ॥

1.014.03a indravāyū bṛhaspatim mitrāgnim pūṣaṇam bhagam |
1.014.03c ādityān mārutaṁ gaṇam ||

1.014.04a प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः ।

1.014.04c द्रप्सा मध्वश्चमूषदः ॥

1.014.04a pra vo bhriyanta indavo matsarā mādayiṣṇavaḥ |
1.014.04c drapsā madhvaś camūṣadaḥ ||

1.014.05a ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः ।

1.014.05c हविष्मन्तो अरंकृतः ॥

1.014.05a ī̱ḷa̍te̱ tvām a̍va̱syava̱ḥ kaṇvā̍so vṛ̱ktaba̍rhiṣaḥ |
1.014.05c ha̱viṣma̍nto ara̱ṅkṛta̍ḥ ||

1.014.06a घृ॒तपृ॑ष्ठा मनो॒युजो॒ ये त्वा॒ वह॑न्ति॒ वह्न॑यः ।

1.014.06c आ दे॒वान्सोम॑पीतये ॥

1.014.06a ghṛ̱tapṛ̍ṣṭhā mano̱yujo̱ ye tvā̱ vaha̍nti̱ vahna̍yaḥ |
1.014.06c ā de̱vān soma̍pītaye ||

1.014.07a तान्यज॑त्राँ ऋता॒वृधोऽग्ने॒ पत्नी॑वतस्कृधि ।

1.014.07c मध्वः॑ सुजिह्व पायय ॥

1.014.07a tān yaja̍trām̐ ṛtā̱vṛdho 'gne̱ patnī̍vatas kṛdhi |
1.014.07c madhva̍ḥ sujihva pāyaya ||

1.014.08a ये यज॑त्रा॒ य ईड्या॒स्ते ते॑ पिबन्तु जि॒ह्वया॑ ।

1.014.08c मधो॑रग्ने॒ वष॑ट्कृति ॥

1.014.08a ye yaja̍trā̱ ya īḍyā̱s te te̍ pibantu ji̱hvayā̍ |
1.014.08c madho̍r agne̱ vaṣa̍ṭkṛti ||

1.014.09a आकीं॒ सूर्य॑स्य रोच॒नाद्विश्वा॑न्दे॒वाँ उ॑ष॒र्बुध॑ः ।

1.014.09c विप्रो॒ होते॒ह व॑क्षति ॥

1.014.09a ākī̱ṁ sūrya̍sya roca̱nād viśvā̍n de̱vām̐ u̍ṣa̱rbudha̍ḥ |
1.014.09c vipro̱ hote̱ha va̍kṣati ||

1.014.10a विश्वे॑भिः सो॒म्यं मध्वग्न॒ इन्द्रे॑ण वा॒युना॑ ।

1.014.10c पिबा॑ मि॒त्रस्य॒ धाम॑भिः ॥

1.014.10a viśve̍bhiḥ so̱myam madhv agna̱ indre̍ṇa vā̱yunā̍ |
1.014.10c pibā̍ mi̱trasya̱ dhāma̍bhiḥ ||

1.014.11a त्वं होता॒ मनु॑र्हि॒तोऽग्ने॑ य॒ज्ञेषु॑ सीदसि ।

1.014.11c सेमं नो॑ अध्व॒रं य॑ज ॥

1.014.11a tvaṁ hotā̱ manu̍rhi̱to 'gne̍ ya̱jñeṣu̍ sīdasi |
1.014.11c semaṁ no̍ adhva̱raṁ ya̍ja ||

1.014.12a यु॒क्ष्वा ह्यरु॑षी॒ रथे॑ ह॒रितो॑ देव रो॒हितः॑ ।

1.014.12c ताभि॑र्दे॒वाँ इ॒हा व॑ह ॥

1.014.12a yu̱kṣvā hy aru̍ṣī̱ rathe̍ ha̱rito̍ deva ro̱hita̍ḥ |
1.014.12c tābhi̍r de̱vā̐m̐ i̱hā va̍ha ||

1.015.01a इन्द्र॒ सोम॒ं पिब॑ ऋ॒तुना॒ त्वा॑ विश॒न्त्विन्द॑वः ।

1.015.01c म॒त्स॒रास॒स्तदो॑कसः ॥

1.015.01a indra̱ soma̱m piba̍ ṛ̱tunā tvā̍ viśa̱ntv inda̍vaḥ |
1.015.01c ma̱tsa̱rāsa̱s tado̍kasaḥ ||

1.015.02a मरु॑तः॒ पिब॑त ऋ॒तुना॑ पो॒त्राद्य॒ज्ञं पु॑नीतन ।

1.015.02c यू॒यं हि ष्ठा सु॑दानवः ॥

1.015.02a maru̍ta̱ḥ piba̍ta ṛ̱tunā̍ po̱trād ya̱jñam pu̍nītana |
1.015.02c yū̱yaṁ hi ṣṭhā su̍dānavaḥ ||

1.015.03a अ॒भि य॒ज्ञं गृ॑णीहि नो॒ ग्नावो॒ नेष्टः॒ पिब॑ ऋ॒तुना॑ ।

1.015.03c त्वं हि र॑त्न॒धा असि॑ ॥

1.015.03a a̱bhi ya̱jñaṁ gṛ̍ṇīhi no̱ gnāvo̱ neṣṭa̱ḥ piba̍ ṛ̱tunā̍ |
1.015.03c tvaṁ hi ra̍tna̱dhā asi̍ ||

1.015.04a अग्ने॑ दे॒वाँ इ॒हा व॑ह सा॒दया॒ योनि॑षु त्रि॒षु ।

1.015.04c परि॑ भूष॒ पिब॑ ऋ॒तुना॑ ॥

1.015.04a agne̍ de̱vā̐m̐ i̱hā va̍ha sā̱dayā̱ yoni̍ṣu tri̱ṣu |
1.015.04c pari̍ bhūṣa̱ piba̍ ṛ̱tunā̍ ||

1.015.05a ब्राह्म॑णादिन्द्र॒ राध॑सः॒ पिबा॒ सोम॑मृ॒तूँरनु॑ ।

1.015.05c तवेद्धि स॒ख्यमस्तृ॑तम् ॥

1.015.05a brāhma̍ṇād indra̱ rādha̍sa̱ḥ pibā̱ soma̍m ṛ̱tū̐m̐r anu̍ |
1.015.05c taved dhi sa̱khyam astṛ̍tam ||

1.015.06a यु॒वं दक्षं॑ धृतव्रत॒ मित्रा॑वरुण दू॒ळभ॑म् ।

1.015.06c ऋतुना यज्ञमाशाथे ॥

1.015.06a yuvaṁ dakṣaṁ dhṛtavrata mitrāvaruṇa dūlabham |
1.015.06c ṛtunā yajñam āśāthe ||

1.015.07a द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ।

1.015.07c यज्ञेषु देवमीळते ॥

1.015.07a draviṇodā draviṇaso grāvahastāso adhvare |
1.015.07c yajñeṣu devam īlate ||

1.015.08a द्रविणोदा ददातु नो वसूनि यानि शृण्विरे ।

1.015.08c देवेषु ता वनामहे ॥

1.015.08a draviṇodā dadātu no vasūni yāni śṛṇvire |
1.015.08c deveṣu tā vanāmahe ||

1.015.09a द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत ।

1.015.09c नेष्ट्रादृतुभिरिष्यत ॥

1.015.09a draviṇodāḥ pipīṣati juhota pra ca tiṣṭhata |
1.015.09c neṣṭrād ṛtubhir iṣyata ||

1.015.10a यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे ।

1.015.10c अध स्मा नो ददिर्भव ॥

1.015.10a yat tvā turīyam ṛtubhir draviṇodo yajāmahe |
1.015.10c adha smā no dadir bhava ||

1.015.11a अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता ।

1.015.11c ऋतुना यज्ञवाहसा ॥

1.015.11a aśvinā pibatam madhu dīdyagnī śucivratā |
1.015.11c ṛtunā yajñavāhasā ||

1.015.12a गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि ।

1.015.12c देवान्देवयते यज ॥

1.015.12a gārhapatyena santya ṛtunā yajñanīr asi |

1.015.12c devān devayate yaja ||

1.016.01a आ त्वा वहन्तु हरयो वृषणं सोमपीतये ।

1.016.01c इन्द्र त्वा सूरचक्षसः ॥

1.016.01a ā tvā vahantu harayo vṛṣaṇaṁ somapītaye |
1.016.01c indra tvā sūracakṣasaḥ ||

1.016.02a इमा धाना घृतस्नुवो हरी इहोप वक्षतः ।

1.016.02c इन्द्रं सुखतमे रथे ॥

1.016.02a imā dhānā ghṛtasnuvo harī ihopa vakṣataḥ |
1.016.02c indraṁ sukhatame rathe ||

1.016.03a इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे ।

1.016.03c इन्द्रं सोमस्य पीतये ॥

1.016.03a indraṁ prātar havāmaha indraṁ prayaty adhvare |
1.016.03c indraṁ somasya pītaye ||

1.016.04a उप नः सुतमा गहि हरिभिरिन्द्र केशिभिः ।

1.016.04c सुते हि त्वा हवामहे ॥

1.016.04a upa naḥ sutam ā gahi haribhir indra keśibhiḥ |
1.016.04c sute hi tvā havāmahe ||

1.016.05a सेमं न स्तोममा गह्युपेदं सवनं सुतम् ।

1.016.05c गौरो न तृषितः पिब ॥

1.016.05a semaṁ na stomam ā gahy upedaṁ savanaṁ sutam |
1.016.05c gauro na tṛṣitaḥ piba ||

1.016.06a इमे सोमास इन्दवः सुतासो अधि बर्हिषि ।

1.016.06c ताँ इन्द्र सहसे पिब ॥

1.016.06a ime somāsa indavaḥ sutāso adhi barhiṣi |
1.016.06c tām̐ indra sahase piba ||

1.016.07a अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः ।

1.016.07c अथा सोमं सुतं पिब ॥

1.016.07a ayaṁ te stomo agriyo hṛdispṛg astu śantamaḥ |
1.016.07c athā somaṁ sutam piba ||

1.016.08a विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति ।

1.016.08c वृत्रहा सोमपीतये ॥

1.016.08a viśvam it savanaṁ sutam indro madāya gacchati |
1.016.08c vṛtrahā somapītaye ||

1.016.09a सेमं नः काममा पृण गोभिरश्वैः शतक्रतो ।

1.016.09c स्तवाम त्वा स्वाध्यः ॥

1.016.09a semaṁ naḥ kāmam ā pṛṇa gobhir aśvaiḥ śatakrato |
1.016.09c stavāma tvā svādhyaḥ ||

1.017.01a इन्द्रावरुणयोरहं सम्राजोरव आ वृणे ।

1.017.01c ता नो मृळात ईदृशे ॥

1.017.01a indrāvaruṇayor ahaṁ samrājor ava ā vṛṇe |
1.017.01c tā no mṛḷāta īdṛśe ||

1.017.02a गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः ।

1.017.02c धर्तारा चर्षणीनाम् ॥

1.017.02a gantārā hi stho 'vase havaṁ viprasya māvataḥ |
1.017.02c dhartārā carṣaṇīnām ||

1.017.03a अनुकामं तर्पयेथामिन्द्रावरुण राय आ ।

1.017.03c ता वां नेदिष्ठमीमहे ॥

1.017.03a anukāmaṁ tarpayethām indrāvaruṇa rāya ā |
1.017.03c tā vāṁ nediṣṭham īmahe ||

1.017.04a युवाकु हि शचीनां युवाकु सुमतीनाम् ।

1.017.04c भूयाम वाजदाव्नाम् ॥

1.017.04a yuvāku hi śacīnāṁ yuvāku sumatīnām |
1.017.04c bhūyāma vājadāvnām ||

1.017.05a इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् ।

1.017.05c क्रतुर्भवत्युक्थ्यः ॥

1.017.05a indraḥ sahasradāvnāṁ varuṇaḥ śaṁsyānām |
1.017.05c kratur bhavaty ukthyaḥ ||

1.017.06a तयोरिदवसा वयं सनेम नि च धीमहि ।

1.017.06c स्यादुत प्ररेचनम् ॥

1.017.06a tayor id avasā vayaṁ sanema ni ca dhīmahi |
1.017.06c syād uta prarecanam ||

1.017.07a इन्द्रावरुण वामहं हुवे चित्राय राधसे ।

1.017.07c अस्मान्सु जिग्युषस्कृतम् ॥

1.017.07a indrāvaruṇa vām ahaṁ huve citrāya rādhase |
1.017.07c asmān su jigyuṣas kṛtam ||

1.017.08a इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा ।

1.017.08c अस्मभ्यं शर्म यच्छतम् ॥

1.017.08a indrāvaruṇa nū nu vāṁ siṣāsantīṣu dhīṣv ā |
1.017.08c asmabhyaṁ śarma yacchatam ||

1.017.09a प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे ।

1.017.09c यामृधाथे सधस्तुतिम् ॥

1.017.09a pra vām aśnotu suṣṭutir indrāvaruṇa yāṁ huve |
1.017.09c yām ṛdhāthe sadhastutim ||

1.018.01a सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ।

1.018.01c कक्षीवन्तं य औशिजः ॥

1.018.01a somānaṁ svaraṇaṁ kṛṇuhi brahmaṇas pate |
1.018.01c kakṣīvantaṁ ya auśijaḥ ||

1.018.02a यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः ।

1.018.02c स नः सिषक्तु यस्तुरः ॥

1.018.02a yo revān yo amīvahā vasuvit puṣṭivardhanaḥ |
1.018.02c sa naḥ siṣaktu yas turaḥ ||

1.018.03a मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य ।

1.018.03c रक्षा णो ब्रह्मणस्पते ॥

1.018.03a mā naḥ śaṁso araruṣo dhūrtiḥ praṇaṅ martyasya |
1.018.03c rakṣā ṇo brahmaṇas pate ||

1.018.04a स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः ।

1.018.04c सोमो हिनोति मर्त्यम् ॥

1.018.04a sa ghā vīro na riṣyati yam indro brahmaṇas patiḥ |
1.018.04c somo hinoti martyam ||

1.018.05a त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम् ।

1.018.05c दक्षिणा पात्वंहसः ॥

1.018.05a tvaṁ tam brahmaṇas pate soma indraś ca martyam |
1.018.05c dakṣiṇā pātv aṁhasaḥ ||

1.018.06a सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।

1.018.06c सनिं मेधामयासिषम् ॥

1.018.06a sadasas patim adbhutam priyam indrasya kāmyam |
1.018.06c sanim medhām ayāsiṣam ||

1.018.07a यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन ।

1.018.07c स धीनां योगमिन्वति ॥

1.018.07a yasmād ṛte na sidhyati yajño vipaścitaś cana |
1.018.07c sa dhīnāṁ yogam invati ||

1.018.08a आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् ।

1.018.08c होत्रा देवेषु गच्छति ॥

1.018.08a ād ṛdhnoti haviṣkṛtim prāñcaṁ kṛṇoty adhvaram |
1.018.08c hotrā deveṣu gacchati ||

1.018.09a नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् ।

1.018.09c दिवो न सद्ममखसम् ॥

1.018.09a narāśaṁsaṁ sudhṛṣṭamam apaśyaṁ saprathastamam |
1.018.09c divo na sadmamakhasam ||

1.019.01a प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे ।

1.019.01c मरुद्भिरग्न आ गहि ॥

1.019.01a prati tyaṁ cārum adhvaraṁ gopīthāya pra hūyase |
1.019.01c marudbhir agna ā gahi ||

1.019.02a नहि देवो न मर्त्यो महस्तव क्रतुं परः ।

1.019.02c मरुद्भिरग्न आ गहि ॥

1.019.02a nahi devo na martyo mahas tava kratum paraḥ |
1.019.02c marudbhir agna ā gahi ||

1.019.03a ये महो रजसो विदुर्विश्वे देवासो अद्रुहः ।

1.019.03c मरुद्भिरग्न आ गहि ॥

1.019.03a ye maho rajaso vidur viśve devāso adruhaḥ |
1.019.03c marudbhir agna ā gahi ||

1.019.04a य उग्रा अर्कमानृचुरनाधृष्टास ओजसा ।

1.019.04c मरुद्भिरग्न आ गहि ॥

1.019.04a ya ugrā arkam ānṛcur anādhṛṣṭāsa ojasā |
1.019.04c marudbhir agna ā gahi ||

1.019.05a ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः ।

1.019.05c मरुद्भिरग्न आ गहि ॥

1.019.05a ye śubhrā ghoravarpasaḥ sukṣatrāso riśādasaḥ |
1.019.05c marudbhir agna ā gahi ||

1.019.06a ये नाकस्याधि रोचने दिवि देवास आसते ।

1.019.06c मरुद्भिरग्न आ गहि ॥

1.019.06a ye nākasyādhi rocane divi devāsa āsate |
1.019.06c marudbhir agna ā gahi ||

1.019.07a य ईङ्खयन्ति पर्वतान्तिरः समुद्रमर्णवम् ।

1.019.07c मरुद्भिरग्न आ गहि ॥

1.019.07a ya īṅkhayanti parvatān tiraḥ samudram arṇavam |
1.019.07c marudbhir agna ā gahi ||

1.019.08a आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा ।

1.019.08c मरुद्भिरग्न आ गहि ॥

1.019.08a ā ye tanvanti raśmibhis tiraḥ samudram ojasā |
1.019.08c marudbhir agna ā gahi ||

1.019.09a अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ।

1.019.09c मरुद्भिरग्न आ गहि ॥

1.019.09a abhi tvā pūrvapītaye sṛjāmi somyam madhu |
1.019.09c marudbhir agna ā gahi ||

1.020.01a अयं देवाय जन्मने स्तोमो विप्रेभिरासया ।

1.020.01c अकारि रत्नधातमः ॥

1.020.01a ayaṁ devāya janmane stomo viprebhir āsayā |
1.020.01c akāri ratnadhātamaḥ ||

1.020.02a य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी ।

1.020.02c शमीभिर्यज्ञमाशत ॥

1.020.02a ya indrā̍ya vaco̱yujā̍ tata̱kṣur mana̍sā̱ harī̍ |
1.020.02c śamī̍bhir ya̱jñam ā̍śata ||

1.020.03a तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम् ।

1.020.03c तक्षन्धेनुं सबर्दुघाम् ॥

1.020.03a takṣa̱n nāsa̍tyābhyā̱m pari̍jmānaṁ su̱khaṁ ratha̍m |
1.020.03c takṣa̍n dhe̱nuṁ sa̍ba̱rdughā̍m ||

1.020.04a युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः ।

1.020.04c ऋभवो विष्ट्यक्रत ॥

1.020.04a yuvā̍nā pi̱tarā̱ puna̍ḥ sa̱tyama̍ntrā ṛjū̱yava̍ḥ |
1.020.04c ṛ̱bhavo̍ vi̱ṣṭy a̍krata ||

1.020.05a सं वो मदासो अग्मतेन्द्रेण च मरुत्वता ।

1.020.05c आदित्येभिश्च राजभिः ॥

1.020.05a saṁ vo̱ madā̍so agma̱tendre̍ṇa ca ma̱rutva̍tā |
1.020.05c ā̱di̱tyebhi̍ś ca̱ rāja̍bhiḥ ||

1.020.06a उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम् ।

1.020.06c अकर्त चतुरः पुनः ॥

1.020.06a u̱ta tyaṁ ca̍ma̱saṁ nava̱ṁ tvaṣṭu̍r de̱vasya̱ niṣkṛ̍tam |
1.020.06c aka̍rta ca̱tura̱ḥ puna̍ḥ ||

1.020.07a ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते ।

1.020.07c एकमेकं सुशस्तिभिः ॥

1.020.07a te no̱ ratnā̍ni dhattana̱ trir ā sāptā̍ni sunva̱te |
1.020.07c eka̍m-ekaṁ suśa̱stibhi̍ḥ ||

1.020.08a अधारयन्त वह्नयोऽभजन्त सुकृत्यया ।

1.020.08c भागं देवेषु यज्ञियम् ॥

1.020.08a adhā̍rayanta̱ vahna̱yo 'bha̍janta sukṛ̱tyayā̍ |
1.020.08c bhā̱gaṁ de̱veṣu̍ ya̱jñiya̍m ||

1.021.01a इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि ।

1.021.01c ता सोमं सोमपातमा ॥

1.021.01a ihendrāgnī upa hvaye tayor it stomam uśmasi |
1.021.01c tā somaṁ somapātamā ||

1.021.02a ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः ।

1.021.02c ता गायत्रेषु गायत ॥

1.021.02a tā yajñeṣu pra śaṁsatendrāgnī śumbhatā naraḥ |
1.021.02c tā gāyatreṣu gāyata ||

1.021.03a ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे ।

1.021.03c सोमपा सोमपीतये ॥

1.021.03a tā mitrasya praśastaya indrāgnī tā havāmahe |
1.021.03c somapā somapītaye ||

1.021.04a उग्रा सन्ता हवामह उपेदं सवनं सुतम् ।

1.021.04c इन्द्राग्नी एह गच्छताम् ॥

1.021.04a ugrā santā havāmaha upedaṁ savanaṁ sutam |
1.021.04c indrāgnī eha gacchatām ||

1.021.05a ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतम् ।

1.021.05c अप्रजाः सन्त्वत्रिणः ॥

1.021.05a tā mahāntā sadaspatī indrāgnī rakṣa ubjatam |
1.021.05c aprajāḥ santv atriṇaḥ ||

1.021.06a तेन सत्येन जागृतमधि प्रचेतुने पदे ।

1.021.06c इन्द्राग्नी शर्म यच्छतम् ॥

1.021.06a tena satyena jāgṛtam adhi pracetune pade |
1.021.06c indrāgnī śarma yacchatam ||

1.022.01a प्रातर्युजा वि बोधयाश्विनावेह गच्छताम् ।

1.022.01c अस्य सोमस्य पीतये ॥

1.022.01a prātaryujā vi bodhayāśvināv eha gacchatām |
1.022.01c asya somasya pītaye ||

1.022.02a या सुरथा रथीतमोभा देवा दिविस्पृशा ।

1.022.02c अश्विना ता हवामहे ॥

1.022.02a yā surathā rathītamobhā devā divispṛśā |
1.022.02c aśvinā tā havāmahe ||

1.022.03a या वां कशा मधुमत्यश्विना सूनृतावती ।

1.022.03c तया यज्ञं मिमिक्षतम् ॥

1.022.03a yā vāṁ kaśā madhumaty aśvinā sūnṛtāvatī |
1.022.03c tayā yajñam mimikṣatam ||

1.022.04a नहि वामस्ति दूरके यत्रा रथेन गच्छथः ।

1.022.04c अश्विना सोमिनो गृहम् ॥

1.022.04a nahi vām asti dūrake yatrā rathena gacchathaḥ |
1.022.04c aśvinā somino gṛham ||

1.022.05a हिरण्यपाणिमूतये सवितारमुप ह्वये ।

1.022.05c स चेत्ता देवता पदम् ॥

1.022.05a hiraṇyapāṇim ūtaye savitāram upa hvaye |
1.022.05c sa cettā devatā padam ||

1.022.06a अपां नपातमवसे सवितारमुप स्तुहि ।

1.022.06c तस्य व्रतान्युश्मसि ॥

1.022.06a apāṁ napātam avase savitāram upa stuhi |
1.022.06c tasya vratāny uśmasi ||

1.022.07a विभक्तारं हवामहे वसोश्चित्रस्य राधसः ।

1.022.07c सवितारं नृचक्षसम् ॥

1.022.07a vibhaktāraṁ havāmahe vasoś citrasya rādhasaḥ |

1.022.07c  sa̱vi̱tāra̍ṁ nṛ̱cakṣa̍sam ||

1.022.08a सखा॑य॒ आ नि षी॑दत सवि॒ता स्तोम्यो॒ नु न॑ः ।

1.022.08c दाता॒ राधां॑सि शुम्भति ॥

1.022.08a  sakhā̍ya̱ ā ni ṣī̍data savi̱tā stomyo̱ nu na̍ḥ |
1.022.08c  dātā̱ rādhā̍ṁsi śumbhati ||

1.022.09a अग्ने॒ पत्नी॑रि॒हा व॑ह दे॒वाना॑मुश॒तीरुप॑ ।

1.022.09c त्वष्टा॑रं॒ सोम॑पीतये ॥

1.022.09a  agne̱ patnī̍r i̱hā va̍ha de̱vānā̍m uśa̱tīr upa̍ |
1.022.09c  tvaṣṭā̍ra̱ṁ soma̍pītaye ||

1.022.10a आ ग्ना अ॑ग्न इ॒हाव॑से॒ होत्रां॑ यवि॑ष्ठ॒ भार॑तीम् ।

1.022.10c वरू॑त्रीं धि॒षणां॑ वह ॥

1.022.10a  ā gnā a̍gna i̱hāva̍se̱ hotrā̍ṁ yaviṣṭha̱ bhāra̍tīm |
1.022.10c  varū̍trīṁ dhi̱ṣaṇā̍ṁ vaha ||

1.022.11a अ॒भि नो॑ दे॒वीरव॑सा म॒हः शर्म॑णा नृ॒पत्नी॑ः ।

1.022.11c अच्छि॑न्नपत्राः सचन्ताम् ॥

1.022.11a  a̱bhi no̍ de̱vīr ava̍sā ma̱haḥ śarma̍ṇā nṛ̱patnī̍ḥ |
1.022.11c  acchi̍nnapatrāḥ sacantām ||

1.022.12a इ॒हेन्द्रा॒णीमुप॑ ह्वये वरुणा॒नीं स्व॒स्तये॑ ।

1.022.12c अ॒ग्नायीं॒ सोम॑पीतये ॥

1.022.12a  i̱hendrā̱ṇīm upa̍ hvaye varuṇā̱nīṁ sva̱staye̍ |
1.022.12c  a̱gnāyī̱ṁ soma̍pītaye ||

1.022.13a म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम् ।

1.022.13c पि॒पृ॒तां नो॒ भरी॑मभिः ॥

1.022.13a  ma̱hī dyauḥ pṛ̍thi̱vī ca̍ na i̱maṁ ya̱jñam mi̍mikṣatām |
1.022.13c  pi̱pṛ̱tāṁ no̱ bharī̍mabhiḥ ||

1.022.14a तयो॒रिद्घृ॒तव॒त्पयो॒ विप्रा॑ रिहन्ति धी॒तिभि॑ः ।

1.022.14c गन्धर्वस्य ध्रुवे पदे ॥

1.022.14a tayor id ghṛtavat payo viprā rihanti dhītibhiḥ |
1.022.14c gandharvasya dhruve pade ||

1.022.15a स्योना पृथिवि भवानृक्षरा निवेशनी ।

1.022.15c यच्छा नः शर्म सप्रथः ॥

1.022.15a syonā pṛthivi bhavānṛkṣarā niveśanī |
1.022.15c yacchā naḥ śarma saprathaḥ ||

1.022.16a अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।

1.022.16c पृथिव्याः सप्त धामभिः ॥

1.022.16a ato devā avantu no yato viṣṇur vicakrame |
1.022.16c pṛthivyāḥ sapta dhāmabhiḥ ||

1.022.17a इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।

1.022.17c समूळ्हमस्य पांसुरे ॥

1.022.17a idaṁ viṣṇur vi cakrame tredhā ni dadhe padam |
1.022.17c samūḻham asya pāṁsure ||

1.022.18a त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ।

1.022.18c अतो धर्माणि धारयन् ॥

1.022.18a trīṇi padā vi cakrame viṣṇur gopā adābhyaḥ |
1.022.18c ato dharmāṇi dhārayan ||

1.022.19a विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।

1.022.19c इन्द्रस्य युज्यः सखा ॥

1.022.19a viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe |
1.022.19c indrasya yujyaḥ sakhā ||

1.022.20a तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।

1.022.20c दिवीव चक्षुराततम् ॥

1.022.20a tad viṣṇoḥ paramam padaṁ sadā paśyanti sūrayaḥ |

1.022.20c diviva cakṣur ātatam ||

1.022.21a तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।

1.022.21c विष्णोर्यत्परमं पदम् ॥

1.022.21a tad viprāso vipanyavo jāgṛvāṁsaḥ sam indhate |
1.022.21c viṣṇor yat paramam padam ||

1.023.01a तीव्राः सोमास आ गह्याशीर्वन्तः सुता इमे ।

1.023.01c वायो तान्प्रस्थितान्पिब ॥

1.023.01a tīvrāḥ somāsa ā gahy āśīrvantaḥ sutā ime |
1.023.01c vāyo tān prasthitān piba ||

1.023.02a उभा देवा दिविस्पृशेन्द्रवायू हवामहे ।

1.023.02c अस्य सोमस्य पीतये ॥

1.023.02a ubhā devā divispṛśendravāyū havāmahe |
1.023.02c asya somasya pītaye ||

1.023.03a इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये ।

1.023.03c सहस्राक्षा धियस्पती ॥

1.023.03a indravāyū manojuvā viprā havanta ūtaye |
1.023.03c sahasrākṣā dhiyas patī ||

1.023.04a मित्रं वयं हवामहे वरुणं सोमपीतये ।

1.023.04c जज्ञाना पूतदक्षसा ॥

1.023.04a mitraṁ vayaṁ havāmahe varuṇaṁ somapītaye |
1.023.04c jajñānā pūtadakṣasā ||

1.023.05a ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।

1.023.05c ता मित्रावरुणा हुवे ॥

1.023.05a ṛtena yāv ṛtāvṛdhāv ṛtasya jyotiṣas patī |
1.023.05c tā mitrāvaruṇā huve ||

1.023.06a वरु॑णः प्रावि॒ता भु॑वन्मि॒त्रो विश्वा॑भिरू॒तिभिः॑ ।

1.023.06c करतां॑ नः सु॒राध॑सः ॥

1.023.06a varu̍ṇaḥ prāvi̱tā bhu̍van mi̱tro viśvā̍bhir ū̱tibhi̍ḥ |
1.023.06c kara̍tāṁ naḥ su̱rādha̍saḥ ||

1.023.07a म॒रुत्व॑न्तं हवामह॒ इन्द्र॒मा सोम॑पीतये ।

1.023.07c स॒जूर्ग॒णेन॑ तृम्पतु ॥

1.023.07a ma̱rutva̍ntaṁ havāmaha̱ indra̱m ā soma̍pītaye |
1.023.07c sa̱jūr ga̱ṇena̍ tṛmpatu ||

1.023.08a इन्द्र॑ज्येष्ठा॒ मरु॑द्गणा॒ देवा॑सः॒ पूष॑रातयः ।

1.023.08c विश्वे॒ मम॑ श्रुता॒ हव॑म् ॥

1.023.08a indra̍jyeṣṭhā̱ maru̍dgaṇā̱ devā̍sa̱ḥ pūṣa̍rātayaḥ |
1.023.08c viśve̱ mama̍ śrutā̱ hava̍m ||

1.023.09a ह॒त वृ॒त्रं सु॑दानव॒ इन्द्रे॑ण॒ सह॑सा यु॒जा ।

1.023.09c मा नो॑ दु॒ःशंस॑ ईशत ॥

1.023.09a ha̱ta vṛ̱traṁ su̍dānava̱ indre̍ṇa̱ saha̍sā yu̱jā |
1.023.09c mā no̍ du̱ḥśaṁsa̍ īśata ||

1.023.10a विश्वा॑न्दे॒वान्ह॑वामहे म॒रुतः॒ सोम॑पीतये ।

1.023.10c उ॒ग्रा हि पृश्नि॑मातरः ॥

1.023.10a viśvā̍n de̱vān ha̍vāmahe ma̱ruta̱ḥ soma̍pītaye |
1.023.10c u̱grā hi pṛśni̍mātaraḥ ||

1.023.11a जय॑तामिव तन्य॒तुर्म॒रुता॑मेति धृष्णु॒या ।

1.023.11c यच्छुभं॑ या॒थना॑ नरः ॥

1.023.11a jaya̍tām iva tanya̱tur ma̱rutā̍m eti dhṛṣṇu̱yā |
1.023.11c yac chubha̍ṁ yā̱thanā̍ naraḥ ||

1.023.12a ह॒स्का॒राद्वि॒द्यु॒तस्पर्य॑तो जा॒ता अ॑वन्तु नः ।

1.023.12c म॒रुतो॑ मृळयन्तु नः ॥

1.023.12a ha̱skā̱rād vi̱dyuta̱s pary ato̍ jā̱tā a̍vantu naḥ |
1.023.12c ma̱ruto̍ mṛḻayantu naḥ ||

1.023.13a आ पू॑षञ्चि॒त्रब॑र्हिष॒माघृ॑णे ध॒रुणं॑ दि॒वः ।

1.023.13c आजा॑ न॒ष्टं यथा॑ प॒शुम् ॥

1.023.13a ā pū̍ṣañ ci̱traba̍rhiṣa̱m āghṛ̍ṇe dha̱ruṇa̍ṁ di̱vaḥ |
1.023.13c ājā̍ na̱ṣṭaṁ yathā̍ pa̱śum ||

1.023.14a पू॒षा राजा॑न॒माघृ॑णि॒रप॑गूळ्ह॒ं गुहा॑ हि॒तम् ।

1.023.14c अवि॑न्दच्चि॒त्रब॑र्हिषम् ॥

1.023.14a pū̱ṣā rājā̍na̱m āghṛ̍ṇi̱r apa̍gū̱ḻha̱ṁ guhā̍ hi̱tam |
1.023.14c avi̍ndac ci̱traba̍rhiṣam ||

1.023.15a उ॒तो स मह्य॒मिन्दु॑भि॒ः षड्यु॒क्ताँ अ॑नु॒सेषि॑धत् ।

1.023.15c गोभि॒र्यव॒ं न च॑र्कृषत् ॥

1.023.15a u̱to sa mahya̱m indu̍bhi̱ḥ ṣaḍ yu̱ktām̐ a̍nu̱seṣi̍dhat |
1.023.15c gobhi̱r yava̱ṁ na ca̍rkṛṣat ||

1.023.16a अ॒म्बयो॑ य॒न्त्यध्व॑भिर्जा॒मयो॑ अध्वरीय॒ताम् ।

1.023.16c पृ॒ञ्च॒तीर्मधु॑ना॒ पय॑ः ॥

1.023.16a a̱mbayo̍ ya̱nty adhva̍bhir jā̱mayo̍ adhvarīya̱tām |
1.023.16c pṛ̱ñca̱tīr madhu̍nā̱ paya̍ḥ ||

1.023.17a अ॒मूर्या उप॒ सूर्ये॒ याभि॑र्वा॒ सूर्य॑ः स॒ह ।

1.023.17c ता नो॑ हिन्वन्त्वध्व॒रम् ॥

1.023.17a a̱mūr yā upa̱ sūrye̱ yābhi̍r vā̱ sūrya̍ḥ sa̱ha |
1.023.17c tā no̍ hinvantv adhva̱ram ||

1.023.18a अ॒पो दे॒वीरुप॑ ह्वये॒ यत्र॒ गाव॒ः पिब॑न्ति नः ।

1.023.18c सिन्धु॑भ्य॒ः कर्त्व॑ं ह॒विः ॥

1.023.18a a̱po de̱vīr upa̍ hvaye̱ yatra̱ gāva̱ḥ piba̍nti naḥ |

1.023.18c  sindhubhyaḥ kartvaṁ haviḥ ||

1.023.19a  अप्स्व१न्तरमृतमप्सु भेषजमपामुत प्रशस्तये ।

1.023.19c  देवा भवत वाजिनः ॥

1.023.19a  apsv a1ntar amṛtam apsu bheṣajam apām uta praśastaye |

1.023.19c  devā bhavata vājinaḥ ||

1.023.20a  अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।

1.023.20c  अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः ॥

1.023.20a  apsu me somo abravīd antar viśvāni bheṣajā |

1.023.20c  agniṁ ca viśvaśambhuvam āpaś ca viśvabheṣajīḥ ||

1.023.21a  आपः पृणीत भेषजं वरूथं तन्वे३ मम ।

1.023.21c  ज्योक्च सूर्यं दृशे ॥

1.023.21a  āpaḥ pṛṇīta bheṣajaṁ varūthaṁ tanve3 mama |

1.023.21c  jyok ca sūryaṁ dṛśe ||

1.023.22a  इदमापः प्र वहत यत्किं च दुरितं मयि ।

1.023.22c  यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥

1.023.22a  idam āpaḥ pra vahata yat kiṁ ca duritam mayi |

1.023.22c  yad vāham abhidudroha yad vā śepa utānṛtam ||

1.023.23a  आपो अद्यान्वचारिषं रसेन समगस्महि ।

1.023.23c  पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥

1.023.23a  āpo adyānv acāriṣaṁ rasena sam agasmahi |

1.023.23c  payasvān agna ā gahi tam mā saṁ sṛja varcasā ||

1.023.24a  सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।

1.023.24c  विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ॥

1.023.24a  sam māgne varcasā sṛja sam prajayā sam āyuṣā |

1.023.24c  vidyur me asya devā indro vidyāt saha ṛṣibhiḥ ||

1.024.01a कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।

1.024.01c को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥

1.024.01a kasya nūnaṁ katamasyāmṛtānām manāmahe cāru devasya nāma |
1.024.01c ko no mahyā aditaye punar dāt pitaraṁ ca dṛśeyam mātaraṁ ca ||

1.024.02a अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।

1.024.02c स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥

1.024.02a agner vayam prathamasyāmṛtānām manāmahe cāru devasya nāma |
1.024.02c sa no mahyā aditaye punar dāt pitaraṁ ca dṛśeyam mātaraṁ ca ||

1.024.03a अभि त्वा देव सवितरीशानं वार्याणाम् ।

1.024.03c सदावन्भागमीमहे ॥

1.024.03a abhi tvā deva savitar īśānaṁ vāryāṇām |
1.024.03c sadāvan bhāgam īmahe ||

1.024.04a यश्चिद्धि त इत्था भगः शशमानः पुरा निदः ।

1.024.04c अद्वेषो हस्तयोर्दधे ॥

1.024.04a yaś cid dhi ta itthā bhagaḥ śaśamānaḥ purā nidaḥ |
1.024.04c adveṣo hastayor dadhe ||

1.024.05a भगभक्तस्य ते वयमुदशेम तवावसा ।

1.024.05c मूर्धानं राय आरभे ॥

1.024.05a bhagabhaktasya te vayam ud aśema tavāvasā |
1.024.05c mūrdhānaṁ rāya ārabhe ||

1.024.06a नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।

1.024.06c नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ॥

1.024.06a nahi te kṣatraṁ na saho na manyuṁ vayaś canāmī patayanta āpuḥ |
1.024.06c nemā āpo animiṣaṁ carantīr na ye vātasya praminanty abhvam ||

1.024.07a अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।

1.024.07c नीचीना स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥

1.024.07a abudhne rājā varuṇo vanasyordhvaṁ stūpaṁ dadate pūtadakṣaḥ |
1.024.07c nīcīnā sthur upari budhna eṣām asme antar nihitāḥ ketavaḥ syuḥ ||

1.024.08a उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।

1.024.08c अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥

1.024.08a uruṁ hi rājā varuṇaś cakāra sūryāya panthām anvetavā u |
1.024.08c apade pādā pratidhātave 'kar utāpavaktā hṛdayāvidhaś cit ||

1.024.09a शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।

1.024.09c बाधस्व दूरे निरृतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥

1.024.09a śataṁ te rājan bhiṣajaḥ sahasram urvī gabhīrā sumatiṣ ṭe astu |
1.024.09c bādhasva dūre nirṛtim parācaiḥ kṛtaṁ cid enaḥ pra mumugdhy asmat ||

1.024.10a अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः ।

1.024.10c अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥

1.024.10a amī ya ṛkṣā nihitāsa uccā naktaṁ dadṛśre kuha cid diveyuḥ |
1.024.10c adabdhāni varuṇasya vratāni vicākaśac candramā naktam eti ||

1.024.11a तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।

1.024.11c अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥

1.024.11a tat tvā yāmi brahmaṇā vandamānas tad ā śāste yajamāno havirbhiḥ |
1.024.11c aheḷamāno varuṇeha bodhy uruśaṁsa mā na āyuḥ pra moṣīḥ ||

1.024.12a तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे ।

1.024.12c शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु ॥

1.024.12a tad in naktaṁ tad divā mahyam āhus tad ayaṁ keto hṛda ā vi caṣṭe |
1.024.12c śunaḥśepo yam ahvad gṛbhītaḥ so asmān rājā varuṇo mumoktu ||

1.024.13a शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।

1.024.13c अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥

1.024.13a śunaḥśepo hy ahvad gṛbhītas triṣv ādityaṁ drupadeṣu baddhaḥ |

1.024.13c avainaṁ rājā varuṇaḥ sasṛjyād vidvām̐ adabdho vi mumoktu pāśān ||

1.024.14a अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।

1.024.14c क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥

1.024.14a ava te heḷo varuṇa namobhir ava yajñebhir īmahe havirbhiḥ |
1.024.14c kṣayann asmabhyam asura pracetā rājann enāṁsi śiśrathaḥ kṛtāni ||

1.024.15a उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

1.024.15c अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥

1.024.15a ud uttamaṁ varuṇa pāśam asmad avādhamaṁ vi madhyamaṁ śrathāya |
1.024.15c athā vayam āditya vrate tavānāgaso aditaye syāma ||

1.025.01a यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् ।

1.025.01c मिनीमसि द्यविद्यवि ॥

1.025.01a yac cid dhi te viśo yathā pra deva varuṇa vratam |
1.025.01c minīmasi dyavi-dyavi ||

1.025.02a मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।

1.025.02c मा हृणानस्य मन्यवे ॥

1.025.02a mā no vadhāya hatnave jihīḷānasya rīradhaḥ |
1.025.02c mā hṛṇānasya manyave ||

1.025.03a वि मृळीकाय ते मनो रथीरश्वं न संदितम् ।

1.025.03c गीर्भिर्वरुण सीमहि ॥

1.025.03a vi mṛḷīkāya te mano rathīr aśvaṁ na sanditam |
1.025.03c gīrbhir varuṇa sīmahi ||

1.025.04a परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।

1.025.04c वयो न वसतीरुप ॥

1.025.04a parā hi me vimanyavaḥ patanti vasyaiṣṭaye |
1.025.04c vayo na vasatīr upa ||

1.025.05a क॒दा क्ष॑त्र॒श्रियं॒ नर॒मा वरु॑णं करामहे ।

1.025.05c मृ॒ळी॒कायो॑रु॒चक्ष॑सम् ॥

1.025.05a ka̱dā kṣa̍tra̱śriya̱ṃ nara̱m ā varu̍ṇaṃ karāmahe |
1.025.05c mṛ̱ḻī̱kāyo̍ru̱cakṣa̍sam ||

1.025.06a तदित्स॑मा॒नमा॑शाते॒ वेन॑न्ता॒ न प्र यु॑च्छतः ।

1.025.06c धृ॒तव्र॑ताय दा॒शुषे॑ ॥

1.025.06a tad it sa̍mā̱nam ā̍śāte̱ vena̍ntā̱ na pra yu̍cchataḥ |
1.025.06c dhṛ̱tavra̍tāya dā̱śuṣe̍ ||

1.025.07a वेदा॒ यो वी॒नां प॒दम॒न्तरि॑क्षेण॒ पत॑ताम् ।

1.025.07c वेद॑ ना॒वः स॑मु॒द्रियः॑ ॥

1.025.07a vedā̱ yo vī̱nām pa̱dam a̱ntari̍kṣeṇa̱ pata̍tām |
1.025.07c veda̍ nā̱vaḥ sa̍mu̱driya̍ḥ ||

1.025.08a वेद॑ मा॒सो धृ॒तव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः ।

1.025.08c वेदा॒ य उ॑प॒जाय॑ते ॥

1.025.08a veda̍ mā̱so dhṛ̱tavra̍to̱ dvāda̍śa pra̱jāva̍taḥ |
1.025.08c vedā̱ ya u̍pa̱jāya̍te ||

1.025.09a वेद॒ वात॑स्य वर्त॒निमु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः ।

1.025.09c वेदा॒ ये अ॒ध्यास॑ते ॥

1.025.09a veda̱ vāta̍sya varta̱nim u̱ror ṛ̱ṣvasya̍ bṛha̱taḥ |
1.025.09c vedā̱ ye a̱dhyāsa̍te ||

1.025.10a नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॒३॒स्वा ।

1.025.10c साम्रा॑ज्याय सु॒क्रतुः॑ ॥

1.025.10a ni ṣa̍sāda dhṛ̱tavra̍to̱ varu̍ṇaḥ pa̱styā̱3̱sv ā |
1.025.10c sāmrā̍jyāya su̱kratu̍ḥ ||

1.025.11a अ॒तो विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति ।

1.025.11c कृ॒तानि॒ या च॒ कर्त्वा॑ ॥

1.025.11a ato̱ viśvā̱ny adbhu̍tā ciki̱tvām̐ a̱bhi pa̍śyati |
1.025.11c kṛ̱tāni̱ yā ca̱ kartvā̍ ||

1.025.12a स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् ।

1.025.12c प्र ण॒ आयूं॑षि तारिषत् ॥

1.025.12a sa no̍ vi̱śvāhā̍ su̱kratu̍r ādi̱tyaḥ su̱pathā̍ karat |
1.025.12c pra ṇa̱ āyū̍ṁṣi tāriṣat ||

1.025.13a बिभ्र॑द्द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् ।

1.025.13c परि॒ स्पशो॒ नि षे॑दिरे ॥

1.025.13a bibhra̍d drā̱piṁ hi̍ra̱ṇyaya̱ṁ varu̍ṇo vasta ni̱rṇija̍m |
1.025.13c pari̱ spaśo̱ ni ṣe̍dire ||

1.025.14a न यं दिप्स॑न्ति दि॒प्सवो॒ न द्रुह्वा॑णो॒ जना॑नाम् ।

1.025.14c न दे॒वम॒भिमा॑तयः ॥

1.025.14a na yaṁ dipsa̍nti di̱psavo̱ na druhvā̍ṇo̱ janā̍nām |
1.025.14c na de̱vam a̱bhimā̍tayaḥ ||

1.025.15a उ॒त यो मानु॑षे॒ष्वा यश॑श्च॒क्रे असा॒म्या ।

1.025.15c अ॒स्माक॑मु॒दरे॒ष्वा ॥

1.025.15a u̱ta yo mānu̍ṣe̱ṣv ā yaśa̍ś ca̱kre asā̱my ā |
1.025.15c a̱smāka̍m u̱dare̱ṣv ā ||

1.025.16a परा॑ मे यन्ति धी॒तयो॒ गावो॒ न गव्यू॑ती॒रनु॑ ।

1.025.16c इ॒च्छन्ती॑रुरु॒चक्ष॑सम् ॥

1.025.16a parā̍ me yanti dhī̱tayo̱ gāvo̱ na gavyū̍tī̱r anu̍ |
1.025.16c i̱cchantī̍r uru̱cakṣa̍sam ||

1.025.17a सं नु वो॑चावहै॒ पुन॒र्यतो॑ मे॒ मध्वाभृ॑तम् ।

1.025.17c होते॑व॒ क्षद॑से प्रि॒यम् ॥

1.025.17a saṁ nu vo̍cāvahai̱ puna̱r yato̍ me̱ madhv ābhṛ̍tam |

1.025.17c  hoteva kṣadase priyam ||

1.025.18a दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि ।

1.025.18c एता जुषत मे गिरः ॥

1.025.18a  darśaṁ nu viśvadarśataṁ darśaṁ ratham adhi kṣami |
1.025.18c  etā juṣata me giraḥ ||

1.025.19a इमं मे वरुण श्रुधी हवमद्या च मृळय ।

1.025.19c त्वामवस्युरा चके ॥

1.025.19a  imam me varuṇa śrudhī havam adyā ca mṛḷaya |
1.025.19c  tvām avasyur ā cake ||

1.025.20a त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि ।

1.025.20c स यामनि प्रति श्रुधि ॥

1.025.20a  tvaṁ viśvasya medhira divaś ca gmaś ca rājasi |
1.025.20c  sa yāmani prati śrudhi ||

1.025.21a उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत ।

1.025.21c अवाधमानि जीवसे ॥

1.025.21a  ud uttamam mumugdhi no vi pāśam madhyamaṁ cṛta |
1.025.21c  avādhamāni jīvase ||

1.026.01a वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते ।

1.026.01c सेमं नो अध्वरं यज ॥

1.026.01a  vasiṣvā hi miyedhya vastrāṇy ūrjām pate |
1.026.01c  semaṁ no adhvaraṁ yaja ||

1.026.02a नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः ।

1.026.02c अग्ने दिवित्मता वचः ॥

1.026.02a  ni no hotā vareṇyaḥ sadā yaviṣṭha manmabhiḥ |
1.026.02c  agne divitmatā vacaḥ ||

1.026.03a आ हि ष्मा सूनवे पितापिर्यजत्यापये ।

1.026.03c सखा सख्ये वरेण्यः ॥

1.026.03a ā hi ṣmā sūnave pitāpir yajaty āpaye |
1.026.03c sakhā sakhye vareṇyaḥ ||

1.026.04a आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा ।

1.026.04c सीदन्तु मनुषो यथा ॥

1.026.04a ā no barhī riśādaso varuṇo mitro aryamā |
1.026.04c sīdantu manuṣo yathā ||

1.026.05a पूर्व्य होतरस्य नो मन्दस्व सख्यस्य च ।

1.026.05c इमा उ षु श्रुधी गिरः ॥

1.026.05a pūrvya hotar asya no mandasva sakhyasya ca |
1.026.05c imā u ṣu śrudhī giraḥ ||

1.026.06a यच्चिद्धि शश्वता तना देवंदेवं यजामहे ।

1.026.06c त्वे इद्धूयते हविः ॥

1.026.06a yac cid dhi śaśvatā tanā devaṁ-devaṁ yajāmahe |
1.026.06c tve id dhūyate haviḥ ||

1.026.07a प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः ।

1.026.07c प्रियाः स्वग्नयो वयम् ॥

1.026.07a priyo no astu viśpatir hotā mandro vareṇyaḥ |
1.026.07c priyāḥ svagnayo vayam ||

1.026.08a स्वग्नयो हि वार्यं देवासो दधिरे च नः ।

1.026.08c स्वग्नयो मनामहे ॥

1.026.08a svagnayo hi vāryaṁ devāso dadhire ca naḥ |
1.026.08c svagnayo manāmahe ||

1.026.09a अथा न उभयेषाममृत मर्त्यानाम् ।

1.026.09c मिथः सन्तु प्रशस्तयः ॥

1.026.09a athā na ubhayeṣām amṛta martyānām |
1.026.09c mithaḥ santu praśastayaḥ ||

1.026.10a विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ।

1.026.10c चनो धाः सहसो यहो ॥

1.026.10a viśvebhir agne agnibhir imaṁ yajñam idaṁ vacaḥ |
1.026.10c cano dhāḥ sahaso yaho ||

1.027.01a अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।

1.027.01c सम्राजन्तमध्वराणाम् ॥

1.027.01a aśvaṁ na tvā vāravantaṁ vandadhyā agniṁ namobhiḥ |
1.027.01c samrājantam adhvarāṇām ||

1.027.02a स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।

1.027.02c मीढ्वाँ अस्माकं बभूयात् ॥

1.027.02a sa ghā naḥ sūnuḥ śavasā pṛthupragāmā suśevaḥ |
1.027.02c mīḍhvām̐ asmākam babhūyāt ||

1.027.03a स नो दूराच्चासाच्च नि मर्त्यादघायोः ।

1.027.03c पाहि सदमिद्विश्वायुः ॥

1.027.03a sa no dūrāc cāsāc ca ni martyād aghāyoḥ |
1.027.03c pāhi sadam id viśvāyuḥ ||

1.027.04a इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् ।

1.027.04c अग्ने देवेषु प्र वोचः ॥

1.027.04a imam ū ṣu tvam asmākaṁ saniṁ gāyatraṁ navyāṁsam |
1.027.04c agne deveṣu pra vocaḥ ||

1.027.05a आ नो भज परमेष्वा वाजेषु मध्यमेषु ।

1.027.05c शिक्षा वस्वो अन्तमस्य ॥

1.027.05a ā no bhaja parameṣv ā vājeṣu madhyameṣu |
1.027.05c śikṣā vasvo antamasya ||

1.027.06a विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ ।

1.027.06c सद्यो दाशुषे क्षरसि ॥

1.027.06a vibhaktāsi citrabhāno sindhor ūrmā upāka ā |
1.027.06c sadyo dāśuṣe kṣarasi ||

1.027.07a यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।

1.027.07c स यन्ता शश्वतीरिषः ॥

1.027.07a yam agne pṛtsu martyam avā vājeṣu yaṁ junāḥ |
1.027.07c sa yantā śaśvatīr iṣaḥ ||

1.027.08a नकिरस्य सहन्त्य पर्येता कयस्य चित् ।

1.027.08c वाजो अस्ति श्रवाय्यः ॥

1.027.08a nakir asya sahantya paryetā kayasya cit |
1.027.08c vājo asti śravāyyaḥ ||

1.027.09a स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।

1.027.09c विप्रेभिरस्तु सनिता ॥

1.027.09a sa vājaṁ viśvacarṣaṇir arvadbhir astu tarutā |
1.027.09c viprebhir astu sanitā ||

1.027.10a जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।

1.027.10c स्तोमं रुद्राय दृशीकम् ॥

1.027.10a jarābodha tad viviḍḍhi viśe-viśe yajñiyāya |
1.027.10c stomaṁ rudrāya dṛśīkam ||

1.027.11a स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।

1.027.11c धिये वाजाय हिन्वतु ॥

1.027.11a sa no mahām̐ animāno dhūmaketuḥ puruścandraḥ |
1.027.11c dhiye vājāya hinvatu ||

1.027.12a स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः ।

1.027.12c उक्थैरग्निर्बृहद्भानुः ॥

1.027.12a sa revām̐ iva viśpatir daivyaḥ ketuḥ śṛṇotu naḥ |

1.027.12c ukthair agnir bṛhadbhānuḥ ||

1.027.13a नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।

1.027.13c यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥

1.027.13a namo mahadbhyo namo arbhakebhyo namo yuvabhyo nama āśinebhyaḥ |

1.027.13c yajāma devān yadi śaknavāma mā jyāyasaḥ śaṁsam ā vṛkṣi devāḥ ||

1.028.01a यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।

1.028.01c उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥

1.028.01a yatra grāvā pṛthubudhna ūrdhvo bhavati sotave |

1.028.01c ulūkhalasutānām aved v indra jalgulaḥ ||

1.028.02a यत्र द्वाविव जघनाधिषवण्या कृता ।

1.028.02c उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥

1.028.02a yatra dvāv iva jaghanādhiṣavaṇyā kṛtā |

1.028.02c ulūkhalasutānām aved v indra jalgulaḥ ||

1.028.03a यत्र नार्यपच्यवमुपच्यवं च शिक्षते ।

1.028.03c उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥

1.028.03a yatra nāry apacyavam upacyavaṁ ca śikṣate |

1.028.03c ulūkhalasutānām aved v indra jalgulaḥ ||

1.028.04a यत्र मन्थां विबध्नते रश्मीन्यमितवा इव ।

1.028.04c उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥

1.028.04a yatra manthāṁ vibadhnate raśmīn yamitavā iva |

1.028.04c ulūkhalasutānām aved v indra jalgulaḥ ||

1.028.05a यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।

1.028.05c इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥

1.028.05a yac cid dhi tvaṁ gṛhe-gṛha ulūkhalaka yujyase |
1.028.05c iha dyumattamaṁ vada jayatām iva dundubhiḥ ||

1.028.06a उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।

1.028.06c अथो इन्द्राय पातवे सुनु सोममुलूखल ॥

1.028.06a uta sma te vanaspate vāto vi vāty agram it |
1.028.06c atho indrāya pātave sunu somam ulūkhala ||

1.028.07a आयजी वाजसातमा ता ह्यु१च्चा विजर्भृतः ।

1.028.07c हरी इवान्धांसि बप्सता ॥

1.028.07a āyajī vājasātamā tā hy u1ccā vijarbhṛtaḥ |
1.028.07c harī ivāndhāṁsi bapsatā ||

1.028.08a ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः ।

1.028.08c इन्द्राय मधुमत्सुतम् ॥

1.028.08a tā no adya vanaspatī ṛṣvāv ṛṣvebhiḥ sotṛbhiḥ |
1.028.08c indrāya madhumat sutam ||

1.028.09a उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज ।

1.028.09c नि धेहि गोरधि त्वचि ॥

1.028.09a uc chiṣṭaṁ camvor bhara somam pavitra ā sṛja |
1.028.09c ni dhehi gor adhi tvaci ||

1.029.01a यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।

1.029.01c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.01a yac cid dhi satya somapā anāśastā iva smasi |
1.029.01c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.02a शिप्रिन्वाजानां पते शचीवस्तव दंसना ।

1.029.02c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.02a śiprin vājānām pate śacīvas tava daṁsanā |
1.029.02c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.03a नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।

1.029.03c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.03a ni ṣvāpayā mithūdṛśā sastām abudhyamāne |
1.029.03c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.04a ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।

1.029.04c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.04a sasantu tyā arātayo bodhantu śūra rātayaḥ |
1.029.04c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.05a समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।

1.029.05c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.05a sam indra gardabham mṛṇa nuvantam pāpayāmuyā |
1.029.05c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.06a पताति कुण्डृणाच्या दूरं वातो वनादधि ।

1.029.06c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.06a patāti kuṇḍṛṇācyā dūraṁ vāto vanād adhi |
1.029.06c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.029.07a सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।

1.029.07c आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥

1.029.07a sarvaṁ parikrośaṁ jahi jambhayā kṛkadāśvam |
1.029.07c ā tū na indra śaṁsaya goṣv aśveṣu śubhriṣu sahasreṣu tuvīmagha ||

1.030.01a आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।

1.030.01c मंहिष्ठं सिञ्च इन्दुभिः ॥

1.030.01a ā va indraṁ kriviṁ yathā vājayantaḥ śatakratum |
1.030.01c maṁhiṣṭhaṁ siñca indubhiḥ ||

1.030.02a शतं वा यः शुचीनां सहस्रं वा समाशिराम् ।

1.030.02c एदु निम्नं न रीयते ॥

1.030.02a śatam̐ vā yaḥ śucīnām̐ sahasram̐ vā samāśirām |
1.030.02c ed u nimnam̐ na rīyate ||

1.030.03a सं यन्मदाय शुष्मिण एना ह्यस्योदरे ।

1.030.03c समुद्रो न व्यचो दधे ॥

1.030.03a sam̐ yan madāya śuṣmiṇa enā hy asyodare |
1.030.03c samudro na vyaco dadhe ||

1.030.04a अयमु ते समतसि कपोत इव गर्भधिम् ।

1.030.04c वचस्तच्चिन्न ओहसे ॥

1.030.04a ayam u te sam atasi kapota iva garbhadhim |
1.030.04c vacas tac cin na ohase ||

1.030.05a स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते ।

1.030.05c विभूतिरस्तु सूनृता ॥

1.030.05a stotram̐ rādhānām pate girvāho vīra yasya te |
1.030.05c vibhūtir astu sūnṛtā ||

1.030.06a ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो ।

1.030.06c समन्येषु ब्रवावहै ॥

1.030.06a ūrdhvas tiṣṭhā na ūtaye 'smin vāje śatakrato |
1.030.06c sam anyeṣu bravāvahai ||

1.030.07a योगेयोगे तवस्तरं वाजेवाजे हवामहे ।

1.030.07c सखाय इन्द्रमूतये ॥

1.030.07a yoge-yoge tavastaram̐ vāje-vāje havāmahe |
1.030.07c sakhāya indram ūtaye ||

1.030.08a आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ।

1.030.08c वाजेभिरुप नो हवम् ॥

1.030.08a ā gha gamad yadi śravat sahasriṇībhir ūtibhiḥ |
1.030.08c vājebhir upa no havam ||

1.030.09a अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।

1.030.09c यं ते पूर्वं पिता हुवे ॥

1.030.09a anu pratnasyaukaso huve tuvipratiṁ naram |
1.030.09c yaṁ te pūrvam pitā huve ||

1.030.10a तं त्वा वयं विश्ववारा शास्महे पुरुहूत ।

1.030.10c सखे वसो जरितृभ्यः ॥

1.030.10a taṁ tvā vayaṁ viśvavārā śāsmahe puruhūta |
1.030.10c sakhe vaso jaritṛbhyaḥ ||

1.030.11a अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् ।

1.030.11c सखे वज्रिन्सखीनाम् ॥

1.030.11a asmākaṁ śipriṇīnāṁ somapāḥ somapāvnām |
1.030.11c sakhe vajrin sakhīnām ||

1.030.12a तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु ।

1.030.12c यथा त उश्मसीष्टये ॥

1.030.12a tathā tad astu somapāḥ sakhe vajrin tathā kṛṇu |
1.030.12c yathā ta uśmasīṣṭaye ||

1.030.13a रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

1.030.13c क्षुमन्तो याभिर्मदेम ॥

1.030.13a revatīr naḥ sadhamāda indre santu tuvivājāḥ |
1.030.13c kṣumanto yābhir madema ||

1.030.14a आ घ त्वावान्त्मनाप्त स्तोतृभ्यो धृष्णवियानः ।

1.030.14c ऋणोरक्षं न चक्र्योः ॥

1.030.14a ā gha tvāvān tmanāpta stotṛbhyo dhṛṣṇav iyānaḥ |

1.030.14c  ṛ̱ṇor akṣa̱ṁ na ca̱kryo̍ḥ ||

1.030.15a  आ यद्दुवः शतक्रतवा कामं जरितॄणाम् ।

1.030.15c  ऋणोरक्षं न शचीभिः ॥

1.030.15a  ā yad duva̍ḥ śatakrata̱v ā kāma̍ṁ jaritṝ̱ṇām |
1.030.15c  ṛ̱ṇor akṣa̱ṁ na śacī̍bhiḥ ||

1.030.16a  शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।

1.030.16c  स नो हिरण्यरथं दंसनावान्स नः सनिता सनये स नोऽदात् ॥

1.030.16a  śaśva̱d indra̱ḥ popru̍thadbhir jigāya̱ nāna̍dadbhi̱ḥ śāśva̍sadbhi̱r dhanā̍ni |
1.030.16c  sa no̍ hiraṇyara̱thaṁ da̱ṁsanā̍vā̱n sa na̍ḥ sani̱tā sa̱naye̱ sa no̍ 'dāt ||

1.030.17a  आश्विनावश्वावत्येषा यातं शवीरया ।

1.030.17c  गोमद्दस्रा हिरण्यवत् ॥

1.030.17a  āśvi̍nā̱v aśvā̍vatye̱ṣā yā̍ta̱ṁ śavī̍rayā |
1.030.17c  goma̍d dasrā̱ hira̍ṇyavat ||

1.030.18a  समानयोजनो हि वां रथो दस्रावमर्त्यः ।

1.030.18c  समुद्रे अश्विनेयते ॥

1.030.18a  sa̱mā̱nayo̍jano̱ hi vā̱ṁ ratho̍ dasrā̱v ama̍rtyaḥ |
1.030.18c  sa̱mu̱dre a̍śvi̱neya̍te ||

1.030.19a  न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः ।

1.030.19c  परि द्यामन्यदीयते ॥

1.030.19a  ny a̱1ghnya̍sya mū̱rdhani̍ ca̱kraṁ ratha̍sya yemathuḥ |
1.030.19c  pari̱ dyām a̱nyad ī̍yate ||

1.030.20a  कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये ।

1.030.20c  कं नक्षसे विभावरि ॥

1.030.20a  kas ta̍ uṣaḥ kadhapriye bhu̱je marto̍ amartye |
1.030.20c  kaṁ na̍kṣase vibhāvari ||

1.030.21a  वयं हि ते अमन्मह्यान्तादा पराकात् ।

1.030.21c अश्वे न चित्रे अरुषि ॥

1.030.21a vayaṁ hi te amanmahy āntād ā parākāt |
1.030.21c aśve na citre aruṣi ||

1.030.22a त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः ।

1.030.22c अस्मे रयिं नि धारय ॥

1.030.22a tvaṁ tyebhir ā gahi vājebhir duhitar divaḥ |
1.030.22c asme rayiṁ ni dhāraya ||

1.031.01a त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।

1.031.01c तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥

1.031.01a tvam agne prathamo aṅgirā ṛṣir devo devānām abhavaḥ śivaḥ sakhā |
1.031.01c tava vrate kavayo vidmanāpaso 'jāyanta maruto bhrājadṛṣṭayaḥ ||

1.031.02a त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम् ।

1.031.02c विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥

1.031.02a tvam agne prathamo aṅgirastamaḥ kavir devānām pari bhūṣasi vratam |
1.031.02c vibhur viśvasmai bhuvanāya medhiro dvimātā śayuḥ katidhā cid āyave ||

1.031.03a त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते ।

1.031.03c अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ॥

1.031.03a tvam agne prathamo mātariśvana āvir bhava sukratūyā vivasvate |
1.031.03c arejetāṁ rodasī hotṛvūrye 'saghnor bhāram ayajo maho vaso ||

1.031.04a त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः ।

1.031.04c श्वात्रेण यत्पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः ॥

1.031.04a tvam agne manave dyām avāśayaḥ purūravase sukṛte sukṛttaraḥ |
1.031.04c śvātreṇa yat pitror mucyase pary ā tvā pūrvam anayann āparam punaḥ ||

1.031.05a त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।

1.031.05c य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ॥

1.031.05a tvam agne vṛṣabhaḥ puṣṭivardhana udyatasruce bhavasi śravāyyaḥ |
1.031.05c ya āhutim pari vedā vaṣaṭkṛtim ekāyur agre viśa āvivāsasi ||

1.031.06a त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे ।

1.031.06c यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ॥

1.031.06a tvam agne vṛjinavartaniṁ naraṁ sakman piparṣi vidathe vicarṣaṇe |
1.031.06c yaḥ śūrasātā paritakmye dhane dabhrebhiś cit samṛtā haṁsi bhūyasaḥ ||

1.031.07a त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे ।

1.031.07c यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये ॥

1.031.07a tvaṁ tam agne amṛtatva uttame martaṁ dadhāsi śravase dive-dive |
1.031.07c yas tātṛṣāṇa ubhayāya janmane mayaḥ kṛṇoṣi praya ā ca sūraye ||

1.031.08a त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।

1.031.08c ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥

1.031.08a tvaṁ no agne sanaye dhanānāṁ yaśasaṁ kāruṁ kṛṇuhi stavānaḥ |
1.031.08c ṛdhyāma karmāpasā navena devair dyāvāpṛthivī prāvataṁ naḥ ||

1.031.09a त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः ।

1.031.09c तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे ॥

1.031.09a tvaṁ no agne pitror upastha ā devo deveṣv anavadya jāgṛviḥ |
1.031.09c tanūkṛd bodhi pramatiś ca kārave tvaṁ kalyāṇa vasu viśvam opiṣe ||

1.031.10a त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम् ।

1.031.10c सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥

1.031.10a tvam agne pramatis tvam pitāsi nas tvaṁ vayaskṛt tava jāmayo vayam |
1.031.10c saṁ tvā rāyaḥ śatinaḥ saṁ sahasriṇaḥ suvīraṁ yanti vratapām adābhya ||

1.031.11a त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम् ।

1.031.11c इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥

1.031.11a tvām agne prathamam āyum āyave devā akṛṇvan nahuṣasya viśpatim |
1.031.11c iḷām akṛṇvan manuṣasya śāsanīm pitur yat putro mamakasya jāyate ||

1.031.12a त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।

1.031.12c त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥

1.031.12a tvaṁ no agne tava deva pāyubhir maghono rakṣa tanvaś ca vandya |
1.031.12c trātā tokasya tanaye gavām asy animeṣaṁ rakṣamāṇas tava vrate ||

1.031.13a त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे ।

1.031.13c यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम् ॥

1.031.13a tvam agne yajyave pāyur antaro 'niṣaṅgāya caturakṣa idhyase |
1.031.13c yo rātahavyo 'vṛkāya dhāyase kīreś cin mantram manasā vanoṣi tam ||

1.031.14a त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् ।

1.031.14c आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥

1.031.14a tvam agna uruśaṁsāya vāghate spārhaṁ yad reknaḥ paramaṁ vanoṣi tat |
1.031.14c ādhrasya cit pramatir ucyase pitā pra pākaṁ śāssi pra diśo viduṣṭaraḥ ||

1.031.15a त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।

1.031.15c स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः ॥

1.031.15a tvam agne prayatadakṣiṇaṁ naraṁ varmeva syūtam pari pāsi viśvataḥ |
1.031.15c svādukṣadmā yo vasatau syonakṛj jīvayājaṁ yajate sopamā divaḥ ||

1.031.16a इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।

1.031.16c आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम् ॥

1.031.16a imām agne śaraṇim mīmṛṣo na imam adhvānaṁ yam agāma dūrāt |
1.031.16c āpiḥ pitā pramatiḥ somyānām bhṛmir asy ṛṣikṛn martyānām ||

1.031.17a मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।

1.031.17c अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् ॥

1.031.17a manuṣvad agne aṅgirasvad aṅgiro yayātivat sadane pūrvavac chuce |
1.031.17c accha yāhy ā vahā daivyaṁ janam ā sādaya barhiṣi yakṣi ca priyam ||

1.031.18a एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा ।

1.031.18c उत प्र णेष्यभि वस्यो अस्मान्सं नः सृज सुमत्या वाजवत्या ॥

1.031.18a etenāgne brahmaṇā vāvṛdhasva śaktī vā yat te cakṛmā vidā vā |
1.031.18c uta pra ṇeṣy abhi vasyo asmān saṁ naḥ sṛja sumatyā vājavatyā ||

1.032.01a इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।

1.032.01c अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥

1.032.01a indrasya nu vīryāṇi pra vocaṁ yāni cakāra prathamāni vajrī |
1.032.01c ahann ahim anv apas tatarda pra vakṣaṇā abhinat parvatānām ||

1.032.02a अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।

1.032.02c वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥

1.032.02a ahann ahim parvate śiśriyāṇaṁ tvaṣṭāsmai vajraṁ svaryaṁ tatakṣa |
1.032.02c vāśrā iva dhenavaḥ syandamānā añjaḥ samudram ava jagmur āpaḥ ||

1.032.03a वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।

1.032.03c आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥

1.032.03a vṛṣāyamāṇo 'vṛṇīta somaṁ trikadrukeṣv apibat sutasya |
1.032.03c ā sāyakam maghavādatta vajram ahann enam prathamajām ahīnām ||

1.032.04a यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।

1.032.04c आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥

1.032.04a yad indrāhan prathamajām ahīnām ān māyinām amināḥ prota māyāḥ |
1.032.04c āt sūryaṁ janayan dyām uṣāsaṁ tādītnā śatruṁ na kilā vivitse ||

1.032.05a अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।

1.032.05c स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥

1.032.05a ahan vṛtraṁ vṛtrataraṁ vyaṁsam indro vajreṇa mahatā vadhena |
1.032.05c skandhāṁsīva kuliśenā vivṛkṇāhiḥ śayata upapṛk pṛthivyāḥ ||

1.032.06a अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।

1.032.06c नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥

1.032.06a ayoddheva durmada ā hi juhve mahāvīraṁ tuvibādham ṛjīṣam |
1.032.06c nātārīd asya samṛtiṁ vadhānāṁ saṁ rujānāḥ pipiṣa indraśatruḥ ||

1.032.07a अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।

1.032.07c वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥

1.032.07a apād ahasto apṛtanyad indram āsya vajram adhi sānau jaghāna |
1.032.07c vṛṣṇo vadhriḥ pratimānam bubhūṣan purutrā vṛtro aśayad vyastaḥ ||

1.032.08a नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।

1.032.08c याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥

1.032.08a nadaṁ na bhinnam amuyā śayānam mano ruhāṇā ati yanty āpaḥ |
1.032.08c yāś cid vṛtro mahinā paryatiṣṭhat tāsām ahiḥ patsutaḥśīr babhūva ||

1.032.09a नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार ।

1.032.09c उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥

1.032.09a nīcāvayā abhavad vṛtraputrendro asyā ava vadhar jabhāra |
1.032.09c uttarā sūr adharaḥ putra āsīd dānuḥ śaye sahavatsā na dhenuḥ ||

1.032.10a अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।

1.032.10c वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥

1.032.10a atiṣṭhantīnām aniveśanānāṁ kāṣṭhānām madhye nihitaṁ śarīram |
1.032.10c vṛtrasya niṇyaṁ vi caranty āpo dīrghaṁ tama āśayad indraśatruḥ ||

1.032.11a दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।

1.032.11c अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥

1.032.11a dāsapatnīr ahigopā atiṣṭhan niruddhā āpaḥ paṇineva gāvaḥ |
1.032.11c apām bilam apihitaṁ yad āsīd vṛtraṁ jaghanvāṁ apa tad vavāra ||

1.032.12a अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः ।

1.032.12c अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥

1.032.12a aśvyo vāro abhavas tad indra sṛke yat tvā pratyahan deva ekaḥ |
1.032.12c ajayo gā ajayaḥ śūra somam avāsṛjaḥ sartave sapta sindhūn ||

1.032.13a नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।

1.032.13c इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥

1.032.13a nāsmai vidyun na tanyatuḥ siṣedha na yām miham akirad dhrādunim ca |
1.032.13c indraś ca yad yuyudhāte ahiś cotāparībhyo maghavā vi jigye ||

1.032.14a अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।

1.032.14c नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥

1.032.14a aher yātāram kam apaśya indra hṛdi yat te jaghnuṣo bhīr agacchat |
1.032.14c nava ca yan navatim ca sravantīḥ śyeno na bhīto ataro rajāṁsi ||

1.032.15a इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।

1.032.15c सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥

1.032.15a indro yāto 'vasitasya rājā śamasya ca śṛṅgiṇo vajrabāhuḥ |
1.032.15c sed u rājā kṣayati carṣaṇīnām arān na nemiḥ pari tā babhūva ||

1.033.01a एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।

1.033.01c अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥

1.033.01a etāyāmopa gavyanta indram asmākam su pramatim vāvṛdhāti |
1.033.01c anāmṛṇaḥ kuvid ād asya rāyo gavām ketam param āvarjate naḥ ||

1.033.02a उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।

1.033.02c इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥

1.033.02a uped aham dhanadām apratītam juṣṭām na śyeno vasatim patāmi |
1.033.02c indram namasyann upamebhir arkair ya stotṛbhyo havyo asti yāman ||

1.033.03a नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।

1.033.03c चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥

1.033.03a ni sarvasena iṣudhīm̐r asakta sam aryo gā ajati yasya vaṣṭi |
1.033.03c coṣkūyamāṇa indra bhūri vāmam mā paṇir bhūr asmad adhi pravṛddha ||

1.033.04a वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र ।

1.033.04c धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥

1.033.04a vadhīr hi dasyuṁ dhaninaṁ ghanenam̐ ekaś carann upaśākebhir indra |
1.033.04c dhanor adhi viṣuṇak te vy āyann ayajvānaḥ sanakāḥ pretim īyuḥ ||

1.033.05a परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभि स्पर्धमानाः ।

1.033.05c प्र यद्दिवो हरिव स्थातरुग्र निरव्रताँ अधमो रोदस्योः ॥

1.033.05a parā cic chīrṣā vavṛjus ta indrāyajvāno yajvabhi spardhamānāḥ |
1.033.05c pra yad divo hariva sthātar ugra nir avratām̐ adhamo rodasyoḥ ||

1.033.06a अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः ।

1.033.06c वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥

1.033.06a ayuyutsann anavadyasya senām ayātayanta kṣitayo navagvāḥ |
1.033.06c vṛṣāyudho na vadhrayo niraṣṭāḥ pravadbhir indrāc citayanta āyan ||

1.033.07a त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे ।

1.033.07c अवादहो दिव आ दस्युमुच्चा प्र सुन्वत स्तुवतः शंसमावः ॥

1.033.07a tvam etān rudato jakṣataś cāyodhayo rajasa indra pāre |
1.033.07c avādaho diva ā dasyum uccā pra sunvata stuvataḥ śaṁsam āvaḥ ||

1.033.08a चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।

1.033.08c न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ॥

1.033.08a cakrāṇāsaḥ parīṇaham pṛthivyā hiraṇyena maṇinā śumbhamānāḥ |
1.033.08c na hinvānāsas titirus ta indram pari spaśo adadhāt sūryeṇa ||

1.033.09a परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम् ।

1.033.09c अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥

1.033.09a pari yad indra rodasī ubhe abubhojīr mahinā viśvataḥ sīm |
1.033.09c amanyamānām̐ abhi manyamānair nir brahmabhir adhamo dasyum indra ||

1.033.10a न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।

1.033.10c युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥

1.033.10a na ye divaḥ pṛthivyā antam āpur na māyābhir dhanadām paryabhūvan |

1.033.10c yujaṁ vajraṁ vṛṣabhaś cakra indro nir jyotiṣā tamaso gā adukṣat ||

1.033.11a अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम् ।

1.033.11c सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥

1.033.11a anu svadhām akṣarann āpo asyāvardhata madhya ā nāvyānām |
1.033.11c sadhrīcīnena manasā tam indra ojiṣṭhena hanmanāhann abhi dyūn ||

1.033.12a न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।

1.033.12c यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥

1.033.12a ny āvidhyad ilībiśasya dṛḷhā vi śṛṅgiṇam abhinac chuṣṇam indraḥ |
1.033.12c yāvat taro maghavan yāvad ojo vajreṇa śatrum avadhīḥ pṛtanyum ||

1.033.13a अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् ।

1.033.13c सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥

1.033.13a abhi sidhmo ajigād asya śatrūn vi tigmena vṛṣabheṇā puro 'bhet |
1.033.13c saṁ vajreṇāsṛjad vṛtram indraḥ pra svām matim atirac chāśadānaḥ ||

1.033.14a आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।

1.033.14c शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥

1.033.14a āvaḥ kutsam indra yasmiñ cākan prāvo yudhyantaṁ vṛṣabhaṁ daśadyum |
1.033.14c śaphacyuto reṇur nakṣata dyām uc chvaitreyo nṛṣāhyāya tasthau ||

1.033.15a आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।

1.033.15c ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥

1.033.15a āvaḥ śamaṁ vṛṣabhaṁ tugryāsu kṣetrajeṣe maghavañ chvitryaṁ gām |
1.033.15c jyok cid atra tasthivāṁso akrañ chatrūyatām adharā vedanākaḥ ||

1.034.01a त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना ।

1.034.01c युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः ॥

1.034.01a triś cin no adyā bhavataṁ navedasā vibhur vāṁ yāma uta rātir aśvinā |
1.034.01c yuvor hi yantraṁ himyeva vāsaso 'bhyāyaṁsenyā bhavatam manīṣibhiḥ ||

1.034.02a त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः ।

1.034.02c त्रय स्कम्भास स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥

1.034.02a trayaḥ pavayo madhuvāhane rathe somasya venām anu viśva id viduḥ |
1.034.02c traya skambhāsa skabhitāsa ārabhe trir naktaṁ yāthas trir v aśvinā divā ||

1.034.03a समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् ।

1.034.03c त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥

1.034.03a samāne ahan trir avadyagohanā trir adya yajñam madhunā mimikṣatam |
1.034.03c trir vājavatīr iṣo aśvinā yuvaṁ doṣā asmabhyam uṣasaś ca pinvatam ||

1.034.04a त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।

1.034.04c त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥

1.034.04a trir vartir yātaṁ trir anuvrate jane triḥ suprāvye tredheva śikṣatam |
1.034.04c trir nāndyaṁ vahatam aśvinā yuvaṁ triḥ pṛkṣo asme akṣareva pinvatam ||

1.034.05a त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।

1.034.05c त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथम् ॥

1.034.05a trir no rayiṁ vahatam aśvinā yuvaṁ trir devatātā trir utāvataṁ dhiyaḥ |
1.034.05c triḥ saubhagatvaṁ trir uta śravāṁsi nas triṣṭhaṁ vāṁ sūre duhitā ruhad ratham ||

1.034.06a त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः ।

1.034.06c ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥

1.034.06a trir no aśvinā divyāni bheṣajā triḥ pārthivāni trir u dattam adbhyaḥ |
1.034.06c omānaṁ śaṁyor mamakāya sūnave tridhātu śarma vahataṁ śubhas patī ||

1.034.07a त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् ।

1.034.07c तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥

1.034.07a trir no aśvinā yajatā dive-dive pari tridhātu pṛthivīm aśāyatam |
1.034.07c tisro nāsatyā rathyā parāvata ātmeva vātaḥ svasarāṇi gacchatam ||

1.034.08a त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा हविष्कृतम् ।

1.034.08c तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ॥

1.034.08a trir aśvinā sindhubhiḥ saptamātṛbhis traya āhāvās tredhā haviṣ kṛtam |
1.034.08c tisraḥ pṛthivīr upari pravā divo nākaṁ rakṣethe dyubhir aktubhir hitam ||

1.034.09a क्व१ त्री चक्रा त्रिवृतो रथस्य क्व१ त्रयो वन्धुरो ये सनीळाः ।

1.034.09c कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥

1.034.09a kva1 trī cakrā trivṛto rathasya kva1 trayo vandhuro ye sanīḻāḥ |
1.034.09c kadā yogo vājino rāsabhasya yena yajñaṁ nāsatyopayāthaḥ ||

1.034.10a आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः ।

1.034.10c युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥

1.034.10a ā nāsatyā gacchataṁ hūyate havir madhvaḥ pibatam madhupebhir āsabhiḥ |
1.034.10c yuvor hi pūrvaṁ savitoṣaso ratham ṛtāya citraṁ ghṛtavantam iṣyati ||

1.034.11a आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।

1.034.11c प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥

1.034.11a ā nāsatyā tribhir ekādaśair iha devebhir yātam madhupeyam aśvinā |
1.034.11c prāyus tāriṣṭaṁ nī rapāṁsi mṛkṣataṁ sedhataṁ dveṣo bhavataṁ sacābhuvā ||

1.034.12a आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।

1.034.12c शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥

1.034.12a ā no aśvinā trivṛtā rathenārvāñcaṁ rayiṁ vahataṁ suvīram |
1.034.12c śṛṇvantā vām avase johavīmi vṛdhe ca no bhavataṁ vājasātau ||

1.035.01a ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।

1.035.01c ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥

1.035.01a hvayāmy agnim prathamaṁ svastaye hvayāmi mitrāvaruṇāv ihāvase |
1.035.01c hvayāmi rātrīṁ jagato niveśanīṁ hvayāmi devaṁ savitāram ūtaye ||

1.035.02a आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।

1.035.02c हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

1.035.02a ā kṛṣṇena rajasā vartamāno niveśayann amṛtam martyaṁ ca |

1.035.02c hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan ||

1.035.03a याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।

1.035.03c आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥

1.035.03a yāti devaḥ pravatā yāty udvatā yāti śubhrābhyāṁ yajato haribhyām |

1.035.03c ā devo yāti savitā parāvato 'pa viśvā duritā bādhamānaḥ ||

1.035.04a अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।

1.035.04c आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ॥

1.035.04a abhīvṛtaṁ kṛśanair viśvarūpaṁ hiraṇyaśamyaṁ yajato bṛhantam |

1.035.04c āsthād rathaṁ savitā citrabhānuḥ kṛṣṇā rajāṁsi taviṣīṁ dadhānaḥ ||

1.035.05a वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।

1.035.05c शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥

1.035.05a vi janāñ chyāvāḥ śitipādo akhyan rathaṁ hiraṇyapraügaṁ vahantaḥ |

1.035.05c śaśvad viśaḥ savitur daivyasyopasthe viśvā bhuvanāni tasthuḥ ||

1.035.06a तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।

1.035.06c आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥

1.035.06a tisro dyāvaḥ savitur dvā upasthām̐ ekā yamasya bhuvane virāṣāṭ |

1.035.06c āṇiṁ na rathyam amṛtādhi tasthur iha bravītu ya u tac ciketat ||

1.035.07a वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।

1.035.07c क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥

1.035.07a vi suparṇo antarikṣāṇy akhyad gabhīravepā asuraḥ sunīthaḥ |

1.035.07c kve3dānīṁ sūryaḥ kaś ciketa katamāṁ dyāṁ raśmir asyā tatāna ||

1.035.08a अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।

1.035.08c हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥

1.035.08a aṣṭau vy akhyat kakubhaḥ pṛthivyās trī dhanva yojanā sapta sindhūn |

1.035.08c hiraṇyākṣaḥ savitā deva āgād dadhad ratnā dāśuṣe vāryāṇi ||

1.035.09a हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।

1.035.09c अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥

1.035.09a hiraṇyapāṇiḥ savitā vicarṣaṇir ubhe dyāvāpṛthivī antar īyate |
1.035.09c apāmīvām bādhate veti sūryam abhi kṛṣṇena rajasā dyām ṛṇoti ||

1.035.10a हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।

1.035.10c अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥

1.035.10a hiraṇyahasto asuraḥ sunīthaḥ sumṛḷīkaḥ svavām̐ yātv arvāṅ |
1.035.10c apasedhan rakṣaso yātudhānān asthād devaḥ pratidoṣaṁ gṛṇānaḥ ||

1.035.11a ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।

1.035.11c तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥

1.035.11a ye te panthāḥ savitaḥ pūrvyāso 'reṇavaḥ sukṛtā antarikṣe |
1.035.11c tebhir no adya pathibhiḥ sugebhī rakṣā ca no adhi ca brūhi deva ||

1.036.01a प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।

1.036.01c अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥

1.036.01a pra vo yahvam purūṇāṁ viśāṁ devayatīnām |
1.036.01c agniṁ sūktebhir vacobhir īmahe yaṁ sīm id anya īḷate ||

1.036.02a जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।

1.036.02c स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥

1.036.02a janāso agniṁ dadhire sahovṛdhaṁ haviṣmanto vidhema te |
1.036.02c sa tvaṁ no adya sumanā ihāvitā bhavā vājeṣu santya ||

1.036.03a प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।

1.036.03c महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥

1.036.03a pra tvā dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam |
1.036.03c mahas te sato vi caranty arcayo divi spṛśanti bhānavaḥ ||

1.036.04a देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।

1.036.04c विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥

1.036.04a devāsas tvā varuṇo mitro aryamā saṁ dūtam pratnam indhate |
1.036.04c viśvaṁ so agne jayati tvayā dhanaṁ yas te dadāśa martyaḥ ||

1.036.05a मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।

1.036.05c त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥

1.036.05a mandro hotā gṛhapatir agne dūto viśām asi |
1.036.05c tve viśvā saṅgatāni vratā dhruvā yāni devā akṛṇvata ||

1.036.06a त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।

1.036.06c स त्वं नो अद्य सुमना उतापरं यक्षि देवान्सुवीर्या ॥

1.036.06a tve id agne subhage yaviṣṭhya viśvam ā hūyate haviḥ |
1.036.06c sa tvaṁ no adya sumanā utāparaṁ yakṣi devān suvīryā ||

1.036.07a तं घेमित्था नमस्विन उप स्वराजमासते ।

1.036.07c होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥

1.036.07a taṁ ghem itthā namasvina upa svarājam āsate |
1.036.07c hotrābhir agnim manuṣaḥ sam indhate titirvāṁso ati sridhaḥ ||

1.036.08a घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे ।

1.036.08c भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥

1.036.08a ghnanto vṛtram ataran rodasī apa uru kṣayāya cakrire |
1.036.08c bhuvat kaṇve vṛṣā dyumny āhutaḥ krandad aśvo gaviṣṭiṣu ||

1.036.09a सं सीदस्व महाँ असि शोचस्व देववीतमः ।

1.036.09c वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥

1.036.09a saṁ sīdasva mahām̐ asi śocasva devavītamaḥ |
1.036.09c vi dhūmam agne aruṣam miyedhya sṛja praśasta darśatam ||

1.036.10a यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।

1.036.10c यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥

1.036.10a yaṁ tvā devāso manave dadhur iha yajiṣṭhaṁ havyavāhana |

1.036.10c yaṁ kaṇvo medhyātithir dhanaspṛtaṁ yaṁ vṛṣā yam upastutaḥ ||

1.036.11a यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।

1.036.11c तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥

1.036.11a yam agnim medhyātithiḥ kaṇva īdha ṛtād adhi |
1.036.11c tasya preṣo dīdiyus tam imā ṛcas tam agniṁ vardhayāmasi ||

1.036.12a रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् ।

1.036.12c त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥

1.036.12a rāyas pūrdhi svadhāvo 'sti hi te 'gne deveṣv āpyam |
1.036.12c tvaṁ vājasya śrutyasya rājasi sa no mṛḷa mahām̐ asi ||

1.036.13a ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।

1.036.13c ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥

1.036.13a ūrdhva ū ṣu ṇa ūtaye tiṣṭhā devo na savitā |
1.036.13c ūrdhvo vājasya sanitā yad añjibhir vāghadbhir vihvayāmahe ||

1.036.14a ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह ।

1.036.14c कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥

1.036.14a ūrdhvo naḥ pāhy aṁhaso ni ketunā viśvaṁ sam atriṇaṁ daha |
1.036.14c kṛdhī na ūrdhvāñ carathāya jīvase vidā deveṣu no duvaḥ ||

1.036.15a पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।

1.036.15c पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ॥

1.036.15a pāhi no agne rakṣasaḥ pāhi dhūrter arāvṇaḥ |
1.036.15c pāhi rīṣata uta vā jighāṁsato bṛhadbhāno yaviṣṭhya ||

1.036.16a घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।

1.036.16c यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥

1.036.16a ghaneva viṣvag vi jahy arāvṇas tapurjambha yo asmadhruk |
1.036.16c yo martyaḥ śiśīte aty aktubhir mā naḥ sa ripur īśata ||

1.036.17a अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।

1.036.17c अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ॥

1.036.17a agnir vavne suvīryam agniḥ kaṇvāya saubhagam |
1.036.17c agniḥ prāvan mitrota medhyātithim agniḥ sātā upastutam ||

1.036.18a अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।

1.036.18c अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥

1.036.18a agninā turvaśaṁ yadum parāvata ugrādevaṁ havāmahe |
1.036.18c agnir nayan navavāstvam bṛhadrathaṁ turvītim dasyave sahaḥ ||

1.036.19a नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।

1.036.19c दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥

1.036.19a ni tvām agne manur dadhe jyotir janāya śaśvate |
1.036.19c dīdetha kaṇva ṛtajāta ukṣito yaṁ namasyanti kṛṣṭayaḥ ||

1.036.20a त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।

1.036.20c रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥

1.036.20a tveṣāso agner amavanto arcayo bhīmāso na pratītaye |
1.036.20c rakṣasvinaḥ sadam id yātumāvato viśvaṁ sam atriṇaṁ daha ||

1.037.01a क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् ।

1.037.01c कण्वा अभि प्र गायत ॥

1.037.01a krīḷaṁ vaḥ śardho mārutam anarvāṇaṁ ratheśubham |
1.037.01c kaṇvā abhi pra gāyata ||

1.037.02a ये पृषतीभिरृष्टिभिः साकं वाशीभिरञ्जिभिः ।

1.037.02c अजायन्त स्वभानवः ॥

1.037.02a ye pṛṣatībhir ṛṣṭibhiḥ sākaṁ vāśībhir añjibhiḥ |
1.037.02c ajāyanta svabhānavaḥ ||

1.037.03a इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।

1.037.03c नि यामञ्चित्रमृञ्जते ॥

1.037.03a iheva śṛṇva eṣām kaśā hasteṣu yad vadān ।
1.037.03c ni yāmañ citram ṛñjate ॥

1.037.04a प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे ।
1.037.04c देवत्तं ब्रह्म गायत ॥

1.037.04a pra vaḥ śardhāya ghṛṣvaye tveṣadyumnāya śuṣmiṇe ।
1.037.04c devattam brahma gāyata ॥

1.037.05a प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम् ।
1.037.05c जम्भे रसस्य वावृधे ॥

1.037.05a pra śaṁsā goṣv aghnyaṁ krīḷaṁ yac chardho mārutam ।
1.037.05c jambhe rasasya vāvṛdhe ॥

1.037.06a को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः ।
1.037.06c यत्सीमन्तं न धूनुथ ॥

1.037.06a ko vo varṣiṣṭha ā naro divaś ca gmaś ca dhūtayaḥ ।
1.037.06c yat sīm antaṁ na dhūnutha ॥

1.037.07a नि वो यामाय मानुषो दध्र उग्राय मन्यवे ।
1.037.07c जिहीत पर्वतो गिरिः ॥

1.037.07a ni vo yāmāya mānuṣo dadhra ugrāya manyave ।
1.037.07c jihīta parvato giriḥ ॥

1.037.08a येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः ।
1.037.08c भिया यामेषु रेजते ॥

1.037.08a yeṣām ajmeṣu pṛthivī jujurvām̐ iva viśpatiḥ ।
1.037.08c bhiyā yāmeṣu rejate ॥

1.037.09a स्थिरं हि जानमेषां वयो मातुर्निरेतवे ।
1.037.09c यत्सीमनु द्विता शवः ॥

1.037.09a sthiraṁ hi jānam eṣām vayo mātur niretave ।
1.037.09c yat sīm anu dvitā śavaḥ ॥

1.037.10a उदु॒ त्ये सू॒नवो॒ गिर॒ः काष्ठा॒ अज्मे॑ष्वत्नत ।

1.037.10c वा॒श्रा अ॑भि॒ज्ञु यात॑वे ॥

1.037.10a ud u̱ tye sū̱navo̱ gira̱ḥ kāṣṭhā̱ ajme̍ṣv atnata |
1.037.10c vā̱śrā a̍bhi̱jñu yāta̍ve ||

1.037.11a त्यं चि॑द्घा दी॒र्घं पृ॒थुं मि॒हो नपा॑त॒ममृ॑ध्रम् ।

1.037.11c प्र च्या॑वयन्ति॒ याम॑भिः ॥

1.037.11a tyaṁ ci̍d ghā dī̱rgham pṛ̱thum mi̱ho napā̍ta̱m amṛ̍dhram |
1.037.11c pra cyā̍vayanti̱ yāma̍bhiḥ ||

1.037.12a मरु॑तो॒ यद्ध॑ वो॒ बल॒ं जनाँ॑ अचुच्यवीतन ।

1.037.12c गि॒रीँर॑चुच्यवीतन ॥

1.037.12a maru̍to̱ yad dha̍ vo̱ bala̱ṁ janā̍m̐ acucyavītana |
1.037.12c gi̱rīm̐r a̍cucyavītana ||

1.037.13a यद्ध॒ यान्ति॑ म॒रुत॒ः सं ह॑ ब्रुव॒तेऽध्व॒न्ना ।

1.037.13c शृ॒णोति॒ कश्चि॑देषाम् ॥

1.037.13a yad dha̱ yānti̍ ma̱ruta̱ḥ saṁ ha̍ bruva̱te 'dhva̱nn ā |
1.037.13c śṛ̱ṇoti̱ kaś ci̍d eṣām ||

1.037.14a प्र या॑त॒ शीभ॑मा॒शुभि॒ः सन्ति॒ कण्वे॑षु वो॒ दुव॑ः ।

1.037.14c तत्रो॒ षु मा॑दयाध्वै ॥

1.037.14a pra yā̍ta̱ śībha̍m ā̱śubhi̱ḥ santi̱ kaṇve̍ṣu vo̱ duva̍ḥ |
1.037.14c tatro̱ ṣu mā̍dayādhvai ||

1.037.15a अस्ति॒ हि ष्मा॒ मदा॑य व॒ः स्मसि॑ ष्मा व॒यमे॑षाम् ।

1.037.15c विश्व॑ं चि॒दायु॑र्जी॒वसे॑ ॥

1.037.15a asti̱ hi ṣmā̱ madā̍ya va̱ḥ smasi̍ ṣmā va̱yam e̍ṣām |
1.037.15c viśva̍ṁ ci̱d āyu̍r jī̱vase̍ ||

1.038.01a कद्ध॑ नू॒नं क॑धप्रियः पि॒ता पु॒त्रं न हस्त॑योः ।

1.038.01c दधिध्वे वृक्तबर्हिषः ॥

1.038.01a kad dha nūnaṁ kadhapriyaḥ pitā putraṁ na hastayoḥ |
1.038.01c dadhidhve vṛktabarhiṣaḥ ||

1.038.02a क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः ।

1.038.02c क्व वो गावो न रण्यन्ति ॥

1.038.02a kva nūnaṁ kad vo arthaṁ gantā divo na pṛthivyāḥ |
1.038.02c kva vo gāvo na raṇyanti ||

1.038.03a क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता ।

1.038.03c क्वो३ विश्वानि सौभगा ॥

1.038.03a kva vaḥ sumnā navyāṁsi marutaḥ kva suvitā |
1.038.03c kvo3 viśvāni saubhagā ||

1.038.04a यद्यूयं पृश्निमातरो मर्तासः स्यातन ।

1.038.04c स्तोता वो अमृतः स्यात् ॥

1.038.04a yad yūyam pṛśnimātaro martāsaḥ syātana |
1.038.04c stotā vo amṛtaḥ syāt ||

1.038.05a मा वो मृगो न यवसे जरिता भूदजोष्यः ।

1.038.05c पथा यमस्य गादुप ॥

1.038.05a mā vo mṛgo na yavase jaritā bhūd ajoṣyaḥ |
1.038.05c pathā yamasya gād upa ||

1.038.06a मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् ।

1.038.06c पदीष्ट तृष्णया सह ॥

1.038.06a mo ṣu ṇaḥ parā-parā nirṛtir durhaṇā vadhīt |
1.038.06c padīṣṭa tṛṣṇayā saha ||

1.038.07a सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः ।

1.038.07c मिहं कृण्वन्त्यवाताम् ॥

1.038.07a satyaṁ tveṣā amavanto dhanvañ cid ā rudriyāsaḥ |

1.038.07c miham̐ kṛṇvanty avātām ||

1.038.08a वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति ।

1.038.08c यदेषां वृष्टिरसर्जि ॥

1.038.08a vāśreva vidyun mimāti vatsaṁ na mātā siṣakti |
1.038.08c yad eṣāṁ vṛṣṭir asarji ||

1.038.09a दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन ।

1.038.09c यत्पृथिवीं व्युन्दन्ति ॥

1.038.09a divā cit tamaḥ kṛṇvanti parjanyenodavāhena |
1.038.09c yat pṛthivīṁ vyundanti ||

1.038.10a अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम् ।

1.038.10c अरेजन्त प्र मानुषाः ॥

1.038.10a adha svanān marutāṁ viśvam ā sadma pārthivam |
1.038.10c arejanta pra mānuṣāḥ ||

1.038.11a मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु ।

1.038.11c यातेमखिद्रयामभिः ॥

1.038.11a maruto vīḷupāṇibhiś citrā rodhasvatīr anu |
1.038.11c yātem akhidrayāmabhiḥ ||

1.038.12a स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् ।

1.038.12c सुसंस्कृता अभीशवः ॥

1.038.12a sthirā vaḥ santu nemayo rathā aśvāsa eṣām |
1.038.12c susaṁskṛtā abhīśavaḥ ||

1.038.13a अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम् ।

1.038.13c अग्निं मित्रं न दर्शतम् ॥

1.038.13a acchā vadā tanā girā jarāyai brahmaṇas patim |
1.038.13c agnim mitraṁ na darśatam ||

1.038.14a मिमीहि श्लोकमास्ये पर्जन्य इव ततनः ।

1.038.14c गाय गायत्रमुक्थ्यम् ॥

1.038.14a mimīhi ślokam āsye parjanya iva tatanaḥ |
1.038.14c gāya gāyatram ukthyam ||

1.038.15a वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् ।

1.038.15c अस्मे वृद्धा असन्निह ॥

1.038.15a vandasva mārutaṁ gaṇaṁ tveṣam panasyum arkiṇam |
1.038.15c asme vṛddhā asann iha ||

1.039.01a प्र यदित्था परावतः शोचिर्न मानमस्यथ ।

1.039.01c कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥

1.039.01a pra yad itthā parāvataḥ śocir na mānam asyatha |
1.039.01c kasya kratvā marutaḥ kasya varpasā kaṁ yātha kaṁ ha dhūtayaḥ ||

1.039.02a स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।

1.039.02c युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥

1.039.02a sthirā vaḥ santv āyudhā parāṇude vīḷū uta pratiṣkabhe |
1.039.02c yuṣmākam astu taviṣī panīyasī mā martyasya māyinaḥ ||

1.039.03a परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु ।

1.039.03c वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥

1.039.03a parā ha yat sthiraṁ hatha naro vartayathā guru |
1.039.03c vi yāthana vaninaḥ pṛthivyā vy āśāḥ parvatānām ||

1.039.04a नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।

1.039.04c युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥

1.039.04a nahi vaḥ śatrur vivide adhi dyavi na bhūmyāṁ riśādasaḥ |
1.039.04c yuṣmākam astu taviṣī tanā yujā rudrāso nū cid ādhṛṣe ||

1.039.05a प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन् ।

1.039.05c प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥

1.039.05a pra vepayanti parvatān vi viñcanti vanaspatīn |
1.039.05c pro ārata maruto durmadā iva devāsaḥ sarvayā viśā ||

1.039.06a उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।

1.039.06c आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥

1.039.06a upo ratheṣu pṛṣatīr ayugdhvam praṣṭir vahati rohitaḥ |
1.039.06c ā vo yāmāya pṛthivī cid aśrod abībhayanta mānuṣāḥ ||

1.039.07a आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।

1.039.07c गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥

1.039.07a ā vo makṣū tanāya kaṁ rudrā avo vṛṇīmahe |
1.039.07c gantā nūnaṁ no 'vasā yathā puretthā kaṇvāya bibhyuṣe ||

1.039.08a युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।

1.039.08c वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥

1.039.08a yuṣmeṣito maruto martyeṣita ā yo no abhva īṣate |
1.039.08c vi taṁ yuyota śavasā vy ojasā vi yuṣmākābhir ūtibhiḥ ||

1.039.09a असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।

1.039.09c असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥

1.039.09a asāmi hi prayajyavaḥ kaṇvaṁ dada pracetasaḥ |
1.039.09c asāmibhir maruta ā na ūtibhir gantā vṛṣṭiṁ na vidyutaḥ ||

1.039.10a असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।

1.039.10c ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥

1.039.10a asāmy ojo bibhṛthā sudānavo 'sāmi dhūtayaḥ śavaḥ |
1.039.10c ṛṣidviṣe marutaḥ parimanyava iṣuṁ na sṛjata dviṣam ||

1.040.01a उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।

1.040.01c उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥

1.040.01a ut tiṣṭha brahmaṇas pate devayantas tvemahe |
1.040.01c upa pra yantu marutaḥ sudānava indra prāśūr bhavā sacā ||

1.040.02a त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।

1.040.02c सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥

1.040.02a tvām id dhi sahasas putra martya upabrūte dhane hite |
1.040.02c suvīryam maruta ā svaśvyaṁ dadhīta yo va ācake ||

1.040.03a प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।

1.040.03c अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥

1.040.03a praitu brahmaṇas patiḥ pra devy etu sūnṛtā |
1.040.03c acchā vīraṁ naryam paṅktirādhasaṁ devā yajñaṁ nayantu naḥ ||

1.040.04a यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।

1.040.04c तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥

1.040.04a yo vāghate dadāti sūnaraṁ vasu sa dhatte akṣiti śravaḥ |
1.040.04c tasmā ilāṁ suvīrām ā yajāmahe supratūrtim anehasam ||

1.040.05a प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।

1.040.05c यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥

1.040.05a pra nūnam brahmaṇas patir mantraṁ vadaty ukthyam |
1.040.05c yasminn indro varuṇo mitro aryamā devā okāṁsi cakrire ||

1.040.06a तमिद्वोचेमा विदथेषु शम्भुवं मन्त्रं देवा अनेहसम् ।

1.040.06c इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥

1.040.06a tam id vocemā vidatheṣu śambhuvam mantraṁ devā anehasam |
1.040.06c imāṁ ca vācam pratiharyathā naro viśved vāmā vo aśnavat ||

1.040.07a को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।

1.040.07c प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥

1.040.07a ko devayantam aśnavaj janaṁ ko vṛktabarhiṣam |
1.040.07c pra-pra dāśvān pastyābhir asthitāntarvāvat kṣayaṁ dadhe ||

1.040.08a उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।

1.040.08c नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥

1.040.08a upa kṣatram pṛñcīta hanti rājabhir bhaye cit sukṣitiṁ dadhe |
1.040.08c nāsya vartā na tarutā mahādhane nārbhe asti vajriṇaḥ ||

1.041.01a यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।

1.041.01c नू चित्स दभ्यते जनः ॥

1.041.01a yaṁ rakṣanti pracetaso varuṇo mitro aryamā |
1.041.01c nū cit sa dabhyate janaḥ ||

1.041.02a यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः ।

1.041.02c अरिष्टः सर्व एधते ॥

1.041.02a yam bāhuteva piprati pānti martyaṁ riṣaḥ |
1.041.02c ariṣṭaḥ sarva edhate ||

1.041.03a वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् ।

1.041.03c नयन्ति दुरिता तिरः ॥

1.041.03a vi durgā vi dviṣaḥ puro ghnanti rājāna eṣām |
1.041.03c nayanti duritā tiraḥ ||

1.041.04a सुगः पन्था अनृक्षर आदित्यास ऋतं यते ।

1.041.04c नात्रावखादो अस्ति वः ॥

1.041.04a sugaḥ panthā anṛkṣara ādityāsa ṛtaṁ yate |
1.041.04c nātrāvakhādo asti vaḥ ||

1.041.05a यं यज्ञं नयथा नर आदित्या ऋजुना पथा ।

1.041.05c प्र वः स धीतये नशत् ॥

1.041.05a yaṁ yajñaṁ nayathā nara ādityā ṛjunā pathā |
1.041.05c pra vaḥ sa dhītaye naśat ||

1.041.06a स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना ।

1.041.06c अच्छा गच्छत्यस्तृतः ॥

1.041.06a sa ratnam martyo vasu viśvaṁ tokam uta tmanā |
1.041.06c acchā gacchaty astṛtaḥ ||

1.041.07a कथा राधाम सखाय स्तोमं मित्रस्यार्यम्णः ।

1.041.07c महि प्सरो वरुणस्य ॥

1.041.07a kathā rādhāma sakhāya stomam mitrasyāryamṇaḥ |
1.041.07c mahi psaro varuṇasya ||

1.041.08a मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् ।

1.041.08c सुम्नैरिद्व आ विवासे ॥

1.041.08a mā vo ghnantam mā śapantam prati voce devayantam |
1.041.08c sumnair id va ā vivāse ||

1.041.09a चतुरश्चिद्ददमानाद्बिभीयादा निधातोः ।

1.041.09c न दुरुक्ताय स्पृहयेत् ॥

1.041.09a caturaś cid dadamānād bibhīyād ā nidhātoḥ |
1.041.09c na duruktāya spṛhayet ||

1.042.01a सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् ।

1.042.01c सक्ष्वा देव प्र णस्पुरः ॥

1.042.01a sam pūṣann adhvanas tira vy aṁho vimuco napāt |
1.042.01c sakṣvā deva pra ṇas puraḥ ||

1.042.02a यो नः पूषन्नघो वृको दुःशेव आदिदेशति ।

1.042.02c अप स्म तं पथो जहि ॥

1.042.02a yo naḥ pūṣann agho vṛko duḥśeva ādideśati |
1.042.02c apa sma tam patho jahi ||

1.042.03a अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् ।

1.042.03c दूरमधि स्रुतेरज ॥

1.042.03a apa tyam paripanthinam muṣīvāṇaṁ huraścitam |
1.042.03c dūram adhi sruter aja ||

1.042.04a त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् ।

1.042.04c पदाभि तिष्ठ तपुषिम् ॥

1.042.04a tvaṁ tasya dvayāvino 'ghaśaṁsasya kasya cit |
1.042.04c padābhi tiṣṭha tapuṣim ||

1.042.05a आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे ।

1.042.05c येन पितॄनचोदयः ॥

1.042.05a ā tat te dasra mantumaḥ pūṣann avo vṛṇīmahe |
1.042.05c yena pitṝn acodayaḥ ||

1.042.06a अधा नो विश्वसौभग हिरण्यवाशीमत्तम ।

1.042.06c धनानि सुषणा कृधि ॥

1.042.06a adhā no viśvasaubhaga hiraṇyavāśīmattama |
1.042.06c dhanāni suṣaṇā kṛdhi ||

1.042.07a अति नः सश्चतो नय सुगा नः सुपथा कृणु ।

1.042.07c पूषन्निह क्रतुं विदः ॥

1.042.07a ati naḥ saścato naya sugā naḥ supathā kṛṇu |
1.042.07c pūṣann iha kratuṁ vidaḥ ||

1.042.08a अभि सूयवसं नय न नवज्वारो अध्वने ।

1.042.08c पूषन्निह क्रतुं विदः ॥

1.042.08a abhi sūyavasaṁ naya na navajvāro adhvane |
1.042.08c pūṣann iha kratuṁ vidaḥ ||

1.042.09a शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् ।

1.042.09c पूषन्निह क्रतुं विदः ॥

1.042.09a śagdhi pūrdhi pra yaṁsi ca śiśīhi prāsy udaram |
1.042.09c pūṣann iha kratuṁ vidaḥ ||

1.042.10a न पूषणं मेथामसि सूक्तैरभि गृणीमसि ।

1.042.10c वसू॑नि द॒स्ममी॑महे ॥

1.042.10a  na pū̱ṣaṇa̍m methāmasi sū̱ktair a̱bhi gṛ̍ṇīmasi |
1.042.10c  vasū̍ni da̱smam ī̍mahe ||

1.043.01a कद्रु॒द्राय॒ प्रचे॑तसे मी॒ळ्हुष्ट॑माय॒ तव्य॑से ।

1.043.01c वो॒चेम॒ शंत॑मं हृ॒दे ॥

1.043.01a  kad ru̱drāya̱ prace̍tase mīḻhuṣṭa̍māya̱ tavya̍se |
1.043.01c  vo̱cema̱ śanta̍maṁ hṛ̱de ||

1.043.02a यथा॑ नो॒ अदि॑तिः॒ कर॒त्पश्वे॒ नृभ्यो॒ यथा॒ गवे॑ ।

1.043.02c यथा॑ तो॒काय॑ रु॒द्रिय॑म् ॥

1.043.02a  yathā̍ no̱ adi̍ti̱ḥ kara̱t paśve̱ nṛbhyo̱ yathā̱ gave̍ |
1.043.02c  yathā̍ to̱kāya̍ ru̱driya̍m ||

1.043.03a यथा॑ नो मि॒त्रो वरु॑णो॒ यथा॑ रु॒द्रश्चिके॑तति ।

1.043.03c यथा॒ विश्वे॑ स॒जोष॑सः ॥

1.043.03a  yathā̍ no mi̱tro varu̍ṇo̱ yathā̍ ru̱draś cike̍tati |
1.043.03c  yathā̱ viśve̍ sa̱joṣa̍saḥ ||

1.043.04a गा॒थप॑तिं मे॒धप॑तिं रु॒द्रं जला॑षभेषजम् ।

1.043.04c तच्छं॒योः सु॒म्नमी॑महे ॥

1.043.04a  gā̱thapa̍tim me̱dhapa̍tiṁ ru̱draṁ jalā̍ṣabheṣajam |
1.043.04c  tac cha̱ṁyoḥ su̱mnam ī̍mahe ||

1.043.05a यः शु॒क्र इ॑व॒ सूर्यो॒ हिर॑ण्यमिव॒ रोच॑ते ।

1.043.05c श्रेष्ठो॑ दे॒वानां॒ वसु॑ः ॥

1.043.05a  yaḥ śu̱kra i̍va̱ sūryo̱ hira̍ṇyam iva̱ roca̍te |
1.043.05c  śreṣṭho̍ de̱vānā̱ṁ vasu̍ḥ ||

1.043.06a शं न॑ः कर॒त्यर्व॑ते सु॒गं मे॒षा॑य मे॒ष्ये॑ ।

1.043.06c नृभ्यो॒ नारि॑भ्यो॒ गवे॑ ॥

1.043.06a śaṁ naḥ karaty arvate sugam meṣāya meṣye |

1.043.06c nṛbhyo nāribhyo gave ||

1.043.07a अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम्।

1.043.07c महि श्रवस्तुविनृम्णम्॥

1.043.07a asme soma śriyam adhi ni dhehi śatasya nṛṇām |

1.043.07c mahi śravas tuvinṛmṇam ||

1.043.08a मा नः सोमपरिबाधो मारातयो जुहुरन्त।

1.043.08c आ न इन्दो वाजे भज॥

1.043.08a mā naḥ somaparibādho mārātayo juhuranta |

1.043.08c ā na indo vāje bhaja ||

1.043.09a यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य।

1.043.09c मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः॥

1.043.09a yās te prajā amṛtasya parasmin dhāmann ṛtasya |

1.043.09c mūrdhā nābhā soma vena ābhūṣantīḥ soma vedaḥ ||

1.044.01a अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य।

1.044.01c आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः॥

1.044.01a agne vivasvad uṣasaś citraṁ rādho amartya |

1.044.01c ā dāśuṣe jātavedo vahā tvam adyā devāṁ̐ uṣarbudhaḥ ||

1.044.02a जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम्।

1.044.02c सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्॥

1.044.02a juṣṭo hi dūto asi havyavāhano 'gne rathīr adhvarāṇām |

1.044.02c sajūr aśvibhyām uṣasā suvīryam asme dhehi śravo bṛhat ||

1.044.03a अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम्।

1.044.03c धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम्॥

1.044.03a adyā dūtaṁ vṛṇīmahe vasum agnim purupriyam |

1.044.03c dhūmaketum bhāṛjīkaṁ vyuṣṭiṣu yajñānām adhvaraśriyam ||

1.044.04a श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।

1.044.04c देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥

1.044.04a śreṣṭhaṁ yaviṣṭham atithiṁ svāhutaṁ juṣṭaṁ janāya dāśuṣe |
1.044.04c devām̐ acchā yātave jātavedasam agnim īḷe vyuṣṭiṣu ||

1.044.05a स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।

1.044.05c अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥

1.044.05a staviṣyāmi tvām ahaṁ viśvasyāmṛta bhojana |
1.044.05c agne trātāram amṛtam miyedhya yajiṣṭhaṁ havyavāhana ||

1.044.06a सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।

1.044.06c प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥

1.044.06a suśaṁso bodhi gṛṇate yaviṣṭhya madhujihvaḥ svāhutaḥ |
1.044.06c praskaṇvasya pratirann āyur jīvase namasyā daivyaṁ janam ||

1.044.07a होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।

1.044.07c स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥

1.044.07a hotāraṁ viśvavedasaṁ saṁ hi tvā viśa indhate |
1.044.07c sa ā vaha puruhūta pracetaso 'gne devām̐ iha dravat ||

1.044.08a सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।

1.044.08c कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥

1.044.08a savitāram uṣasam aśvinā bhagam agniṁ vyuṣṭiṣu kṣapaḥ |
1.044.08c kaṇvāsas tvā sutasomāsa indhate havyavāhaṁ svadhvara ||

1.044.09a पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।

1.044.09c उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥

1.044.09a patir hy adhvarāṇām agne dūto viśām asi |
1.044.09c uṣarbudha ā vaha somapītaye devām̐ adya svardṛśaḥ ||

1.044.10a अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।

1.044.10c असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः ॥

1.044.10a agne pūrvā anūṣaso vibhāvaso dīdetha viśvadarśataḥ |
1.044.10c asi grāmeṣv avitā purohito 'si yajñeṣu mānuṣaḥ ||

1.044.11a नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम् ।

1.044.11c मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥

1.044.11a ni tvā yajñasya sādhanam agne hotāram ṛtvijam |
1.044.11c manuṣvad deva dhīmahi pracetasaṁ jīraṁ dūtam amartyam ||

1.044.12a यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम् ।

1.044.12c सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥

1.044.12a yad devānām mitramahaḥ purohito 'ntaro yāsi dūtyam |
1.044.12c sindhor iva prasvanitāsa ūrmayo 'gner bhrājante arcayaḥ ||

1.044.13a श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।

1.044.13c आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥

1.044.13a śrudhi śrutkarṇa vahnibhir devair agne sayāvabhiḥ |
1.044.13c ā sīdantu barhiṣi mitro aryamā prātaryāvāṇo adhvaram ||

1.044.14a शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।

1.044.14c पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥

1.044.14a śṛṇvantu stomam marutaḥ sudānavo 'gnijihvā ṛtāvṛdhaḥ |
1.044.14c pibatu somaṁ varuṇo dhṛtavrato 'śvibhyām uṣasā sajūḥ ||

1.045.01a त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।

1.045.01c यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥

1.045.01a tvam agne vasūm̐r iha rudrām̐ ādityām̐ uta |
1.045.01c yajā svadhvaraṁ janam manujātaṁ ghṛtapruṣam ||

1.045.02a श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।

1.045.02c तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥

1.045.02a śruṣṭīvāno hi dāśuṣe devā agne vicetasaḥ |
1.045.02c tān rohidaśva girvaṇas trayastriṁśatam ā vaha ||

1.045.03a प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।

1.045.03c अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥

1.045.03a priyamedhavad atrivaj jātavedo virūpavat |
1.045.03c aṅgirasvan mahivrata praskaṇvasya śrudhī havam ||

1.045.04a महिकेरव ऊतये प्रियमेधा अहूषत ।

1.045.04c राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥

1.045.04a mahikerava ūtaye priyamedhā ahūṣata |
1.045.04c rājantam adhvarāṇām agniṁ śukreṇa śociṣā ||

1.045.05a घृताहवन सन्त्येमा उ षु श्रुधी गिरः ।

1.045.05c याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा ॥

1.045.05a ghṛtāhavana santyemā u ṣu śrudhī giraḥ |
1.045.05c yābhiḥ kaṇvasya sūnavo havante 'vase tvā ||

1.045.06a त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।

1.045.06c शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥

1.045.06a tvāṁ citraśravastama havante vikṣu jantavaḥ |
1.045.06c śociṣkeśam purupriyāgne havyāya voḷhave ||

1.045.07a नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् ।

1.045.07c श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥

1.045.07a ni tvā hotāram ṛtvijaṁ dadhire vasuvittamam |
1.045.07c śrutkarṇaṁ saprathastamaṁ viprā agne diviṣṭiṣu ||

1.045.08a आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।

1.045.08c बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥

1.045.08a ā tvā viprā acucyavuḥ sutasomā abhi prayaḥ |
1.045.08c bṛhad bhā bibhrato havir agne martāya dāśuṣe ||

1.045.09a प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य ।

1.045.09c इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥

1.045.09a prātaryāvṇaḥ sahaskṛta somapeyāya santya |
1.045.09c ihādya daivyaṁ janam barhir ā sādayā vaso ||

1.045.10a अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।

1.045.10c अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥

1.045.10a arvāñcaṁ daivyaṁ janam agne yakṣva sahūtibhiḥ |
1.045.10c ayaṁ somaḥ sudānavas tam pāta tiroahnyam ||

1.046.01a एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।

1.046.01c स्तुषे वामश्विना बृहत् ॥

1.046.01a eṣo uṣā apūrvyā vy ucchati priyā divaḥ |
1.046.01c stuṣe vām aśvinā bṛhat ||

1.046.02a या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।

1.046.02c धिया देवा वसुविदा ॥

1.046.02a yā dasrā sindhumātarā manotarā rayīṇām |
1.046.02c dhiyā devā vasuvidā ||

1.046.03a वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।

1.046.03c यद्वां रथो विभिष्पतात् ॥

1.046.03a vacyante vāṁ kakuhāso jūrṇāyām adhi viṣṭapi |
1.046.03c yad vāṁ ratho vibhiṣ patāt ||

1.046.04a हविषा जारो अपां पिपर्ति पपुरिर्नरा ।

1.046.04c पिता कुटस्य चर्षणिः ॥

1.046.04a haviṣā jāro apām piparti papurir narā |
1.046.04c pitā kuṭasya carṣaṇiḥ ||

1.046.05a आदारो वां मतीनां नासत्या मतवचसा ।

1.046.05c पातं सोमस्य धृष्णुया ॥

1.046.05a ā̱dā̱ro vā̍m ma̱tī̱nāṁ nāsa̍tyā matavacasā |
1.046.05c pā̱taṁ soma̍sya dhṛ̱ṣṇu̱yā ||

1.046.06a या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः ।

1.046.06c तामस्मे रासाथामिषम् ॥

1.046.06a yā na̱ḥ pīpa̍rad aśvinā̱ jyoti̍ṣmatī̱ tama̍s ti̱raḥ |
1.046.06c tām a̱sme rā̍sāthā̱m iṣa̍m ||

1.046.07a आ नो नावा मतीनां यातं पाराय गन्तवे ।

1.046.07c युञ्जाथामश्विना रथम् ॥

1.046.07a ā no̍ nā̱vā ma̍tī̱nāṁ yā̱tam pā̱rāya̱ ganta̍ve |
1.046.07c yu̱ñjāthā̍m aśvinā̱ ratha̍m ||

1.046.08a अरित्रं वां दिवस्पृथु तीर्थे सिन्धूनां रथः ।

1.046.08c धिया युयुज्र इन्दवः ॥

1.046.08a a̱ritra̍ṁ vā̱ṁ di̱vas pṛ̱thu tī̱rthe sindhū̍nā̱ṁ ratha̍ḥ |
1.046.08c dhi̱yā yu̍yujra̱ inda̍vaḥ ||

1.046.09a दिवस्कण्वास इन्दवो वसु सिन्धूनां पदे ।

1.046.09c स्वं वव्रिं कुह धित्सथः ॥

1.046.09a di̱vas ka̍ṇvāsa̱ inda̍vo̱ vasu̱ sindhū̍nām pa̱de |
1.046.09c svaṁ va̱vriṁ kuha̍ dhitsathaḥ ||

1.046.10a अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः ।

1.046.10c व्यख्यज्जिह्वयासितः ॥

1.046.10a abhū̍d u̱ bhā u̍ a̱ṁśave̱ hira̍ṇya̱m prati̱ sūrya̍ḥ |
1.046.10c vy a̍khyaj ji̱hvayāsi̍taḥ ||

1.046.11a अभूदु पारमेतवे पन्था ऋतस्य साधुया ।

1.046.11c अदर्शि वि स्रुतिर्दिवः ॥

1.046.11a abhū̍d u pā̱ram eta̍ve̱ panthā̍ ṛ̱tasya̍ sādhu̱yā |

1.046.11c adarśi vi srutir divaḥ ||

1.046.12a तत्तदिदश्विनोरवो जरिता प्रति भूषति ।

1.046.12c मदे सोमस्य पिप्रतोः ॥

1.046.12a tat-tad id aśvinor avo jaritā prati bhūṣati |
1.046.12c made somasya pipratoḥ ||

1.046.13a वावसाना विवस्वति सोमस्य पीत्या गिरा ।

1.046.13c मनुष्वच्छम्भू आ गतम् ॥

1.046.13a vāvasānā vivasvati somasya pītyā girā |
1.046.13c manuṣvac chambhū ā gatam ||

1.046.14a युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् ।

1.046.14c ऋता वनथो अक्तुभिः ॥

1.046.14a yuvor uṣā anu śriyam parijmanor upācarat |
1.046.14c ṛtā vanatho aktubhiḥ ||

1.046.15a उभा पिबतमश्विनोभा नः शर्म यच्छतम् ।

1.046.15c अविद्रियाभिरूतिभिः ॥

1.046.15a ubhā pibatam aśvinobhā naḥ śarma yacchatam |
1.046.15c avidriyābhir ūtibhiḥ ||

1.047.01a अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ।

1.047.01c तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥

1.047.01a ayaṁ vām madhumattamaḥ sutaḥ soma ṛtāvṛdhā |
1.047.01c tam aśvinā pibataṁ tiroahnyaṁ dhattaṁ ratnāni dāśuṣe ||

1.047.02a त्रिवन्धुरेण त्रिवृता सुपेशसा रथेना यातमश्विना ।

1.047.02c कण्वासो वां ब्रह्म कृण्वन्त्यध्वरे तेषां सु शृणुतं हवम् ॥

1.047.02a trivandhureṇa trivṛtā supeśasā rathenā yātam aśvinā |
1.047.02c kaṇvāso vām brahma kṛṇvanty adhvare teṣāṁ su śṛṇutaṁ havam ||

1.047.03a अश्विना मधुमत्तमं पातं सोममृतावृधा ।

1.047.03c अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतम् ॥

1.047.03a aśvinā madhumattamam pātaṁ somam ṛtāvṛdhā |
1.047.03c athādya dasrā vasu bibhratā rathe dāśvāṁsam upa gacchatam ||

1.047.04a त्रिषधस्थे बर्हिषि विश्ववेदसा मध्वा यज्ञं मिमिक्षतम् ।

1.047.04c कण्वासो वां सुतसोमा अभिद्यवो युवां हवन्ते अश्विना ॥

1.047.04a triṣadhasthe barhiṣi viśvavedasā madhvā yajñam mimikṣatam |
1.047.04c kaṇvāso vāṁ sutasomā abhidyavo yuvāṁ havante aśvinā ||

1.047.05a याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना ।

1.047.05c ताभिः ष्व१स्माँ अवतं शुभस्पती पातं सोममृतावृधा ॥

1.047.05a yābhiḥ kaṇvam abhiṣṭibhiḥ prāvataṁ yuvam aśvinā |
1.047.05c tābhiḥ ṣv a1smām̐ avataṁ śubhas patī pātaṁ somam ṛtāvṛdhā ||

1.047.06a सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना ।

1.047.06c रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम् ॥

1.047.06a sudāse dasrā vasu bibhratā rathe pṛkṣo vahatam aśvinā |
1.047.06c rayiṁ samudrād uta vā divas pary asme dhattam puruspṛham ||

1.047.07a यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे ।

1.047.07c अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः ॥

1.047.07a yan nāsatyā parāvati yad vā stho adhi turvaśe |
1.047.07c ato rathena suvṛtā na ā gataṁ sākaṁ sūryasya raśmibhiḥ ||

1.047.08a अर्वाञ्चा वां सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ।

1.047.08c इषं पृञ्चन्ता सुकृते सुदानव आ बर्हिः सीदतं नरा ॥

1.047.08a arvāñcā vāṁ saptayo 'dhvaraśriyo vahantu savaned upa |
1.047.08c iṣam pṛñcantā sukṛte sudānava ā barhiḥ sīdataṁ narā ||

1.047.09a तेन नासत्या गतं रथेन सूर्यत्वचा ।

1.047.09c येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये ॥

1.047.09a tena nāsatyā gataṁ rathena sūryatvacā |
1.047.09c yena śaśvad ūhathur dāśuṣe vasu madhvaḥ somasya pītaye ||

1.047.10a उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे ।

1.047.10c शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ॥

1.047.10a ukthebhir arvāg avase purūvasū arkaiś ca ni hvayāmahe |
1.047.10c śaśvat kaṇvānāṁ sadasi priye hi kaṁ somaṁ papathur aśvinā ||

1.048.01a सह वामेन न उषो व्युच्छा दुहितर्दिवः ।

1.048.01c सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ॥

1.048.01a saha vāmena na uṣo vy ucchā duhitar divaḥ |
1.048.01c saha dyumnena bṛhatā vibhāvari rāyā devi dāsvatī ||

1.048.02a अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवन्त वस्तवे ।

1.048.02c उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनाम् ॥

1.048.02a aśvāvatīr gomatīr viśvasuvido bhūri cyavanta vastave |
1.048.02c ud īraya prati mā sūnṛtā uṣaś coda rādho maghonām ||

1.048.03a उवासोषा उच्छाच्च नु देवी जीरा रथानाम् ।

1.048.03c ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः ॥

1.048.03a uvāsoṣā ucchāc ca nu devī jīrā rathānām |
1.048.03c ye asyā ācaraṇeṣu dadhrire samudre na śravasyavaḥ ||

1.048.04a उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः ।

1.048.04c अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥

1.048.04a uṣo ye te pra yāmeṣu yuñjate mano dānāya sūrayaḥ |
1.048.04c atrāha tat kaṇva eṣāṁ kaṇvatamo nāma gṛṇāti nṛṇām ||

1.048.05a आ घा योषेव सूनर्युषा याति प्रभुञ्जती ।

1.048.05c जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥

1.048.05a ā ghā yoṣeva sūnary uṣā yāti prabhuñjatī |
1.048.05c jarayantī vṛjanam padvad īyata ut pātayati pakṣiṇaḥ ||

1.048.06a वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती ।

1.048.06c वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥

1.048.06a vi yā sṛjati samanaṁ vy a1rthinaḥ padaṁ na vety odatī |
1.048.06c vayo nakiṣ ṭe paptivāṁsa āsate vyuṣṭau vājinīvati ||

1.048.07a एषायुक्त परावतः सूर्यस्योदयनादधि ।

1.048.07c शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान् ॥

1.048.07a eṣāyukta parāvataḥ sūryasyodayanād adhi |
1.048.07c śataṁ rathebhiḥ subhagoṣā iyaṁ vi yāty abhi mānuṣān ||

1.048.08a विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी ।

1.048.08c अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः ॥

1.048.08a viśvam asyā nānāma cakṣase jagaj jyotiṣ kṛṇoti sūnarī |
1.048.08c apa dveṣo maghonī duhitā diva uṣā ucchad apa sridhaḥ ||

1.048.09a उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः ।

1.048.09c आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु ॥

1.048.09a uṣa ā bhāhi bhānunā candreṇa duhitar divaḥ |
1.048.09c āvahantī bhūry asmabhyaṁ saubhagaṁ vyucchantī diviṣṭiṣu ||

1.048.10a विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि ।

1.048.10c सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवम् ॥

1.048.10a viśvasya hi prāṇanaṁ jīvanaṁ tve vi yad ucchasi sūnari |
1.048.10c sā no rathena bṛhatā vibhāvari śrudhi citrāmaghe havam ||

1.048.11a उषो वाजं हि वंस्व यश्चित्रो मानुषे जने ।

1.048.11c तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः ॥

1.048.11a uṣo vājaṁ hi vaṁsva yaś citro mānuṣe jane |
1.048.11c tenā vaha sukṛto adhvarām̐ upa ye tvā gṛṇanti vahnayaḥ ||

1.048.12a विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम् ।

1.048.12c सास्मासु धा गोमदश्वावदुक्थ्य१मुषो वाजं सुवीर्यम् ॥

1.048.12a viśvā̍n de̱vām̐ ā va̍ha̱ soma̍pītaye̱ 'ntari̍kṣād uṣa̱s tvam |
1.048.12c sāsmāsu̍ dhā̱ goma̱d aśvā̍vad u̱kthya1̍m uṣo̱ vāja̍ṁ su̱vīrya̍m ||

1.048.13a यस्या रुशन्तो अर्चयः प्रति भद्रा अदृक्षत ।

1.048.13c सा नो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यम् ॥

1.048.13a yasyā̱ ruśa̍nto a̱rcaya̱ḥ prati̍ bha̱drā adṛ̍kṣata |
1.048.13c sā no̍ ra̱yiṁ vi̱śvavā̍raṁ su̱peśa̍sam u̱ṣā da̍dātu̱ sugmya̍m ||

1.048.14a ये चिद्धि त्वामृषयः पूर्व ऊतये जुहूरेऽवसे महि ।

1.048.14c सा न स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥

1.048.14a ye ci̱d dhi tvām ṛṣa̍ya̱ḥ pūrva̍ ū̱taye̍ juhū̱re 'va̍se mahi |
1.048.14c sā na̱ stomā̍m̐ a̱bhi gṛ̱ṇī̍hi̱ rādha̱soṣa̍ḥ śu̱kreṇa̍ śo̱ciṣā̍ ||

1.048.15a उषो यदद्य भानुना वि द्वारावृणवो दिवः ।

1.048.15c प्र नो यच्छतादवृकं पृथु च्छर्दिः प्र देवि गोमतीरिषः ॥

1.048.15a uṣo̱ yad a̱dya bhā̱nunā̱ vi dvārā̍v ṛ̱ṇavo̍ di̱vaḥ |
1.048.15c pra no̍ yacchatād avṛ̱kam pṛ̱thu cchardiḥ pra de̍vi̱ goma̍tī̱r iṣa̍ḥ ||

1.048.16a सं नो राया बृहता विश्वपेशसा मिमिक्ष्वा समिळाभिरा ।

1.048.16c सं द्युम्नेन विश्वतुरोषो महि सं वाजैर्वाजिनीवति ॥

1.048.16a saṁ no̍ rā̱yā bṛ̍ha̱tā vi̱śvape̍śasā mimi̱kṣvā sam i̱ḻā̍bhi̱r ā |
1.048.16c saṁ dyu̱mnena̍ viśva̱turo̍ṣo mahi̱ saṁ vāja̍ir vājinīvati ||

1.049.01a उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि ।

1.049.01c वहन्त्वरुणप्सव उप त्वा सोमिनो गृहम् ॥

1.049.01a uṣo̍ bha̱drebhi̱r ā ga̍hi di̱vaś ci̍d roca̱nād adhi̍ |
1.049.01c vaha̍ntv aru̱ṇapsa̍va̱ upa̍ tvā so̱mino̍ gṛ̱ham ||

1.049.02a सुपेशसं सुखं रथं यमध्यस्था उषस्त्वम् ।

1.049.02c तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥

1.049.02a supeśasaṁ sukhaṁ rathaṁ yam adhyasthā uṣas tvam |

1.049.02c tenā suśravasaṁ janam prāvādya duhitar divaḥ ||

1.049.03a वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि ।

1.049.03c उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥

1.049.03a vayaś cit te patatriṇo dvipac catuṣpad arjuni |

1.049.03c uṣaḥ prārann ṛtūm̐r anu divo antebhyas pari ||

1.049.04a व्युच्छन्ती हि रश्मिभिर्विश्वमाभासि रोचनम् ।

1.049.04c तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥

1.049.04a vyucchantī hi raśmibhir viśvam ābhāsi rocanam |

1.049.04c tāṁ tvām uṣar vasūyavo gīrbhiḥ kaṇvā ahūṣata ||

1.050.01a उदु त्यं जातवेदसं देवं वहन्ति केतवः ।

1.050.01c दृशे विश्वाय सूर्यम् ॥

1.050.01a ud u tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ |

1.050.01c dṛśe viśvāya sūryam ||

1.050.02a अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।

1.050.02c सूराय विश्वचक्षसे ॥

1.050.02a apa tye tāyavo yathā nakṣatrā yanty aktubhiḥ |

1.050.02c sūrāya viśvacakṣase ||

1.050.03a अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु ।

1.050.03c भ्राजन्तो अग्नयो यथा ॥

1.050.03a adṛśram asya ketavo vi raśmayo janām̐ anu |

1.050.03c bhrājanto agnayo yathā ||

1.050.04a तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।

1.050.04c विश्वमा भासि रोचनम् ॥

1.050.04a taraṇir viśvadarśato jyotiṣkṛd asi sūrya |
1.050.04c viśvam ā bhāsi rocanam ||

1.050.05a प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।

1.050.05c प्रत्यङ्विश्वं स्वर्दृशे ॥

1.050.05a pratyaṅ devānāṁ viśaḥ pratyaṅṅ ud eṣi mānuṣān |
1.050.05c pratyaṅ viśvaṁ svar dṛśe ||

1.050.06a येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।

1.050.06c त्वं वरुण पश्यसि ॥

1.050.06a yenā pāvaka cakṣasā bhuraṇyantaṁ janām̐ anu |
1.050.06c tvaṁ varuṇa paśyasi ||

1.050.07a वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः ।

1.050.07c पश्यञ्जन्मानि सूर्य ॥

1.050.07a vi dyām eṣi rajas pṛthv ahā mimāno aktubhiḥ |
1.050.07c paśyañ janmāni sūrya ||

1.050.08a सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।

1.050.08c शोचिष्केशं विचक्षण ॥

1.050.08a sapta tvā harito rathe vahanti deva sūrya |
1.050.08c śociṣkeśaṁ vicakṣaṇa ||

1.050.09a अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।

1.050.09c ताभिर्याति स्वयुक्तिभिः ॥

1.050.09a ayukta sapta śundhyuvaḥ sūro rathasya naptyaḥ |
1.050.09c tābhir yāti svayuktibhiḥ ||

1.050.10a उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् ।

1.050.10c देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥

1.050.10a ud vayaṁ tamasas pari jyotiṣ paśyanta uttaram |
1.050.10c devaṁ devatrā sūryam aganma jyotir uttamam ||

1.050.11a उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।

1.050.11c हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥

1.050.11a udyann adya mitramaha ārohann uttarāṁ divam |
1.050.11c hṛdrogam mama sūrya harimāṇaṁ ca nāśaya ||

1.050.12a शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ।

1.050.12c अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॥

1.050.12a śukeṣu me harimāṇaṁ ropaṇākāsu dadhmasi |
1.050.12c atho hāridraveṣu me harimāṇaṁ ni dadhmasi ||

1.050.13a उदगादयमादित्यो विश्वेन सहसा सह ।

1.050.13c द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥

1.050.13a ud agād ayam ādityo viśvena sahasā saha |
1.050.13c dviṣantam mahyaṁ randhayan mo ahaṁ dviṣate radham ||

1.051.01a अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।

1.051.01c यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत ॥

1.051.01a abhi tyam meṣam puruhūtam ṛgmiyam indraṁ gīrbhir madatā vasvo arṇavam |
1.051.01c yasya dyāvo na vicaranti mānuṣā bhuje maṁhiṣṭham abhi vipram arcata ||

1.051.02a अभीमवन्वन्स्वभिष्टिमूतयोऽन्तरिक्षप्रां तविषीभिरावृतम् ।

1.051.02c इन्द्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत् ॥

1.051.02a abhīm avanvan svabhiṣṭim ūtayo 'ntarikṣaprāṁ taviṣībhir āvṛtam |
1.051.02c indraṁ dakṣāsa ṛbhavo madacyutaṁ śatakratuṁ javanī sūnṛtāruhat ||

1.051.03a त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित् ।

1.051.03c ससेन चिद्विमदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन् ॥

1.051.03a tvaṁ gotram aṅgirobhyo 'vṛṇor apotātraye śatadureṣu gātuvit |
1.051.03c sasena cid vimadāyāvaho vasv ājāv adriṁ vāvasānasya nartayan ||

1.051.04a त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु ।

1.051.04c वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे ॥

1.051.04a tvam apām apidhānāvṛṇor apādhārayaḥ parvate dānumad vasu |
1.051.04c vṛtraṁ yad indra śavasāvadhīr ahim ād it sūryaṁ divy ārohayo dṛśe ||

1.051.05a त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्तावजुह्वत ।

1.051.05c त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥

1.051.05a tvam māyābhir apa māyino 'dhamaḥ svadhābhir ye adhi śuptāv ajuhvata |
1.051.05c tvam pipror nṛmaṇaḥ prārujaḥ puraḥ pra ṛjiśvānaṁ dasyuhatyeṣv āvitha ||

1.051.06a त्वं कुत्सं शुष्णहत्येष्वाविथारन्धयोऽतिथिग्वाय शम्बरम् ।

1.051.06c महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे ॥

1.051.06a tvaṁ kutsaṁ śuṣṇahatyeṣv āvithārandhayo 'tithigvāya śambaram |
1.051.06c mahāntaṁ cid arbudaṁ ni kramīḥ padā sanād eva dasyuhatyāya jajñiṣe ||

1.051.07a त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।

1.051.07c तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या ॥

1.051.07a tve viśvā taviṣī sadhryag ghitā tava rādhaḥ somapīthāya harṣate |
1.051.07c tava vajraś cikite bāhvor hito vṛścā śatror ava viśvāni vṛṣṇyā ||

1.051.08a वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान् ।

1.051.08c शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन ॥

1.051.08a vi jānīhy āryān ye ca dasyavo barhiṣmate randhayā śāsad avratān |
1.051.08c śākī bhava yajamānasya coditā viśvet tā te sadhamādeṣu cākana ||

1.051.09a अनुव्रताय रन्धयन्नपव्रतानाभूभिरिन्द्रः श्नथयन्ननाभुवः ।

1.051.09c वृद्धस्य चिद्वर्धतो द्यामिनक्षत स्तवानो वम्रो वि जघान संदिहः ॥

1.051.09a anuvratāya randhayann apavratān ābhūbhir indraḥ śnathayann anābhuvaḥ |
1.051.09c vṛddhasya cid vardhato dyām inakṣata stavāno vamro vi jaghāna sandihaḥ ||

1.051.10a तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः ।

1.051.10c आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः ॥

1.051.10a takṣad yat ta uśanā sahasā saho vi rodasī majmanā bādhate śavaḥ |

1.051.10c ā tvā vātasya nṛmaṇo manoyuja ā pūryamāṇam avahann abhi śravaḥ ||

1.051.11a मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति ।

1.051.11c उग्रो ययिं निरपः स्रोतसासृजद्वि शुष्णस्य दृंहिता ऐरयत्पुरः ॥

1.051.11a mandiṣṭa yad uśane kāvye sacām̐ indro vaṅkū vaṅkutarādhi tiṣṭhati |
1.051.11c ugro yayiṁ nir apaḥ srotasāsṛjad vi śuṣṇasya dṛṁhitā airayat puraḥ ||

1.051.12a आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे ।

1.051.12c इन्द्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥

1.051.12a ā smā rathaṁ vṛṣapāṇeṣu tiṣṭhasi śāryātasya prabhṛtā yeṣu mandase |
1.051.12c indra yathā sutasomeṣu cākano 'narvāṇaṁ ślokam ā rohase divi ||

1.051.13a अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते ।

1.051.13c मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या ॥

1.051.13a adadā arbhām mahate vacasyave kakṣīvate vṛcayām indra sunvate |
1.051.13c menābhavo vṛṣaṇaśvasya sukrato viśvet tā te savaneṣu pravācyā ||

1.051.14a इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः ।

1.051.14c अश्वयुर्गव्यू रथयुर्वसूयुरिन्द्र इद्रायः क्षयति प्रयन्ता ॥

1.051.14a indro aśrāyi sudhyo nireke pajreṣu stomo duryo na yūpaḥ |
1.051.14c aśvayur gavyū rathayur vasūyur indra id rāyaḥ kṣayati prayantā ||

1.051.15a इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।

1.051.15c अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्स्याम ॥

1.051.15a idaṁ namo vṛṣabhāya svarāje satyaśuṣmāya tavase 'vāci |
1.051.15c asminn indra vṛjane sarvavīrāḥ smat sūribhis tava śarman syāma ||

1.052.01a त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते ।

1.052.01c अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥

1.052.01a tyaṁ su meṣam mahayā svarvidaṁ śataṁ yasya subhvaḥ sākam īrate |
1.052.01c atyaṁ na vājaṁ havanasyadaṁ ratham endraṁ vavṛtyām avase suvṛktibhiḥ ||

1.052.02a स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे ।

1.052.02c इन्द्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अन्धसा ॥

1.052.02a  sa parva̍to̱ na dha̱ruṇe̱ṣv acyu̍taḥ sa̱hasra̍mūti̱s tavi̍ṣīṣu vāvṛdhe |
1.052.02c  indro̱ yad vṛ̱tram ava̍dhīn nadī̱vṛ̍tam u̱bjann arṇā̍ṁsi̱ jarhṛ̍ṣāṇo̱ andha̍sā ||

1.052.03a स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः ।

1.052.03c इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः ॥

1.052.03a  sa hi dva̱ro dva̱riṣu̍ va̱vra ūdha̍ni ca̱ndrabu̍dhno̱ madavṛ̍ddho manī̱ṣibhi̍ḥ |
1.052.03c  indra̱ṁ tam a̍hve svapa̱syayā̍ dhi̱yā maṁhi̍ṣṭharāti̱ṁ sa hi papri̱r andha̍saḥ ||

1.052.04a आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ः स्वा अभिष्टयः ।

1.052.04c तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः ॥

1.052.04a  ā yam pṛ̱ṇanti̍ di̱vi sadma̍barhiṣaḥ samu̱draṁ na su̱bhva1̱ḥ svā a̱bhiṣṭa̍yaḥ |
1.052.04c  taṁ vṛ̍tra̱hatye̱ anu̍ tasthur ū̱taya̱ḥ śuṣmā̱ indra̍m avā̱tā ahru̍tapsavaḥ ||

1.052.05a अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।

1.052.05c इन्द्रो यद्वज्री धृषमाणो अन्धसा भिनद्वलस्य परिधीँरिव त्रितः ॥

1.052.05a  a̱bhi svavṛ̍ṣṭi̱m made̍ asya̱ yudhya̍to ra̱ghvīr i̍va prava̱ṇe sa̍srur ū̱taya̍ḥ |
1.052.05c  indro̱ yad va̱jrī dhṛ̱ṣamā̍ṇo̱ andha̍sā bhi̱nad va̱lasya̍ pari̱dhīm̐r i̍va tri̱taḥ ||

1.052.06a परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।

1.052.06c वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥

1.052.06a  parī̍ṁ ghṛ̱ṇā ca̍rati titvi̱ṣe śavo̱ 'po vṛ̱tvī raja̍so bu̱dhnam āśa̍yat |
1.052.06c  vṛ̱trasya̱ yat prava̍ṇe du̱rgṛbhiśvano nija̱ghantha̱ hanvo̍r indra tanya̱tum ||

1.052.07a ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।

1.052.07c त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम् ॥

1.052.07a  hra̱daṁ na hi tvā̍ nyṛ̱ṣanty ū̱rmayo̱ brahmā̍ṇīndra̱ tava̱ yāni̱ vardha̍nā |
1.052.07c  tvaṣṭā̍ cit te̱ yujya̍ṁ vāvṛdhe̱ śava̍s ta̱takṣa̱ vajra̍m a̱bhibhū̍tyojasam ||

1.052.08a जघन्वाँ उ हरिभिः सम्भृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः ।

1.052.08c अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे ॥

1.052.08a jaghanvām̐ u haribhiḥ sambhṛtakratav indra vṛtram manuṣe gātuyann apaḥ |
1.052.08c ayacchathā bāhvor vajram āyasam adhārayo divy ā sūryaṁ dṛśe ||

1.052.09a बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः ।

1.052.09c यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥

1.052.09a bṛhat svaścandram amavad yad ukthya1m akṛṇvata bhiyasā rohaṇaṁ divaḥ |
1.052.09c yan mānuṣapradhanā indram ūtayaḥ svar nṛṣāco maruto 'madann anu ||

1.052.10a द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते ।

1.052.10c वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥

1.052.10a dyauś cid asyāmavām̐ aheḥ svanād ayoyavīd bhiyasā vajra indra te |
1.052.10c vṛtrasya yad badbadhānasya rodasī made sutasya śavasābhinac chiraḥ ||

1.052.11a यदिन्न्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।

1.052.11c अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥

1.052.11a yad in nv indra pṛthivī daśabhujir ahāni viśvā tatananta kṛṣṭayaḥ |
1.052.11c atrāha te maghavan viśrutaṁ saho dyām anu śavasā barhaṇā bhuvat ||

1.052.12a त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।

1.052.12c चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम् ॥

1.052.12a tvam asya pāre rajaso vyomanaḥ svabhūtyojā avase dhṛṣanmanaḥ |
1.052.12c cakṛṣe bhūmim pratimānam ojaso 'paḥ svaḥ paribhūr eṣy ā divam ||

1.052.13a त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।

1.052.13c विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥

1.052.13a tvam bhuvaḥ pratimānam pṛthivyā ṛṣvavīrasya bṛhataḥ patir bhūḥ |
1.052.13c viśvam āprā antarikṣam mahitvā satyam addhā nakir anyas tvāvān ||

1.052.14a न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः ।

1.052.14c नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥

1.052.14a na yasya dyāvāpṛthivī anu vyaco na sindhavo rajaso antam ānaśuḥ |

1.052.14c nota svavṛṣṭim made asya yudhyata eko anyac cakṛṣe viśvam ānuṣak ||

1.052.15a आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा ।

1.052.15c वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥

1.052.15a ārcann atra marutaḥ sasminn ājau viśve devāso amadann anu tvā |
1.052.15c vṛtrasya yad bhṛṣṭimatā vadhena ni tvam indra praty ānaṁ jaghantha ||

1.053.01a न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।

1.053.01c नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥

1.053.01a ny ū3 ṣu vācam pra mahe bharāmahe gira indrāya sadane vivasvataḥ |
1.053.01c nū cid dhi ratnaṁ sasatām ivāvidan na duṣṭutir draviṇodeṣu śasyate ||

1.053.02a दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।

1.053.02c शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥

1.053.02a duro aśvasya dura indra gor asi duro yavasya vasuna inas patiḥ |
1.053.02c śikṣānaraḥ pradivo akāmakarśanaḥ sakhā sakhibhyas tam idaṁ gṛṇīmasi ||

1.053.03a शचीव इन्द्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु ।

1.053.03c अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥

1.053.03a śacīva indra purukṛd dyumattama taved idam abhitaś cekite vasu |
1.053.03c ataḥ saṅgṛbhyābhibhūta ā bhara mā tvāyato jarituḥ kāmam ūnayīḥ ||

1.053.04a एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।

1.053.04c इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥

1.053.04a ebhir dyubhiḥ sumanā ebhir indubhir nirundhāno amatiṁ gobhir aśvinā |
1.053.04c indreṇa dasyuṁ darayanta indubhir yutadveṣasaḥ sam iṣā rabhemahi ||

1.053.05a समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।

1.053.05c सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥

1.053.05a sam indra rāyā sam iṣā rabhemahi saṁ vājebhiḥ puruścandrair abhidyubhiḥ |
1.053.05c saṁ devyā pramatyā vīraśuṣmayā goagrayāśvāvatyā rabhemahi ||

1.053.06a ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।

1.053.06c यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥

1.053.06a te tvā madā amadan tāni vṛṣṇyā te somāso vṛtrahatyeṣu satpate |
1.053.06c yat kārave daśa vṛtrāṇy aprati barhiṣmate ni sahasrāṇi barhayaḥ ||

1.053.07a युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।

1.053.07c नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥

1.053.07a yudhā yudham upa ghed eṣi dhṛṣṇuyā purā puraṁ sam idaṁ haṁsy ojasā |
1.053.07c namyā yad indra sakhyā parāvati nibarhayo namuciṁ nāma māyinam ||

1.053.08a त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।

1.053.08c त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥

1.053.08a tvaṁ karañjam uta parṇayaṁ vadhīs tejiṣṭhayātithigvasya vartanī |
1.053.08c tvaṁ śatā vaṅgṛdasyābhinat puro 'nānudaḥ pariṣūtā ṛjiśvanā ||

1.053.09a त्वमेताञ्जनराज्ञो द्विर्दशाबन्धुना सुश्रवसोपजग्मुषः ।

1.053.09c षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥

1.053.09a tvam etāñ janarājño dvir daśābandhunā suśravasopajagmuṣaḥ |
1.053.09c ṣaṣṭiṁ sahasrā navatiṁ nava śruto ni cakreṇa rathyā duṣpadāvṛṇak ||

1.053.10a त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम् ।

1.053.10c त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥

1.053.10a tvam āvitha suśravasaṁ tavotibhis tava trāmabhir indra tūrvayāṇam |
1.053.10c tvam asmai kutsam atithigvam āyum mahe rājñe yūne arandhanāyaḥ ||

1.053.11a य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।

1.053.11c त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥

1.053.11a ya udṛcīndra devagopāḥ sakhāyas te śivatamā asāma |
1.053.11c tvāṁ stoṣāma tvayā suvīrā drāghīya āyuḥ prataraṁ dadhānāḥ ||

1.054.01a मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे ।

1.054.01c अक्रन्दयो नद्यो३ रोरुवद्वना कथा न क्षोणीर्भियसा समारत ॥

1.054.01a mā no asmin maghavan pṛtsv aṁhasi nahi te antaḥ śavasaḥ parīṇaśe |
1.054.01c akrandayo nadyo3 roruvad vanā kathā na kṣoṇīr bhiyasā sam ārata ||

1.054.02a अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि ।

1.054.02c यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते ॥

1.054.02a arcā śakrāya śākine śacīvate śṛṇvantam indram mahayann abhi ṣṭuhi |
1.054.02c yo dhṛṣṇunā śavasā rodasī ubhe vṛṣā vṛṣatvā vṛṣabho nyṛñjate ||

1.054.03a अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः ।

1.054.03c बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥

1.054.03a arcā dive bṛhate śūṣyaṁ1 vacaḥ svakṣatraṁ yasya dhṛṣato dhṛṣan manaḥ |
1.054.03c bṛhacchravā asuro barhaṇā kṛtaḥ puro haribhyāṁ vṛṣabho ratho hi ṣaḥ ||

1.054.04a त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शम्बरं भिनत् ।

1.054.04c यन्मायिनो व्रन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृतन्यसि ॥

1.054.04a tvaṁ divo bṛhataḥ sānu kopayo 'va tmanā dhṛṣatā śambaram bhinat |
1.054.04c yan māyino vrandino mandinā dhṛṣac chitāṁ gabhastim aśanim pṛtanyasi ||

1.054.05a नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना ।

1.054.05c प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ॥

1.054.05a ni yad vṛṇakṣi śvasanasya mūrdhani śuṣṇasya cid vrandino roruvad vanā |
1.054.05c prācīnena manasā barhaṇāvatā yad adyā cit kṛṇavaḥ kas tvā pari ||

1.054.06a त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।

1.054.06c त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव ॥

1.054.06a tvam āvitha naryaṁ turvaśaṁ yaduṁ tvaṁ turvītiṁ vayyaṁ śatakrato |
1.054.06c tvaṁ ratham etaśaṁ kṛtvye dhane tvam puro navatiṁ dambhayo nava ||

1.054.07a स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।

1.054.07c उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥

1.054.07a sa ghā rājā satpatiḥ śūśuvaj jano rātahavyaḥ prati yaḥ śāsam invati |

1.054.07c ukthā vā yo abhigṛṇāti rādhasā dānur asmā uparā pinvate divaḥ ||

1.054.08a असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे ।

1.054.08c ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥

1.054.08a asamaṁ kṣatram asamā manīṣā pra somapā apasā santu neme |
1.054.08c ye ta indra daduṣo vardhayanti mahi kṣatraṁ sthaviraṁ vṛṣṇyaṁ ca ||

1.054.09a तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः ।

1.054.09c व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥

1.054.09a tubhyed ete bahulā adridugdhāś camūṣadaś camasā indrapānāḥ |
1.054.09c vy aśnuhi tarpayā kāmam eṣām athā mano vasudeyāya kṛṣva ||

1.054.10a अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।

1.054.10c अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥

1.054.10a apām atiṣṭhad dharuṇahvaraṁ tamo 'ntar vṛtrasya jaṭhareṣu parvataḥ |
1.054.10c abhīm indro nadyo vavriṇā hitā viśvā anuṣṭhāḥ pravaṇeṣu jighnate ||

1.054.11a स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।

1.054.11c रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः ॥

1.054.11a sa śevṛdham adhi dhā dyumnam asme mahi kṣatraṁ janāṣāḻ indra tavyam |
1.054.11c rakṣā ca no maghonaḥ pāhi sūrīn rāye ca naḥ svapatyā iṣe dhāḥ ||

1.055.01a दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।

1.055.01c भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥

1.055.01a divaś cid asya varimā vi papratha indraṁ na mahnā pṛthivī cana prati |
1.055.01c bhīmas tuviṣmāñ carṣaṇibhya ātapaḥ śiśīte vajraṁ tejase na vaṁsagaḥ ||

1.055.02a सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।

1.055.02c इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥

1.055.02a so arṇavo na nadyaḥ samudriyaḥ prati gṛbhṇāti viśritā varīmabhiḥ |
1.055.02c indraḥ somasya pītaye vṛṣāyate sanāt sa yudhma ojasā panasyate ||

1.055.03a त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।

1.055.03c प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥

1.055.03a tvaṁ tam indra parvataṁ na bhojase maho nṛmṇasya dharmaṇām irajyasi |
1.055.03c pra vīryeṇa devatāti cekite viśvasmā ugraḥ karmaṇe purohitaḥ ||

1.055.04a स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।

1.055.04c वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥

1.055.04a sa id vane namasyubhir vacasyate cāru janeṣu prabruvāṇa indriyam |
1.055.04c vṛṣā chandur bhavati haryato vṛṣā kṣemeṇa dhenām maghavā yad invati ||

1.055.05a स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।

1.055.05c अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम् ॥

1.055.05a sa in mahāni samithāni majmanā kṛṇoti yudhma ojasā janebhyaḥ |
1.055.05c adhā cana śrad dadhati tviṣīmata indrāya vajraṁ nighanighnate vadham ||

1.055.06a स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ।

1.055.06c ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत् ॥

1.055.06a sa hi śravasyuḥ sadanāni kṛtrimā kṣmayā vṛdhāna ojasā vināśayan |
1.055.06c jyotīṁṣi kṛṇvann avṛkāṇi yajyave 'va sukratuḥ sartavā apaḥ sṛjat ||

1.055.07a दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।

1.055.07c यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ॥

1.055.07a dānāya manaḥ somapāvann astu te 'rvāñcā harī vandanaśrud ā kṛdhi |
1.055.07c yamiṣṭhāsaḥ sārathayo ya indra te na tvā ketā ā dabhnuvanti bhūrṇayaḥ ||

1.055.08a अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वै श्रुतो दधे ।

1.055.08c आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥

1.055.08a aprakṣitaṁ vasu bibharṣi hastayor aṣāḷhaṁ sahas tanvai śruto dadhe |
1.055.08c āvṛtāso 'vatāso na kartṛbhis tanūṣu te kratava indra bhūrayaḥ ||

1.056.01a एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।

1.056.01c दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥

1.056.01a eṣa pra pūrvīr ava tasya camriṣo 'tyo na yoṣām ud ayaṃsta bhurvaṇiḥ |
1.056.01c dakṣam mahe pāyayate hiraṇyayaṃ ratham āvṛtyā hariyogam ṛbhvasam ||

1.056.02a तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।

1.056.02c पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥

1.056.02a taṃ gūrtayo nemanniṣaḥ parīṇasaḥ samudraṃ na sañcaraṇe saniṣyavaḥ |
1.056.02c patiṃ dakṣasya vidathasya nū saho giriṃ na venā adhi roha tejasā ||

1.056.03a स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः ।

1.056.03c येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥

1.056.03a sa turvaṇir mahām̐ areṇu pauṃsye girer bhṛṣṭir na bhrājate tujā śavaḥ |
1.056.03c yena śuṣṇam māyinam āyaso made dudhra ābhūṣu rāmayan ni dāmani ||

1.056.04a देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।

1.056.04c यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥

1.056.04a devī yadi taviṣī tvāvṛdhotaya indraṃ siṣakty uṣasaṃ na sūryaḥ |
1.056.04c yo dhṛṣṇunā śavasā bādhate tama iyarti reṇum bṛhad arhariṣvaṇiḥ ||

1.056.05a वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा ।

1.056.05c स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥

1.056.05a vi yat tiro dharuṇam acyutaṃ rajo 'tiṣṭhipo diva ātāsu barhaṇā |
1.056.05c svarmīḻhe yan mada indra harṣyāhan vṛtraṃ nir apām aubjo arṇavam ||

1.056.06a त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।

1.056.06c त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥

1.056.06a tvaṃ divo dharuṇaṃ dhiṣa ojasā pṛthivyā indra sadaneṣu māhinaḥ |
1.056.06c tvaṃ sutasya made ariṇā apo vi vṛtrasya samayā pāṣyārujaḥ ||

1.057.01a प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।

1.057.01c अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥

1.057.01a pra maṁhiṣṭhāya bṛhate bṛhadraye satyaśuṣmāya tavase matim bhare |
1.057.01c apām iva pravaṇe yasya durdharaṁ rādho viśvāyu śavase apāvṛtam ||

1.057.02a अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।

1.057.02c यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥

1.057.02a adha te viśvam anu hāsad iṣṭaya āpo nimneva savanā haviṣmataḥ |
1.057.02c yat parvate na samaśīta haryata indrasya vajraḥ śnathitā hiraṇyayaḥ ||

1.057.03a अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।

1.057.03c यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥

1.057.03a asmai bhīmāya namasā sam adhvara uṣo na śubhra ā bharā panīyase |
1.057.03c yasya dhāma śravase nāmendriyaṁ jyotir akāri harito nāyase ||

1.057.04a इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।

1.057.04c नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥

1.057.04a ime ta indra te vayam puruṣṭuta ye tvārabhya carāmasi prabhūvaso |
1.057.04c nahi tvad anyo girvaṇo giraḥ saghat kṣoṇīr iva prati no harya tad vacaḥ ||

1.057.05a भूरि त इन्द्र वीर्यं१ तव स्मस्यस्य स्तोतुर्मघवन्काममा पृण ।

1.057.05c अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥

1.057.05a bhūri ta indra vīryaṁ1 tava smasy asya stotur maghavan kāmam ā pṛṇa |
1.057.05c anu te dyaur bṛhatī vīryam mama iyaṁ ca te pṛthivī nema ojase ||

1.057.06a त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।

1.057.06c अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥

1.057.06a tvaṁ tam indra parvatam mahām uruṁ vajreṇa vajrin parvaśaś cakartitha |
1.057.06c avāsṛjo nivṛtāḥ sartavā apaḥ satrā viśvaṁ dadhiṣe kevalaṁ sahaḥ ||

1.058.01a नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः ।

1.058.01c वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥

1.058.01a nū cit sahojā amṛto ni tundate hotā yad dūto abhavad vivasvataḥ |
1.058.01c vi sādhiṣṭhebhiḥ pathibhī rajo mama ā devatātā haviṣā vivāsati ||

1.058.02a आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।

1.058.02c अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥

1.058.02a ā svam adma yuvamāno ajaras tṛṣv aviṣyann ataseṣu tiṣṭhati |
1.058.02c atyo na pṛṣṭham pruṣitasya rocate divo na sānu stanayann acikradat ||

1.058.03a क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।

1.058.03c रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥

1.058.03a krāṇā rudrebhir vasubhiḥ purohito hotā niṣatto rayiṣāḷ amartyaḥ |
1.058.03c ratho na vikṣv ṛñjasāna āyuṣu vy ānuṣag vāryā deva ṛṇvati ||

1.058.04a वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।

1.058.04c तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥

1.058.04a vi vātajūto ataseṣu tiṣṭhate vṛthā juhūbhiḥ sṛṇyā tuviṣvaṇiḥ |
1.058.04c tṛṣu yad agne vanino vṛṣāyase kṛṣṇaṁ ta ema ruśadūrme ajara ||

1.058.05a तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।

1.058.05c अभिव्रजन्नक्षितं पाजसा रज स्थातुश्चरथं भयते पतत्रिणः ॥

1.058.05a tapurjambho vana ā vātacodito yūthe na sāhvām̐ ava vāti vaṁsagaḥ |
1.058.05c abhivrajann akṣitam pājasā raja sthātuś caratham bhayate patatriṇaḥ ||

1.058.06a दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।

1.058.06c होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥

1.058.06a dadhuṣ ṭvā bhṛgavo mānuṣeṣv ā rayiṁ na cāruṁ suhavaṁ janebhyaḥ |
1.058.06c hotāram agne atithiṁ vareṇyam mitraṁ na śevaṁ divyāya janmane ||

1.058.07a होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु ।

1.058.07c अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥

1.058.07a hotāraṁ sapta juhvo3 yajiṣṭhaṁ yaṁ vāghato vṛṇate adhvareṣu |
1.058.07c agniṁ viśveṣām aratiṁ vasūnāṁ saparyāmi prayasā yāmi ratnam ||

1.058.08a अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।

1.058.08c अग्ने॑ गृ॒णन्त॒मंह॑स उरु॒ष्योर्जो॑ नपा॒त्पू॒र्भिराय॑सीभिः ॥

1.058.08a acchi̍drā sūno sahaso̱ no a̱dya sto̱tr̥bhyo̍ mitramaha̱ḥ śarma̍ yaccha |
1.058.08c agne̍ gr̥̱ṇanta̱m aṁha̍sa uru̱ṣyorjo̍ napāt pū̱rbhir āya̍sībhiḥ ||

1.058.09a भवा॒ वरू॑थं गृण॒ते वि॑भावो॒ भवा॑ मघवन्म॒घव॑द्भ्य॒ः शर्म॑ ।

1.058.09c उ॒रु॒ष्याग्ने॒ अंह॑सो गृ॒णन्त॑ं प्रा॒तर्म॒क्षू धि॒याव॑सुर्जगम्यात् ॥

1.058.09a bhavā̱ varū̍thaṁ gr̥ṇa̱te vi̍bhāvo̱ bhavā̍ maghavan ma̱ghava̍dbhya̱ḥ śarma̍ |
1.058.09c u̱ru̱ṣyāgne̱ aṁha̍so gr̥̱ṇanta̍m prā̱tar ma̱kṣū dhi̱yāva̍sur jagamyāt ||

1.059.01a व॒या इद॑ग्ने अ॒ग्नय॑स्ते अ॒न्ये त्वे विश्वे॑ अ॒मृता॑ मादयन्ते ।

1.059.01c वैश्वा॑नर॒ नाभि॑रसि क्षि॒तीनां स्थूणे॑व॒ जना॑ँ उप॒मिद्य॑यन्थ ॥

1.059.01a va̱yā id a̍gne a̱gnaya̍s te a̱nye tve viśve̍ a̱mr̥tā̍ mādayante |
1.059.01c vaiśvā̍nara̱ nābhi̍r asi kṣi̱tīnāṁ sthūṇe̍va̱ janā̍m̐ upa̱mid ya̍yantha ||

1.059.02a मू॒र्धा दि॒वो नाभि॑र॒ग्निः पृ॑थि॒व्या अथा॑भवदर॒ती रोद॑स्योः ।

1.059.02c तं त्वा॑ दे॒वासो॑ऽजनयन्त दे॒वं वैश्वा॑नर॒ ज्योति॒रिदार्या॑य ॥

1.059.02a mū̱rdhā di̱vo nābhi̍r a̱gniḥ pr̥̍thi̱vyā athā̍bhavad ara̱tī roda̍syoḥ |
1.059.02c taṁ tvā̍ de̱vāso̍ 'janayanta de̱vaṁ vaiśvā̍nara̱ jyoti̱r id āryā̍ya ||

1.059.03a आ सूर्ये॒ न र॒श्मयो॑ ध्रु॒वासो॑ वैश्वान॒रे द॑धिरे॒ऽग्ना वसू॑नि ।

1.059.03c या पर्व॑ते॒ष्वोष॑धीष्व॒प्सु या मानु॑षे॒ष्वसि॒ तस्य॒ राजा॑ ॥

1.059.03a ā sūrye̱ na ra̱śmayo̍ dhru̱vāso̍ vaiśvāna̱re da̍dhire̱ 'gnā vasū̍ni |
1.059.03c yā parva̍te̱ṣv oṣa̍dhīṣv a̱psu yā mānu̍ṣe̱ṣv asi̱ tasya̱ rājā̍ ||

1.059.04a बृ॒ह॒ती इ॑व सू॒नवे॒ रोद॑सी॒ गिरो॒ होता॑ मनु॒ष्यो॒३॒ न दक्षः॑ ।

1.059.04c स्व॑र्वते स॒त्यशु॑ष्माय पू॒र्वीर्वैश्वान॒राय॒ नृत॑माय य॒ह्वीः ॥

1.059.04a br̥̱ha̱tī i̍va sū̱nave̱ roda̍sī̱ giro̱ hotā̍ manu̱ṣyo̱3̱ na dakṣa̍ḥ |
1.059.04c sva̍rvate sa̱tyaśu̍ṣmāya pū̱rvīr vaiśvāna̱rāya̱ nr̥ta̍māya ya̱hvīḥ ||

1.059.05a दि॒वश्चि॑त्ते बृह॒तो जा॑तवेदो॒ वैश्वा॑नर॒ प्र रि॑रिचे महि॒त्वम् ।

1.059.05c राजा॑ कृष्टी॒नाम॑सि॒ मानु॑षीणां यु॒धा दे॒वेभ्यो॒ वरि॑वश्चकर्थ ॥

1.059.05a divaś cit te bṛhato jātavedo vaiśvānara pra ririce mahitvam |
1.059.05c rājā kṛṣṭīnām asi mānuṣīṇāṁ yudhā devebhyo varivaś cakartha ||

1.059.06a प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।

1.059.06c वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् ॥

1.059.06a pra nū mahitvaṁ vṛṣabhasya vocaṁ yam pūravo vṛtrahaṇaṁ sacante |
1.059.06c vaiśvānaro dasyum agnir jaghanvāṁ̐ adhūnot kāṣṭhā ava śambaram bhet ||

1.059.07a वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा ।

1.059.07c शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥

1.059.07a vaiśvānaro mahimnā viśvakṛṣṭir bharadvājeṣu yajato vibhāvā |
1.059.07c śātavaneye śatinībhir agniḥ puruṇīthe jarate sūnṛtāvān ||

1.060.01a वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।

1.060.01c द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ॥

1.060.01a vahniṁ yaśasaṁ vidathasya ketuṁ suprāvyaṁ dūtaṁ sadyoartham |
1.060.01c dvijanmānaṁ rayim iva praśastaṁ rātim bharad bhṛgave mātariśvā ||

1.060.02a अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।

1.060.02c दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥

1.060.02a asya śāsur ubhayāsaḥ sacante haviṣmanta uśijo ye ca martāḥ |
1.060.02c divaś cit pūrvo ny asādi hotāpṛcchyo viśpatir vikṣu vedhāḥ ||

1.060.03a तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।

1.060.03c यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त ॥

1.060.03a taṁ navyasī hṛda ā jāyamānam asmat sukīrtir madhujihvam aśyāḥ |
1.060.03c yam ṛtvijo vṛjane mānuṣāsaḥ prayasvanta āyavo jījananta ||

1.060.04a उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।

1.060.04c दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम् ॥

1.060.04a uśik pāvako vasur mānuṣeṣu vareṇyo hotādhāyi vikṣu |
1.060.04c damūnā gṛhapatir dama āṁ̐ agnir bhuvad rayipatī rayīṇām ||

1.060.05a तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।

1.060.05c आशुं न वाजम्भरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

1.060.05a tam̐ tvā vayam patim agne rayīṇām pra śam̐sāmo matibhir gotamāsaḥ |
1.060.05c āśum̐ na vājambharam marjayantaḥ prātar makṣū dhiyāvasur jagamyāt ||

1.061.01a अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।

1.061.01c ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा ॥

1.061.01a asmā id u pra tavase turāya prayo na harmi stomam māhināya |
1.061.01c ṛcīṣamāyādhrigava oham indrāya brahmāṇi rātatamā ||

1.061.02a अस्मा इदु प्रय इव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति ।

1.061.02c इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥

1.061.02a asmā id u praya iva pra yam̐si bharāmy āṅgūṣam bādhe suvṛkti |
1.061.02c indrāya hṛdā manasā manīṣā pratnāya patye dhiyo marjayanta ||

1.061.03a अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।

1.061.03c मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥

1.061.03a asmā id u tyam upamam̐ svarṣām bharāmy āṅgūṣam āsyena |
1.061.03c mam̐hiṣṭham acchoktibhir matīnām̐ suvṛktibhiḥ sūrim̐ vāvṛdhadhyai ||

1.061.04a अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।

1.061.04c गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥

1.061.04a asmā id u stomam̐ sam̐ hinomi ratham̐ na taṣṭeva tatsināya |
1.061.04c giraś ca girvāhase suvṛktīndrāya viśvaminvam medhirāya ||

1.061.05a अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समञ्जे ।

1.061.05c वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥

1.061.05a asmā id u saptim iva śravasyendrāyārkam̐ juhvā3 sam añje |
1.061.05c vīram̐ dānaukasam̐ vandadhyai purām̐ gūrtaśravasam̐ darmāṇam ||

1.061.06a अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं१ रणाय ।

1.061.06c वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥

1.061.06a asmā id u tvaṣṭā takṣad vajraṁ svapastamaṁ svaryaṁ1 raṇāya |
1.061.06c vṛtrasya cid vidad yena marma tujann īśānas tujatā kiyedhāḥ ||

1.061.07a अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।

1.061.07c मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥

1.061.07a asyed u mātuḥ savaneṣu sadyo mahaḥ pitum papivāñ cārv annā |
1.061.07c muṣāyad viṣṇuḥ pacataṁ sahīyān vidhyad varāhaṁ tiro adrim astā ||

1.061.08a अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः ।

1.061.08c परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥

1.061.08a asmā id u gnāś cid devapatnīr indrāyārkam ahihatya ūvuḥ |
1.061.08c pari dyāvāpṛthivī jabhra urvī nāsya te mahimānam pari ṣṭaḥ ||

1.061.09a अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।

1.061.09c स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥

1.061.09a asyed eva pra ririce mahitvaṁ divas pṛthivyāḥ pary antarikṣāt |
1.061.09c svarāḻ indro dama ā viśvagūrtaḥ svarir amatro vavakṣe raṇāya ||

1.061.10a अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।

1.061.10c गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः ॥

1.061.10a asyed eva śavasā śuṣantaṁ vi vṛścad vajreṇa vṛtram indraḥ |
1.061.10c gā na vrāṇā avanīr amuñcad abhi śravo dāvane sacetāḥ ||

1.061.11a अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।

1.061.11c ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥

1.061.11a asyed u tveṣasā ranta sindhavaḥ pari yad vajreṇa sīm ayacchat |
1.061.11c īśānakṛd dāśuṣe daśasyan turvītaye gādhaṁ turvaṇiḥ kaḥ ||

1.061.12a अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।

1.061.12c गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥

1.061.12a asmā id u pra bharā tūtujāno vṛtrāya vajram īśānaḥ kiyedhāḥ |

1.061.12c gor na parva vi radā tiraścesyann arṇāṁsy apāṁ caradhyai ||

1.061.13a अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।

1.061.13c युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥

1.061.13a asyed u pra brūhi pūrvyāṇi turasya karmāṇi navya ukthaiḥ |
1.061.13c yudhe yad iṣṇāna āyudhāny ṛghāyamāṇo niriṇāti śatrūn ||

1.061.14a अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।

1.061.14c उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥

1.061.14a asyed u bhiyā girayaś ca dṛḷhā dyāvā ca bhūmā januṣas tujete |
1.061.14c upo venasya joguvāna oṇiṁ sadyo bhuvad vīryāya nodhāḥ ||

1.061.15a अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः ।

1.061.15c प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥

1.061.15a asmā id u tyad anu dāyy eṣām eko yad vavne bhūrer īśānaḥ |
1.061.15c praitaśaṁ sūrye paspṛdhānaṁ sauvaśvye suṣvim āvad indraḥ ||

1.061.16a एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।

1.061.16c ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

1.061.16a evā te hāriyojanā suvṛktīndra brahmāṇi gotamāso akran |
1.061.16c aiṣu viśvapeśasaṁ dhiyaṁ dhāḥ prātar makṣū dhiyāvasur jagamyāt ||

1.062.01a प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।

1.062.01c सुवृक्तिभि स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥

1.062.01a pra manmahe śavasānāya śūṣam āṅgūṣaṁ girvaṇase aṅgirasvat |
1.062.01c suvṛktibhi stuvata ṛgmiyāyārcāmārkaṁ nare viśrutāya ||

1.062.02a प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।

1.062.02c येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥

1.062.02a pra vo mahe mahi namo bharadhvam āṅgūṣyaṁ śavasānāya sāma |
1.062.02c yenā naḥ pūrve pitaraḥ padajñā arcanto aṅgiraso gā avindan ||

1.062.03a इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।

1.062.03c बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥

1.062.03a indrasyāṅgirasāṁ ceṣṭau vidat saramā tanayāya dhāsim |
1.062.03c bṛhaspatir bhinad adriṁ vidad gāḥ sam usriyābhir vāvaśanta naraḥ ||

1.062.04a स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।

1.062.04c सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥

1.062.04a sa suṣṭubhā sa stubhā sapta vipraiḥ svareṇādriṁ svaryo3 navagvaiḥ |
1.062.04c saraṇyubhiḥ phaligam indra śakra valaṁ raveṇa darayo daśagvaiḥ ||

1.062.05a गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।

1.062.05c वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥

1.062.05a gṛṇāno aṅgirobhir dasma vi var uṣasā sūryeṇa gobhir andhaḥ |
1.062.05c vi bhūmyā aprathaya indra sānu divo raja uparam astabhāyaḥ ||

1.062.06a तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।

1.062.06c उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य१श्चतस्रः ॥

1.062.06a tad u prayakṣatamam asya karma dasmasya cārutamam asti daṁsaḥ |
1.062.06c upahvare yad uparā apinvan madhvarṇaso nadya1ś catasraḥ ||

1.062.07a द्विता वि वव्रे सनजा सनीळे अयास्य स्तवमानेभिरर्कैः ।

1.062.07c भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥

1.062.07a dvitā vi vavre sanajā sanīḷe ayāsya stavamānebhir arkaiḥ |
1.062.07c bhago na mene parame vyomann adhārayad rodasī sudaṁsāḥ ||

1.062.08a सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।

1.062.08c कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥

1.062.08a sanād divam pari bhūmā virūpe punarbhuvā yuvatī svebhir evaiḥ |
1.062.08c kṛṣṇebhir aktoṣā ruśadbhir vapurbhir ā carato anyānyā ||

1.062.09a सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।

1.062.09c आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥

1.062.09a sanemi sakhyaṁ svapasyamānaḥ sūnur dādhāra śavasā sudaṁsāḥ |
1.062.09c āmāsu cid dadhiṣe pakvam antaḥ payaḥ kṛṣṇāsu ruśad rohiṇīṣu ||

1.062.10a सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।

1.062.10c पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥

1.062.10a sanāt sanīḷā avanīr avātā vratā rakṣante amṛtāḥ sahobhiḥ |
1.062.10c purū sahasrā janayo na patnīr duvasyanti svasāro ahrayāṇam ||

1.062.11a सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।

1.062.11c पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥

1.062.11a sanāyuvo namasā navyo arkair vasūyavo matayo dasma dadruḥ |
1.062.11c patiṁ na patnīr uśatīr uśantaṁ spṛśanti tvā śavasāvan manīṣāḥ ||

1.062.12a सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।

1.062.12c द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥

1.062.12a sanād eva tava rāyo gabhastau na kṣīyante nopa dasyanti dasma |
1.062.12c dyumām̐ asi kratumām̐ indra dhīraḥ śikṣā śacīvas tava naḥ śacībhiḥ ||

1.062.13a सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।

1.062.13c सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

1.062.13a sanāyate gotama indra navyam atakṣad brahma hariyojanāya |
1.062.13c sunīthāya naḥ śavasāna nodhāḥ prātar makṣū dhiyāvasur jagamyāt ||

1.063.01a त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।

1.063.01c यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥

1.063.01a tvam mahām̐ indra yo ha śuṣmair dyāvā jajñānaḥ pṛthivī ame dhāḥ |
1.063.01c yad dha te viśvā girayaś cid abhvā bhiyā dṛḷhāsaḥ kiraṇā naijan ||

1.063.02a आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात् ।

1.063.02c येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः ॥

1.063.02a ā yad dharī indra vivratā ver ā te vajraṁ jaritā bāhvor dhāt |
1.063.02c yenāviharyatakrato amitrān pura iṣṇāsi puruhūta pūrvīḥ ||

1.063.03a त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।

1.063.03c त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥

1.063.03a tvaṁ satya indra dhṛṣṇur etān tvam ṛbhukṣā naryas tvaṁ ṣāṭ |
1.063.03c tvaṁ śuṣṇaṁ vṛjane pṛkṣa āṇau yūne kutsāya dyumate sacāhan ||

1.063.04a त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।

1.063.04c यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥

1.063.04a tvaṁ ha tyad indra codīḥ sakhā vṛtraṁ yad vajrin vṛṣakarmann ubhnāḥ |
1.063.04c yad dha śūra vṛṣamaṇaḥ parācair vi dasyūm̐r yonāv akṛto vṛthāṣāṭ ||

1.063.05a त्वं ह त्यदिन्द्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ ।

1.063.05c व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ॥

1.063.05a tvaṁ ha tyad indrāriṣaṇyan dṛḷhasya cin martānām ajuṣṭau |
1.063.05c vy a1smad ā kāṣṭhā arvate var ghaneva vajriñ chnathihy amitrān ||

1.063.06a त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।

1.063.06c तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥

1.063.06a tvāṁ ha tyad indrārṇasātau svarmīḷhe nara ājā havante |
1.063.06c tava svadhāva iyam ā samarya ūtir vājeṣv atasāyyā bhūt ||

1.063.07a त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।

1.063.07c बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः ॥

1.063.07a tvaṁ ha tyad indra sapta yudhyan puro vajrin purukutsāya dardaḥ |
1.063.07c barhir na yat sudāse vṛthā varg aṁho rājan varivaḥ pūrave kaḥ ||

1.063.08a त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।

1.063.08c यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥

1.063.08a tvaṁ tyāṁ na indra deva citrām iṣam āpo na pīpayaḥ parijman |
1.063.08c yayā śūra praty asmabhyaṁ yaṁsi tmanam ūrjaṁ na viśvadha kṣaradhyai ||

1.063.09a अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।

1.063.09c सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

1.063.09a akā̍ri ta̱ indra̱ gota̍mebhi̱r brahmā̱ṇy oktā̱ nama̍sā̱ hari̍bhyām |
1.063.09c su̱pe̍śasa̱ṁ vāja̱m ā bha̍rā naḥ prā̱tar ma̱kṣū dhi̱yāva̍sur jagamyāt ||

1.064.01a वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।

1.064.01c अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥

1.064.01a vṛṣ̱ṇe̱ śardhā̍ya̱ suma̍khāya ve̱dhase̱ nodha̍ḥ suvṛ̱ktim pra bha̍rā ma̱rudbhya̍ḥ |
1.064.01c a̱po na dhīro̱ mana̍sā su̱hastyo̱ gira̍ḥ sam a̍ñje vi̱dathe̍ṣv ā̱bhuva̍ḥ ||

1.064.02a ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।

1.064.02c पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥

1.064.02a te ja̍jñire di̱va ṛ̱ṣvāsa̍ u̱kṣaṇo̍ ru̱drasya̱ maryā̱ asu̍rā are̱pasa̍ḥ |
1.064.02c pā̱va̱kāsa̱ḥ śuca̍ya̱ḥ sūryā̍ iva̱ satvā̍no̱ na dra̱psino̍ gho̱rava̍rpasaḥ ||

1.064.03a युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।

1.064.03c दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥

1.064.03a yuvā̍no ru̱drā a̱jarā̍ abho̱gghano̍ vava̱kṣur adhri̍gāva̱ḥ parva̍tā iva |
1.064.03c dṛ̱ḷhā ci̱d viśvā̱ bhuva̍nāni̱ pārthi̍vā̱ pra cyā̍vayanti di̱vyāni̍ ma̱jmanā̍ ||

1.064.04a चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षस्सु रुक्माँ अधि येतिरे शुभे ।

1.064.04c अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥

1.064.04a ci̱trair a̱ñjibhi̱r vapu̍ṣe̱ vy a̍ñjate̱ vakṣa̍ssu ru̱kmām̐ adhi̍ yetire śu̱bhe |
1.064.04c aṁse̍ṣv eṣā̱ṁ ni mi̍mṛkṣur ṛ̱ṣṭaya̍ḥ sā̱kaṁ ja̍jñire sva̱dhayā̍ di̱vo nara̍ḥ ||

1.064.05a ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।

1.064.05c दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥

1.064.05a ī̱śā̱na̱kṛto̱ dhuna̍yo ri̱śāda̍so̱ vātā̍n vi̱dyuta̱s tavi̍ṣībhir akrata |
1.064.05c du̱hanty ūdha̍r di̱vyāni̱ dhūta̍yo̱ bhūmi̍m pinvanti̱ paya̍sā̱ pari̍jrayaḥ ||

1.064.06a पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।

1.064.06c अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥

1.064.06a pinvanty apo marutaḥ sudānavaḥ payo ghṛtavad vidatheṣv ābhuvaḥ |
1.064.06c atyaṁ na mihe vi nayanti vājinam utsaṁ duhanti stanayantam akṣitam ||

1.064.07a महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।

1.064.07c मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥

1.064.07a mahiṣāso māyinaś citrabhānavo girayo na svatavaso raghuṣyadaḥ |
1.064.07c mṛgā iva hastinaḥ khādathā vanā yad āruṇīṣu taviṣīr ayugdhvam ||

1.064.08a सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।

1.064.08c क्षपो जिन्वन्तः पृषतीभिरृष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥

1.064.08a siṁhā iva nānadati pracetasaḥ piśā iva supiśo viśvavedasaḥ |
1.064.08c kṣapo jinvantaḥ pṛṣatībhir ṛṣṭibhiḥ sam it sabādhaḥ śavasāhimanyavaḥ ||

1.064.09a रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।

1.064.09c आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥

1.064.09a rodasī ā vadatā gaṇaśriyo nṛṣācaḥ śūrāḥ śavasāhimanyavaḥ |
1.064.09c ā vandhureṣv amatir na darśatā vidyun na tasthau maruto ratheṣu vaḥ ||

1.064.10a विश्ववेदसो रयिभिः समोकसः सम्मिश्लासस्तविषीभिर्विरप्शिनः ।

1.064.10c अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥

1.064.10a viśvavedaso rayibhiḥ samokasaḥ sammiślāsas taviṣībhir virapśinaḥ |
1.064.10c astāra iṣuṁ dadhire gabhastyor anantaśuṣmā vṛṣakhādayo naraḥ ||

1.064.11a हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् ।

1.064.11c मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥

1.064.11a hiraṇyayebhiḥ pavibhiḥ payovṛdha ujjighnanta āpathyo3 na parvatān |
1.064.11c makhā ayāsaḥ svasṛto dhruvacyuto dudhrakṛto maruto bhrājadṛṣṭayaḥ ||

1.064.12a घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।

1.064.12c रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥

1.064.12a ghṛṣuṁ pāvakaṁ vaninaṁ vicarṣaṇiṁ rudrasya sūnuṁ havasā gṛṇīmasi |

1.064.12c rajasturaṁ tavasam mārutaṁ gaṇam ṛjīṣiṇaṁ vṛṣaṇaṁ saścata śriye ||

1.064.13a प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।

1.064.13c अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥

1.064.13a pra nū sa martaḥ śavasā janām̐ ati tasthau va ūtī maruto yam āvata |
1.064.13c arvadbhir vājam bharate dhanā nṛbhir āpṛcchyaṁ kratum ā kṣeti puṣyati ||

1.064.14a चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।

1.064.14c धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥

1.064.14a carkṛtyam marutaḥ pṛtsu duṣṭaraṁ dyumantaṁ śuṣmam maghavatsu dhattana |
1.064.14c dhanaspṛtam ukthyaṁ viśvacarṣaṇiṁ tokam puṣyema tanayaṁ śataṁ himāḥ ||

1.064.15a नू ष्ठिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त ।

1.064.15c सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥

1.064.15a nū ṣṭhiram maruto vīravantam ṛtīṣāhaṁ rayim asmāsu dhatta |
1.064.15c sahasriṇaṁ śatinaṁ śūśuvāṁsam prātar makṣū dhiyāvasur jagamyāt ||

1.065.01 पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम् ॥

1.065.01 paśvā na tāyuṁ guhā catantaṁ namo yujānaṁ namo vahantam ||

1.065.02 सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥

1.065.02 sajoṣā dhīrāḥ padair anu gmann upa tvā sīdan viśve yajatrāḥ ||

1.065.03 ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम ॥

1.065.03 ṛtasya devā anu vratā gur bhuvat pariṣṭir dyaur na bhūma ||

1.065.04 वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥

1.065.04 vardhantīm āpaḥ panvā suśiśvim ṛtasya yonā garbhe sujātam ||

1.065.05 पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शम्भु ॥

1.065.05 puṣṭir na raṇvā kṣitir na pṛthvī girir na bhujma kṣodo na śambhu ||

1.065.06 अत्यो नाज्मन्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥

1.065.06 atyo nājman sargaprataktaḥ sindhur na kṣodaḥ ka īṁ varāte ||

1.065.07 जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ॥

1.065.07 jāmiḥ sindhūnām bhrāteva svasrām ibhyān na rājā vanāny atti ||

1.065.08 यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥

1.065.08 yad vātajūto vanā vy asthād agnir ha dāti romā pṛthivyāḥ ||

1.065.09 श्वसित्यप्सु हंसो न सीदन्क्रत्वा चेतिष्ठो विशामुषर्भुत् ॥

1.065.09 śvasity apsu haṁso na sīdan kratvā cetiṣṭho viśām uṣarbhut ||

1.065.10 सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥

1.065.10 somo na vedhā ṛtaprajātaḥ paśur na śiśvā vibhur dūrebhāḥ ||

1.066.01 रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ॥

1.066.01 rayir na citrā sūro na sandṛg āyur na prāṇo nityo na sūnuḥ ||

1.066.02 तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥

1.066.02 takvā na bhūrṇir vanā siṣakti payo na dhenuḥ śucir vibhāvā ||

1.066.03 दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानाम् ॥

1.066.03 dādhāra kṣemam oko na raṇvo yavo na pakvo jetā janānām ||

1.066.04 ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥

1.066.04 ṛṣir na stubhvā vikṣu praśasto vājī na prīto vayo dadhāti ||

1.066.05 दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै ॥

1.066.05 durokaśociḥ kratur na nityo jāyeva yonāv araṁ viśvasmai ||

1.066.06 चित्रो यदभ्राट् छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥

1.066.06 citro yad abhrāṭ chveto na vikṣu ratho na rukmī tveṣaḥ samatsu ||

1.066.07 सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ॥

1.066.07 seneva sṛṣṭāmaṁ dadhāty astur na didyut tveṣapratīkā ||

1.066.08 यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥

1.066.08 yamo ha jāto yamo janitvaṁ jāraḥ kanīnām patir janīnām ||

1.066.09 तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ॥

1.066.09 taṁ vaś carāthā vayaṁ vasatyāstaṁ na gāvo nakṣanta iddham ||

1.066.10 सिन्धुर्न क्षोदः प्र नीचीरैनोन्नवन्त गावः स्व१र्दृशीके ॥

1.066.10 sindhur na kṣodaḥ pra nīcīr ainon navanta gāvaḥ sva1r dṛśīke ||

1.067.01 वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ॥

1.067.01 vaneṣu jāyur marteṣu mitro vṛṇīte śruṣṭiṁ rājevājuryam ||

1.067.02 क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥

1.067.02 kṣemo na sādhuḥ kratur na bhadro bhuvat svādhīr hotā havyavāṭ ||

1.067.03 हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन् ॥

1.067.03 haste dadhāno nṛmṇā viśvāny ame devān dhād guhā niṣīdan ||

1.067.04 विदन्तीमत्र नरो धियंधा हृदा यत्तष्टान्मन्त्राँ अशंसन् ॥

1.067.04 vidantīm atra naro dhiyandhā hṛdā yat taṣṭān mantrām̐ aśaṁsan ||

1.067.05 अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः ॥

1.067.05 ajo na kṣāṁ dādhāra pṛthivīṁ tastambha dyām mantrebhiḥ satyaiḥ ||

1.067.06 प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥

1.067.06 priyā padāni paśvo ni pāhi viśvāyur agne guhā guhaṁ gāḥ ||

1.067.07 य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ॥

1.067.07 ya īṁ ciketa guhā bhavantam ā yaḥ sasāda dhārām ṛtasya ||

1.067.08 वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥

1.067.08 vi ye cṛtanty ṛtā sapanta ād id vasūni pra vavācāsmai ||

1.067.09 वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः ॥

1.067.09 vi yo vīrutsu rodhan mahitvota prajā uta prasūṣv antaḥ ||

1.067.10 चित्तिरपां दमे विश्वायुः सद्मेव धीराः सम्माय चक्रुः ॥

1.067.10 cittir apāṁ dame viśvāyuḥ sadmeva dhīrāḥ sammāya cakruḥ ||

1.068.01 श्रीणन्नुप स्थाद्दिवं भुरण्यु स्थातुश्चरथमक्तून्व्यूर्णोत् ॥

1.068.01 śrīṇann upa sthād divaṁ bhuraṇyu sthātuś caratham aktūn vy ūrṇot ||

1.068.02 परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥

1.068.02 pari yad eṣām eko viśveṣām bhuvad devo devānām mahitvā ||

1.068.03 आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः ॥

1.068.03 ād it te viśve kratuṁ juṣanta śuṣkād yad deva jīvo janiṣṭhāḥ ||

1.068.04 भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः ॥

1.068.04 bhajanta viśve devatvaṁ nāma ṛtaṁ sapanto amṛtam evaiḥ ||

1.068.05 ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ॥

1.068.05 ṛtasya preṣā ṛtasya dhītir viśvāyur viśve apāṁsi cakruḥ ||

1.068.06 यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥

1.068.06 yas tubhyaṁ dāśād yo vā te śikṣāt tasmai cikitvān rayiṁ dayasva ||

1.068.07 होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणाम् ॥

1.068.07 hotā niṣatto manor apatye sa cin nv āsām patī rayīṇām ||

1.068.08 इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥

1.068.08 icchanta reto mithas tanūṣu saṁ jānata svair dakṣair amūrāḥ ||

1.068.09 पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ॥

1.068.09 pitur na putrāḥ kratuṁ juṣanta śroṣan ye asya śāsaṁ turāsaḥ ||

1.068.10 वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥

1.068.10 vi rāya aurṇod duraḥ purukṣuḥ pipeśa nākaṁ stṛbhir damūnāḥ ||

1.069.01 शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ॥

1.069.01 śukraḥ śuśukvām̐ uṣo na jāraḥ paprā samīcī divo na jyotiḥ ||

1.069.02 परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥

1.069.02 pari prajātaḥ kratvā babhūtha bhuvo devānām pitā putraḥ san ||

1.069.03 वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम् ॥

1.069.03 ve̱dhā adṛ̍pto a̱gnir vi̍jā̱nann ūdha̱r na go̱nā̍ṁ svādma̍ pitū̱nām ||

1.069.04 जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥

1.069.04 jane̱ na śeva̍ ā̱hūrya̱ḥ san madhye̱ niṣa̍tto ra̱ṇvo du̍ro̱ṇe ||

1.069.05 पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ॥

1.069.05 pu̱tro na jā̱to ra̱ṇvo du̍ro̱ṇe vā̱jī na prī̱to viśo̱ vi tā̍rīt ||

1.069.06 विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥

1.069.06 viśo̱ yad ahve̱ nṛbhi̱ḥ sanī̍ḻā a̱gnir de̍va̱tvā viśvā̍ny aśyā̱ḥ ||

1.069.07 नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ॥

1.069.07 naki̍ṣ ṭa e̱tā vra̱tā mi̍nanti̱ nṛbhyo̱ yad e̱bhyaḥ śru̱ṣṭiṁ ca̱kartha̍ ||

1.069.08 तत्तु ते दंसो यदहन्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥

1.069.08 tat tu te̱ daṁso̱ yad aha̍n samā̱nair nṛbhi̱r yad yu̱kto vi̱ve rapā̍ṁsi ||

1.069.09 उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ॥

1.069.09 u̱ṣo na jā̱ro vi̱bhāvo̱sraḥ sañjñā̍tarūpa̱ś cike̍tad asmai ||

1.069.10 त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्वर्दृशीके ॥

1.069.10 tmanā̱ vaha̍nto̱ duro̱ vy ṛ̍ṇva̱n nava̍nta̱ viśve̱ sva1̱r dṛśīke ||

1.070.01 वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ॥

1.070.01 va̱nema̍ pū̱rvīr a̱ryo ma̍nī̱ṣā a̱gniḥ su̱śoko̱ viśvā̍ny aśyā̱ḥ ||

1.070.02 आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥

1.070.02 ā daivyā̍ni vra̱tā ci̍ki̱tvān ā mānu̍ṣasya̱ jana̍sya̱ janma̍ ||

1.070.03 गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम् ॥

1.070.03 garbho̱ yo a̱pāṁ garbho̱ vanā̍nā̱ṁ garbha̍ś ca sthā̱tāṁ garbha̍ś ca̱rathā̍m ||

1.070.04 अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥

1.070.04 adrau̍ cid asmā a̱ntar du̍ro̱ṇe vi̱śāṁ na viśvo̍ a̱mṛta̱ḥ svā̱dhīḥ ||

1.070.05 स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ॥

1.070.05 sa hi kṣapāvām̐ agnī rayīṇāṁ dāśad yo asmā araṁ sūktaiḥ ||

1.070.06 एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्ताँश्च विद्वान् ॥

1.070.06 etā cikitvo bhūmā ni pāhi devānāṁ janma martām̐ś ca vidvān ||

1.070.07 वर्धान्यं पूर्वीः क्षपो विरूपा स्थातुश्च रथमृतप्रवीतम् ॥

1.070.07 vardhān yam pūrvīḥ kṣapo virūpā sthātuś ca ratham ṛtapravītam ||

1.070.08 अराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥

1.070.08 arādhi hotā sva1r niṣattaḥ kṛṇvan viśvāny apāṁsi satyā ||

1.070.09 गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः ॥

1.070.09 goṣu praśastiṁ vaneṣu dhiṣe bharanta viśve baliṁ svar ṇaḥ ||

1.070.10 वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरन्त ॥

1.070.10 vi tvā naraḥ purutrā saparyan pitur na jivrer vi vedo bharanta ||

1.070.11 साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥

1.070.11 sādhur na gṛdhnur asteva śūro yāteva bhīmas tveṣaḥ samatsu ||

1.071.01a उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः ।

1.071.01c स्वसारः श्यावीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसं न गावः ॥

1.071.01a upa pra jinvann uśatīr uśantam patiṁ na nityaṁ janayaḥ sanīḷāḥ |
1.071.01c svasāraḥ śyāvīm aruṣīm ajuṣrañ citram ucchantīm uṣasaṁ na gāvaḥ ||

1.071.02a वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।

1.071.02c चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥

1.071.02a vīḷu cid dṛḷhā pitaro na ukthair adriṁ rujann aṅgiraso raveṇa |
1.071.02c cakrur divo bṛhato gātum asme ahaḥ svar vividuḥ ketum usrāḥ ||

1.071.03a दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः ।

1.071.03c अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः ॥

1.071.03a  dadhann ṛtaṁ dhanayann asya dhītim ād id aryo didhiṣvo3 vibhṛtrāḥ |
1.071.03c  atṛṣyantīr apaso yanty acchā devāñ janma prayasā vardhayantīḥ ||

1.071.04a मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्।

1.071.04c आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय॥

1.071.04a  mathīd yad īṁ vibhṛto mātariśvā gṛhe-gṛhe śyeto jenyo bhūt |
1.071.04c  ād īṁ rājñe na sahīyase sacā sann ā dūtya1m bhṛgavāṇo vivāya ||

1.071.05a महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान्।

1.071.05c सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात्॥

1.071.05a  mahe yat pitra īṁ rasaṁ dive kar ava tsarat pṛśanyaś cikitvān |
1.071.05c  sṛjad astā dhṛṣatā didyum asmai svāyāṁ devo duhitari tviṣiṁ dhāt ||

1.071.06a स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून्।

1.071.06c वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि॥

1.071.06a  sva ā yas tubhyaṁ dama ā vibhāti namo vā dāśād uśato anu dyūn |
1.071.06c  vardho agne vayo asya dvibarhā yāsad rāyā sarathaṁ yaṁ junāsi ||

1.071.07a अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः।

1.071.07c न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान्॥

1.071.07a  agniṁ viśvā abhi pṛkṣaḥ sacante samudraṁ na sravataḥ sapta yahvīḥ |
1.071.07c  na jāmibhir vi cikite vayo no vidā deveṣu pramatiṁ cikitvān ||

1.071.08a आ यदिषे नृपतिं तेज आनट् छुचि रेतो निषिक्तं द्यौरभीके।

1.071.08c अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च॥

1.071.08a  ā yad iṣe nṛpatiṁ teja ānaṭ chuci reto niṣiktaṁ dyaur abhīke |
1.071.08c  agniḥ śardham anavadyaṁ yuvānaṁ svādhyaṁ janayat sūdayac ca ||

1.071.09a मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे।

1.071.09c राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा॥

1.071.09a  mano na yo 'dhvanaḥ sadya ety ekaḥ satrā sūro vasva īśe |
1.071.09c  rājānā mitrāvaruṇā supāṇī goṣu priyam amṛtaṁ rakṣamāṇā ||

1.071.10a मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।

1.071.10c नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥

1.071.10a mā no agne sakhyā pitryāṇi pra marṣiṣṭhā abhi viduṣ kaviḥ san |
1.071.10c nabho na rūpaṁ jarimā mināti purā tasyā abhiśaster adhīhi ||

1.072.01a नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।

1.072.01c अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥

1.072.01a ni kāvyā vedhasaḥ śaśvatas kar haste dadhāno naryā purūṇi |
1.072.01c agnir bhuvad rayipatī rayīṇāṁ satrā cakrāṇo amṛtāni viśvā ||

1.072.02a अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।

1.072.02c श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥

1.072.02a asme vatsam pari ṣantaṁ na vindann icchanto viśve amṛtā amūrāḥ |
1.072.02c śramayuvaḥ padavyo dhiyandhās tasthuḥ pade parame cārv agneḥ ||

1.072.03a तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।

1.072.03c नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्व१ः सुजाताः ॥

1.072.03a tisro yad agne śaradas tvām ic chuciṁ ghṛtena śucayaḥ saparyān |
1.072.03c nāmāni cid dadhire yajñiyāny asūdayanta tanva1ḥ sujātāḥ ||

1.072.04a आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।

1.072.04c विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम् ॥

1.072.04a ā rodasī bṛhatī vevidānāḥ pra rudriyā jabhrire yajñiyāsaḥ |
1.072.04c vidan marto nemadhitā cikitvān agnim pade parame tasthivāṁsam ||

1.072.05a संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।

1.072.05c रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥

1.072.05a sañjānānā upa sīdann abhijñu patnīvanto namasyaṁ namasyan |
1.072.05c ririkvāṁsas tanvaḥ kṛṇvata svāḥ sakhā sakhyur nimiṣi rakṣamāṇāḥ ||

1.072.06a त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।

1.072.06c तेभी रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातृञ्चरथं च पाहि ॥

1.072.06a triḥ sapta yad guhyāni tve it padāvidan nihitā yajñiyāsaḥ |
1.072.06c tebhī rakṣante amṛtaṁ sajoṣāḥ paśūñ ca sthātṝñ carathaṁ ca pāhi ||

1.072.07a विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः ।

1.072.07c अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥

1.072.07a vidvām̐ agne vayunāni kṣitīnāṁ vy ānuṣak churudho jīvase dhāḥ |
1.072.07c antarvidvām̐ adhvano devayānān atandro dūto abhavo havirvāṭ ||

1.072.08a स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।

1.072.08c विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् ॥

1.072.08a svādhyo diva ā sapta yahvī rāyo duro vy ṛtajñā ajānan |
1.072.08c vidad gavyaṁ saramā dṛḻham ūrvaṁ yenā nu kam mānuṣī bhojate viṭ ||

1.072.09a आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।

1.072.09c मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥

1.072.09a ā ye viśvā svapatyāni tasthuḥ kṛṇvānāso amṛtatvāya gātum |
1.072.09c mahnā mahadbhiḥ pṛthivī vi tasthe mātā putrair aditir dhāyase veḥ ||

1.072.10a अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।

1.072.10c अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥

1.072.10a adhi śriyaṁ ni dadhuś cārum asmin divo yad akṣī amṛtā akṛṇvan |
1.072.10c adha kṣaranti sindhavo na sṛṣṭāḥ pra nīcīr agne aruṣīr ajānan ||

1.073.01a रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।

1.073.01c स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥

1.073.01a rayir na yaḥ pitṛvitto vayodhāḥ supraṇītiś cikituṣo na śāsuḥ |
1.073.01c syonaśīr atithir na prīṇāno hoteva sadma vidhato vi tārīt ||

1.073.02a देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा ।

1.073.02c पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् ॥

1.073.02a devo na yaḥ savitā satyamanmā kratvā nipāti vṛjanāni viśvā |
1.073.02c purupraśasto amatir na satya ātmeva śevo didhiṣāyyo bhūt ||

1.073.03a देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा ।

1.073.03c पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी ॥

1.073.03a devo na yaḥ pṛthivīṁ viśvadhāyā upakṣeti hitamitro na rājā |
1.073.03c puraḥsadaḥ śarmasado na vīrā anavadyā patijuṣṭeva nārī ||

1.073.04a तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु ।

1.073.04c अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणाम् ॥

1.073.04a taṁ tvā naro dama ā nityam iddham agne sacanta kṣitiṣu dhruvāsu |
1.073.04c adhi dyumnaṁ ni dadhur bhūry asmin bhavā viśvāyur dharuṇo rayīṇām ||

1.073.05a वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।

1.073.05c सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥

1.073.05a vi pṛkṣo agne maghavāno aśyur vi sūrayo dadato viśvam āyuḥ |
1.073.05c sanema vājaṁ samitheṣv aryo bhāgaṁ deveṣu śravase dadhānāḥ ||

1.073.06a ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।

1.073.06c परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥

1.073.06a ṛtasya hi dhenavo vāvaśānāḥ smadūdhnīḥ pīpayanta dyubhaktāḥ |
1.073.06c parāvataḥ sumatim bhikṣamāṇā vi sindhavaḥ samayā sasrur adrim ||

1.073.07a त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।

1.073.07c नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥

1.073.07a tve agne sumatim bhikṣamāṇā divi śravo dadhire yajñiyāsaḥ |
1.073.07c naktā ca cakrur uṣasā virūpe kṛṣṇaṁ ca varṇam aruṇaṁ ca saṁ dhuḥ ||

1.073.08a यान्राये मर्तान्सुषूदो अग्ने ते स्याम मघवानो वयं च ।

1.073.08c छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥

1.073.08a yān rāye martān suṣūdo agne te syāma maghavāno vayaṁ ca |
1.073.08c chāyeva viśvam bhuvanaṁ sisakṣy āpaprivān rodasī antarikṣam ||

1.073.09a अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।

1.073.09c ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥

1.073.09a arvadbhir agne arvato nṛbhir nṝn vīrair vīrān vanuyāmā tvotāḥ |
1.073.09c īśānāsaḥ pitṛvittasya rāyo vi sūrayaḥ śatahimā no aśyuḥ ||

1.073.10a एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।

1.073.10c शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥

1.073.10a etā te agna ucathāni vedho juṣṭāni santu manase hṛde ca |
1.073.10c śakema rāyaḥ sudhuro yamaṁ te 'dhi śravo devabhaktaṁ dadhānāḥ ||

1.074.01a उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।

1.074.01c आरे अस्मे च शृण्वते ॥

1.074.01a upaprayanto adhvaram mantraṁ vocemāgnaye |
1.074.01c āre asme ca śṛṇvate ||

1.074.02a यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।

1.074.02c अरक्षद्दाशुषे गयम् ॥

1.074.02a yaḥ snīhitīṣu pūrvyaḥ sañjagmānāsu kṛṣṭiṣu |
1.074.02c arakṣad dāśuṣe gayam ||

1.074.03a उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि ।

1.074.03c धनंजयो रणेरणे ॥

1.074.03a uta bruvantu jantava ud agnir vṛtrahājani |
1.074.03c dhanañjayo raṇe-raṇe ||

1.074.04a यस्य दूतो असि क्षये वेषि हव्यानि वीतये ।

1.074.04c दस्मत्कृणोष्यध्वरम् ॥

1.074.04a yasya dūto asi kṣaye veṣi havyāni vītaye |
1.074.04c dasmat kṛṇoṣy adhvaram ||

1.074.05a तमित्सुहव्यमङ्गिरः सुदेवं सहसो यहो ।

1.074.05c जना आहुः सुबर्हिषम् ॥

1.074.05a tam it suhavyam aṅgiraḥ sudevaṁ sahaso yaho |
1.074.05c janā āhuḥ subarhiṣam ||

1.074.06a आ च वहासि ताँ इह देवाँ उप प्रशस्तये ।

1.074.06c हव्या सुश्चन्द्र वीतये ॥

1.074.06a ā ca vahāsi tām̐ iha devām̐ upa praśastaye |
1.074.06c havyā suścandra vītaye ||

1.074.07a न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन ।

1.074.07c यदग्ने यासि दूत्यम् ॥

1.074.07a na yor upabdir aśvyaḥ śṛṇve rathasya kac cana |
1.074.07c yad agne yāsi dūtyam ||

1.074.08a त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः ।

1.074.08c प्र दाश्वाँ अग्ने अस्थात् ॥

1.074.08a tvoto vājy ahrayo 'bhi pūrvasmād aparaḥ |
1.074.08c pra dāśvām̐ agne asthāt ||

1.074.09a उत द्युमत्सुवीर्यं बृहदग्ने विवाससि ।

1.074.09c देवेभ्यो देव दाशुषे ॥

1.074.09a uta dyumat suvīryam bṛhad agne vivāsasi |
1.074.09c devebhyo deva dāśuṣe ||

1.075.01a जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् ।

1.075.01c हव्या जुह्वान आसनि ॥

1.075.01a juṣasva saprathastamaṁ vaco devapsarastamam |
1.075.01c havyā juhvāna āsani ||

1.075.02a अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् ।

1.075.02c वोचेम ब्रह्म सानसि ॥

1.075.02a athā te aṅgirastamāgne vedhastama priyam |
1.075.02c vocema brahma sānasi ||

1.075.03a कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।

1.075.03c को ह कस्मिन्नसि श्रितः ॥

1.075.03a kas te jāmir janānām agne ko dāśvadhvaraḥ |
1.075.03c ko ha kasminn asi śritaḥ ||

1.075.04a त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।

1.075.04c सखा सखिभ्य ईड्यः ॥

1.075.04a tvaṁ jāmir janānām agne mitro asi priyaḥ |
1.075.04c sakhā sakhibhya īḍyaḥ ||

1.075.05a यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।

1.075.05c अग्ने यक्षि स्वं दमम् ॥

1.075.05a yajā no mitrāvaruṇā yajā devām̐ ṛtam bṛhat |
1.075.05c agne yakṣi svaṁ damam ||

1.076.01a का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।

1.076.01c को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥

1.076.01a kā ta upetir manaso varāya bhuvad agne śantamā kā manīṣā |
1.076.01c ko vā yajñaiḥ pari dakṣaṁ ta āpa kena vā te manasā dāśema ||

1.076.02a एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।

1.076.02c अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥

1.076.02a ehy agna iha hotā ni ṣīdādabdhaḥ su puraetā bhavā naḥ |
1.076.02c avatāṁ tvā rodasī viśvaminve yajā mahe saumanasāya devān ||

1.076.03a प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा ।

1.076.03c अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने ॥

1.076.03a pra su viśvān rakṣaso dhakṣy agne bhavā yajñānām abhiśastipāvā |
1.076.03c athā vaha somapatiṁ haribhyām ātithyam asmai cakṛmā sudāvne ||

1.076.04a प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।

1.076.04c वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम् ॥

1.076.04a prajāvatā vacasā vahnir āsā ca huve ni ca satsīha devaiḥ |
1.076.04c veṣi hotram uta potraṁ yajatra bodhi prayantar janitar vasūnām ||

1.076.05a यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।

1.076.05c एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥

1.076.05a yathā viprasya manuṣo havirbhir devām̐ ayajaḥ kavibhiḥ kaviḥ san |
1.076.05c evā hotaḥ satyatara tvam adyāgne mandrayā juhvā yajasva ||

1.077.01a कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।

1.077.01c यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥

1.077.01a kathā dāśemāgnaye kāsmai devajuṣṭocyate bhāmine gīḥ |
1.077.01c yo martyeṣv amṛta ṛtāvā hotā yajiṣṭha it kṛṇoti devān ||

1.077.02a यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम् ।

1.077.02c अग्निर्यद्वेर्मर्ताय देवान्स चा बोधाति मनसा यजाति ॥

1.077.02a yo adhvareṣu śantama ṛtāvā hotā tam ū namobhir ā kṛṇudhvam |
1.077.02c agnir yad ver martāya devān sa cā bodhāti manasā yajāti ||

1.077.03a स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।

1.077.03c तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥

1.077.03a sa hi kratuḥ sa maryaḥ sa sādhur mitro na bhūd adbhutasya rathīḥ |
1.077.03c tam medheṣu prathamaṁ devayantīr viśa upa bruvate dasmam ārīḥ ||

1.077.04a स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।

1.077.04c तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥

1.077.04a sa no nṛṇāṁ nṛtamo riśādā agnir giro 'vasā vetu dhītim |
1.077.04c tanā ca ye maghavānaḥ śaviṣṭhā vājaprasūtā iṣayanta manma ||

1.077.05a एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।

1.077.05c स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥

1.077.05a evāgnir gotamebhir ṛtāvā viprebhir astoṣṭa jātavedāḥ |
1.077.05c sa eṣu dyumnam pīpayat sa vājaṁ sa puṣṭiṁ yāti joṣam ā cikitvān ||

1.078.01a अभि त्वा गोतमा गिरा जातवेदो विचर्षणे ।

1.078.01c द्युम्नैरभि प्र णोनुमः ॥

1.078.01a abhi tvā gotamā girā jātavedo vicarṣaṇe |
1.078.01c dyumnair abhi pra ṇonumaḥ ||

1.078.02a तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति ।

1.078.02c द्युम्नैरभि प्र णोनुमः ॥

1.078.02a tam u tvā gotamo girā rāyaskāmo duvasyati |
1.078.02c dyumnair abhi pra ṇonumaḥ ||

1.078.03a तमु त्वा वाजसातममङ्गिरस्वद्धवामहे ।

1.078.03c द्युम्नैरभि प्र णोनुमः ॥

1.078.03a tam u tvā vājasātamam aṅgirasvad dhavāmahe |
1.078.03c dyumnair abhi pra ṇonumaḥ ||

1.078.04a तमु त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे ।

1.078.04c द्युम्नैरभि प्र णोनुमः ॥

1.078.04a tam u tvā vṛtrahantamaṁ yo dasyūm̐r avadhūnuṣe |
1.078.04c dyumnair abhi pra ṇonumaḥ ||

1.078.05a अवोचाम रहूगणा अग्नये मधुमद्वचः ।

1.078.05c द्युम्नैरभि प्र णोनुमः ॥

1.078.05a avocāma rahūgaṇā agnaye madhumad vacaḥ |
1.078.05c dyumnair abhi pra ṇonumaḥ ||

1.079.01a हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान् ।

1.079.01c शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥

1.079.01a hiraṇyakeśo rajaso visāre 'hir dhunir vāta iva dhrajīmān |
1.079.01c śucibhrājā uṣaso navedā yaśasvatīr apasyuvo na satyāḥ ||

1.079.02a आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदम् ।

1.079.02c शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिह स्तनयन्त्यभ्रा ॥

1.079.02a ā te suparṇā aminantam̐ evaiḥ kṛṣṇo nonāva vṛṣabho yadīdam |
1.079.02c śivābhir na smayamānābhir āgāt patanti miha stanayanty abhrā ||

1.079.03a यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः ।

1.079.03c अर्यमा मित्रो वरुणः परिज्मा त्वचं पृञ्चन्त्युपरस्य योनौ ॥

1.079.03a yad īm ṛtasya payasā piyāno nayann ṛtasya pathibhī rajiṣṭhaiḥ |
1.079.03c aryamā mitro varuṇaḥ parijmā tvacam pṛñcanty uparasya yonau ||

1.079.04a अग्ने वाजस्य गोमत ईशानः सहसो यहो ।

1.079.04c अस्मे धेहि जातवेदो महि श्रवः ॥

1.079.04a agne vājasya gomata īśānaḥ sahaso yaho |
1.079.04c asme dhehi jātavedo mahi śravaḥ ||

1.079.05a स इधानो वसुष्कविरग्निरीळेन्यो गिरा ।

1.079.05c रेवदस्मभ्यं पुर्वणीक दीदिहि ॥

1.079.05a sa idhāno vasuṣ kavir agnir īḷenyo girā |
1.079.05c revad asmabhyam purvaṇīka dīdihi ||

1.079.06a क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।

1.079.06c स तिग्मजम्भ रक्षसो दह प्रति ॥

1.079.06a kṣapo rājann uta tmanāgne vastor utoṣasaḥ |
1.079.06c sa tigmajambha rakṣaso daha prati ||

1.079.07a अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।

1.079.07c विश्वासु धीषु वन्द्य ॥

1.079.07a avā no agna ūtibhir gāyatrasya prabharmaṇi |

1.079.07c viśvāsu dhīṣu vandya ||

1.079.08a आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् ।

1.079.08c विश्वासु पृत्सु दुष्टरम् ॥

1.079.08a ā no agne rayim bhara satrāsāhaṁ vareṇyam |
1.079.08c viśvāsu pṛtsu duṣṭaram ||

1.079.09a आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।

1.079.09c मार्डीकं धेहि जीवसे ॥

1.079.09a ā no agne sucetunā rayiṁ viśvāyupoṣasam |
1.079.09c mārḍīkaṁ dhehi jīvase ||

1.079.10a प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये ।

1.079.10c भरस्व सुम्नयुर्गिरः ॥

1.079.10a pra pūtās tigmaśociṣe vāco gotamāgnaye |
1.079.10c bharasva sumnayur giraḥ ||

1.079.11a यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट सः ।

1.079.11c अस्माकमिद्वृधे भव ॥

1.079.11a yo no agne 'bhidāsaty anti dūre padīṣṭa saḥ |
1.079.11c asmākam id vṛdhe bhava ||

1.079.12a सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति ।

1.079.12c होता गृणीत उक्थ्यः ॥

1.079.12a sahasrākṣo vicarṣaṇir agnī rakṣāṁsi sedhati |
1.079.12c hotā gṛṇīta ukthyaḥ ||

1.080.01a इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् ।

1.080.01c शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥

1.080.01a itthā hi soma in made brahmā cakāra vardhanam |
1.080.01c śaviṣṭha vajrinn ojasā pṛthivyā niḥ śaśā ahim arcann anu svarājyam ||

1.080.02a स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।

1.080.02c येना वृत्रं निरद्भ्यो जघन्थ वज्रिन्नोजसार्चन्ननु स्वराज्यम् ॥

1.080.02a sa tvāmadad vṛṣā madaḥ somaḥ śyenābhṛtaḥ sutaḥ |
1.080.02c yenā vṛtraṁ nir adbhyo jaghantha vajrinn ojasārcann anu svarājyam ||

1.080.03a प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।

1.080.03c इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥

1.080.03a prehy abhīhi dhṛṣṇuhi na te vajro ni yaṁsate |
1.080.03c indra nṛmṇaṁ hi te śavo hano vṛtraṁ jayā apo 'rcann anu svarājyam ||

1.080.04a निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः ।

1.080.04c सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम् ॥

1.080.04a nir indra bhūmyā adhi vṛtraṁ jaghantha nir divaḥ |
1.080.04c sṛjā marutvatīr ava jīvadhanyā imā apo 'rcann anu svarājyam ||

1.080.05a इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।

1.080.05c अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु स्वराज्यम् ॥

1.080.05a indro vṛtrasya dodhataḥ sānuṁ vajreṇa hīḻitaḥ |
1.080.05c abhikramyāva jighnate 'paḥ sarmāya codayann arcann anu svarājyam ||

1.080.06a अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।

1.080.06c मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यम् ॥

1.080.06a adhi sānau ni jighnate vajreṇa śataparvaṇā |
1.080.06c mandāna indro andhasaḥ sakhibhyo gātum icchaty arcann anu svarājyam ||

1.080.07a इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।

1.080.07c यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यम् ॥

1.080.07a indra tubhyam id adrivo 'nuttaṁ vajrin vīryam |
1.080.07c yad dha tyam māyinam mṛgaṁ tam u tvam māyayāvadhīr arcann anu svarājyam ||

1.080.08a वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु ।

1.080.08c महत्त इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ॥

1.080.08a vi te vajrāso asthiran navatiṁ nāvyā3 anu |
1.080.08c mahat ta indra vīryam bāhvos te balaṁ hitam arcann anu svarājyam ||

1.080.09a सहस्रं साकमर्चत परि ष्टोभत विंशतिः ।

1.080.09c शतैनमन्वनोनवुरिन्द्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यम् ॥

1.080.09a sahasraṁ sākam arcata pari ṣṭobhata viṁśatiḥ |
1.080.09c śatainam anv anonavur indrāya brahmodyatam arcann anu svarājyam ||

1.080.10a इन्द्रो वृत्रस्य तविषीं निरहन्सहसा सहः ।

1.080.10c महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यम् ॥

1.080.10a indro vṛtrasya taviṣīṁ nir ahan sahasā sahaḥ |
1.080.10c mahat tad asya pauṁsyaṁ vṛtraṁ jaghanvām̐ asṛjad arcann anu svarājyam ||

1.080.11a इमे चित्तव मन्यवे वेपेते भियसा मही ।

1.080.11c यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यम् ॥

1.080.11a ime cit tava manyave vepete bhiyasā mahī |
1.080.11c yad indra vajrinn ojasā vṛtram marutvām̐ avadhīr arcann anu svarājyam ||

1.080.12a न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत् ।

1.080.12c अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यम् ॥

1.080.12a na vepasā na tanyatendraṁ vṛtro vi bībhayat |
1.080.12c abhy enaṁ vajra āyasaḥ sahasrabhṛṣṭir āyatārcann anu svarājyam ||

1.080.13a यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ।

1.080.13c अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम् ॥

1.080.13a yad vṛtraṁ tava cāśaniṁ vajreṇa samayodhayaḥ |
1.080.13c ahim indra jighāṁsato divi te badbadhe śavo 'rcann anu svarājyam ||

1.080.14a अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।

1.080.14c त्वष्टा चित्तव मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम् ॥

1.080.14a abhiṣṭane te adrivo yat sthā jagac ca rejate |

1.080.14c tvaṣṭā cit tava manyava indra vevijyate bhiyārcann anu svarājyam ||

1.080.15a नहि नु यादधीमसीन्द्रं को वीर्या परः ।

1.080.15c तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु स्वराज्यम् ॥

1.080.15a nahi nu yād adhīmasīndraṁ ko vīryā paraḥ |
1.080.15c tasmin nṛmṇam uta kratuṁ devā ojāṁsi saṁ dadhur arcann anu svarājyam ||

1.080.16a यामथर्वा मनुष्पिता दध्यङ्धियमत्नत ।

1.080.16c तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम् ॥

1.080.16a yām atharvā manuṣ pitā dadhyaṅ dhiyam atnata |
1.080.16c tasmin brahmāṇi pūrvathendra ukthā sam agmatārcann anu svarājyam ||

1.081.01a इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।

1.081.01c तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥

1.081.01a indro madāya vāvṛdhe śavase vṛtrahā nṛbhiḥ |
1.081.01c tam in mahatsv ājiṣūtem arbhe havāmahe sa vājeṣu pra no 'viṣat ||

1.081.02a असि हि वीर सेन्योऽसि भूरि पराददिः ।

1.081.02c असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥

1.081.02a asi hi vīra senyo 'si bhūri parādadiḥ |
1.081.02c asi dabhrasya cid vṛdho yajamānāya śikṣasi sunvate bhūri te vasu ||

1.081.03a यदुदीरत आजयो धृष्णवे धीयते धना ।

1.081.03c युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥

1.081.03a yad udīrata ājayo dhṛṣṇave dhīyate dhanā |
1.081.03c yukṣvā madacyutā harī kaṁ hanaḥ kaṁ vasau dadho 'smām̐ indra vasau dadhaḥ ||

1.081.04a क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः ।

1.081.04c श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे हस्तयोर्वज्रमायसम् ॥

1.081.04a kratvā mahām̐ anuṣvadham bhīma ā vāvṛdhe śavaḥ |
1.081.04c śriya ṛṣva upākayor ni śiprī harivān dadhe hastayor vajram āyasam ||

1.081.05a आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।

1.081.05c न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥

1.081.05a ā paprau pārthivaṁ rajo badbadhe rocanā divi |
1.081.05c na tvāvām̐ indra kaś cana na jāto na janiṣyate 'ti viśvaṁ vavakṣitha ||

1.081.06a यो अर्यो मर्तभोजनं पराददाति दाशुषे ।

1.081.06c इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः ॥

1.081.06a yo aryo martabhojanam parādadāti dāśuṣe |
1.081.06c indro asmabhyaṁ śikṣatu vi bhajā bhūri te vasu bhakṣīya tava rādhasaḥ ||

1.081.07a मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः ।

1.081.07c सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ॥

1.081.07a made-made hi no dadir yūthā gavām ṛjukratuḥ |
1.081.07c saṁ gṛbhāya purū śatobhayāhastyā vasu śiśīhi rāya ā bhara ||

1.081.08a मादयस्व सुते सचा शवसे शूर राधसे ।

1.081.08c विद्मा हि त्वा पुरूवसुमुप कामान्ससृज्महेऽथा नोऽविता भव ॥

1.081.08a mādayasva sute sacā śavase śūra rādhase |
1.081.08c vidmā hi tvā purūvasum upa kāmān sasṛjmahe 'thā no 'vitā bhava ||

1.081.09a एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।

1.081.09c अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥

1.081.09a ete ta indra jantavo viśvam puṣyanti vāryam |
1.081.09c antar hi khyo janānām aryo vedo adāśuṣāṁ teṣāṁ no veda ā bhara ||

1.082.01a उपो षु शृणुही गिरो मघवन्मातथा इव ।

1.082.01c यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्वैन्द्र ते हरी ॥

1.082.01a upo ṣu śṛṇuhī giro maghavan mātathā iva |
1.082.01c yadā naḥ sūnṛtāvataḥ kara ād arthayāsa id yojā nv aindra te harī ||

1.082.02a अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।

1.082.02c अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्वैन्द्र ते हरी ॥

1.082.02a akṣann amīmadanta hy ava priyā adhūṣata |
1.082.02c astoṣata svabhānavo viprā naviṣṭhayā matī yojā nv aindra te harī ||

1.082.03a सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।

1.082.03c प्र नूनं पूर्णवन्धुर स्तुतो याहि वशाँ अनु योजा न्वैन्द्र ते हरी ॥

1.082.03a susandṛśaṁ tvā vayam maghavan vandiṣīmahi |
1.082.03c pra nūnam pūrṇavandhura stuto yāhi vaśām̐ anu yojā nv aindra te harī ||

1.082.04a स घा तं वृषणं रथमधि तिष्ठाति गोविदम् ।

1.082.04c यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्वैन्द्र ते हरी ॥

1.082.04a sa ghā taṁ vṛṣaṇaṁ ratham adhi tiṣṭhāti govidam |
1.082.04c yaḥ pātraṁ hāriyojanam pūrṇam indra ciketati yojā nv aindra te harī ||

1.082.05a युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।

1.082.05c तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्वैन्द्र ते हरी ॥

1.082.05a yuktas te astu dakṣiṇa uta savyaḥ śatakrato |
1.082.05c tena jāyām upa priyām mandāno yāhy andhaso yojā nv aindra te harī ||

1.082.06a युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ।

1.082.06c उत्त्वा सुतासो रभसा अमन्दिषुः पूषण्वान्वज्रिन्समु पत्न्यामदः ॥

1.082.06a yunajmi te brahmaṇā keśinā harī upa pra yāhi dadhiṣe gabhastyoḥ |
1.082.06c ut tvā sutāso rabhasā amandiṣuḥ pūṣaṇvān vajrin sam u patnyāmadaḥ ||

1.083.01a अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः ।

1.083.01c तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥

1.083.01a aśvāvati prathamo goṣu gacchati suprāvīr indra martyas tavotibhiḥ |
1.083.01c tam it pṛṇakṣi vasunā bhavīyasā sindhum āpo yathābhito vicetasaḥ ||

1.083.02a आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।

1.083.02c प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ॥

1.083.02a  āpo na devīr upa yanti hotriyam avaḥ paśyanti vitataṁ yathā rajaḥ |
1.083.02c  prācair devāsaḥ pra ṇayanti devayum brahmapriyaṁ joṣayante varā iva ||

1.083.03a अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।

1.083.03c असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥

1.083.03a  adhi dvayor adadhā ukthyaṁ1 vaco yatasrucā mithunā yā saparyataḥ |
1.083.03c  asaṁyatto vrate te kṣeti puṣyati bhadrā śaktir yajamānāya sunvate ||

1.083.04a आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।

1.083.04c सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ॥

1.083.04a  ād aṅgirāḥ prathamaṁ dadhire vaya iddhāgnayaḥ śamyā ye sukṛtyayā |
1.083.04c  sarvam paṇeḥ sam avindanta bhojanam aśvāvantaṁ gomantam ā paśuṁ naraḥ ||

1.083.05a यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।

1.083.05c आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥

1.083.05a  yajñair atharvā prathamaḥ pathas tate tataḥ sūryo vratapā vena ājani |
1.083.05c  ā gā ājad uśanā kāvyaḥ sacā yamasya jātam amṛtaṁ yajāmahe ||

1.083.06a बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।

1.083.06c ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥

1.083.06a  barhir vā yat svapatyāya vṛjyate 'rko vā ślokam āghoṣate divi |
1.083.06c  grāvā yatra vadati kārur ukthya1s tasyed indro abhipitveṣu raṇyati ||

1.084.01a असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।

1.084.01c आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥

1.084.01a  asāvi soma indra te śaviṣṭha dhṛṣṇav ā gahi |
1.084.01c  ā tvā pṛṇaktv indriyaṁ rajaḥ sūryo na raśmibhiḥ ||

1.084.02a इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।

1.084.02c ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥

1.084.02a  indram id dharī vahato 'pratidhṛṣṭaśavasam |
1.084.02c  ṛṣīṇāṁ ca stutīr upa yajñaṁ ca mānuṣāṇām ||

1.084.03a आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।

1.084.03c अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥

1.084.03a ā tiṣṭha vṛtrahan ratham yuktā te brahmaṇā harī |
1.084.03c arvācīnaṁ su te mano grāvā kṛṇotu vagnunā ||

1.084.04a इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।

1.084.04c शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥

1.084.04a imam indra sutam piba jyeṣṭham amartyam madam |
1.084.04c śukrasya tvābhy akṣaran dhārā ṛtasya sādane ||

1.084.05a इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।

1.084.05c सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥

1.084.05a indrāya nūnam arcatokthāni ca bravītana |
1.084.05c sutā amatsur indavo jyeṣṭhaṁ namasyatā sahaḥ ||

1.084.06a नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।

1.084.06c नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥

1.084.06a nakiṣ ṭvad rathītaro harī yad indra yacchase |
1.084.06c nakiṣ ṭvānu majmanā nakiḥ svaśva ānaśe ||

1.084.07a य एक इद्विदयते वसु मर्ताय दाशुषे ।

1.084.07c ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥

1.084.07a ya eka id vidayate vasu martāya dāśuṣe |
1.084.07c īśāno apratiṣkuta indro aṅga ||

1.084.08a कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् ।

1.084.08c कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥

1.084.08a kadā martam arādhasam padā kṣumpam iva sphurat |
1.084.08c kadā naḥ śuśravad gira indro aṅga ||

1.084.09a यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।

1.084.09c उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥

1.084.09a yaś cid dhi tvā bahubhya ā sutāvām̐ āvivāsati |
1.084.09c ugraṁ tat patyate śava indro aṅga ||

1.084.10a स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।

1.084.10c या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥

1.084.10a svādor itthā viṣūvato madhvaḥ pibanti gauryaḥ |
1.084.10c yā indreṇa sayāvarīr vṛṣṇā madanti śobhase vasvīr anu svarājyam ||

1.084.11a ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।

1.084.11c प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥

1.084.11a tā asya pṛśanāyuvaḥ somaṁ śrīṇanti pṛśnayaḥ |
1.084.11c priyā indrasya dhenavo vajraṁ hinvanti sāyakaṁ vasvīr anu svarājyam ||

1.084.12a ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।

1.084.12c व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥

1.084.12a tā asya namasā sahaḥ saparyanti pracetasaḥ |
1.084.12c vratāny asya saścire purūṇi pūrvacittaye vasvīr anu svarājyam ||

1.084.13a इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।

1.084.13c जघान नवतीर्नव ॥

1.084.13a indro dadhīco asthabhir vṛtrāṇy apratiṣkutaḥ |
1.084.13c jaghāna navatīr nava ||

1.084.14a इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।

1.084.14c तद्विदच्छर्यणावति ॥

1.084.14a icchann aśvasya yac chiraḥ parvateṣv apaśritam |
1.084.14c tad vidac charyaṇāvati ||

1.084.15a अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।

1.084.15c इत्था चन्द्रमसो गृहे ॥

1.084.15a atrāha gor amanvata nāma tvaṣṭur apīcyam |

1.084.15c itthā candramaso gṛhe ||

1.084.16a को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।

1.084.16c आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥

1.084.16a ko adya yuṅkte dhuri gā ṛtasya śimīvato bhāmino durhṛṇāyūn |
1.084.16c āsanniṣūn hṛtsvaso mayobhūn ya eṣām bhṛtyām ṛṇadhat sa jīvāt ||

1.084.17a क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति ।

1.084.17c कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय ॥

1.084.17a ka īṣate tujyate ko bibhāya ko maṁsate santam indraṁ ko anti |
1.084.17c kas tokāya ka ibhāyota rāye 'dhi bravat tanve3 ko janāya ||

1.084.18a को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः ।

1.084.18c कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥

1.084.18a ko agnim īṭṭe haviṣā ghṛtena srucā yajātā ṛtubhir dhruvebhiḥ |
1.084.18c kasmai devā ā vahān āśu homa ko maṁsate vītihotraḥ sudevaḥ ||

1.084.19a त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।

1.084.19c न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥

1.084.19a tvam aṅga pra śaṁsiṣo devaḥ śaviṣṭha martyam |
1.084.19c na tvad anyo maghavann asti marḍitendra bravīmi te vacaḥ ||

1.084.20a मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।

1.084.20c विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥

1.084.20a mā te rādhāṁsi mā ta ūtayo vaso 'smān kadā canā dabhan |
1.084.20c viśvā ca na upamimīhi mānuṣa vasūni carṣaṇibhya ā ||

1.085.01a प्र ये शुम्भन्ते जनयो न सप्तयो यामन्रुद्रस्य सूनवः सुदंससः ।

1.085.01c रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ॥

1.085.01a pra ye śumbhante janayo na saptayo yāman rudrasya sūnavaḥ sudaṁsasaḥ |
1.085.01c rodasī hi marutaś cakrire vṛdhe madanti vīrā vidatheṣu ghṛṣvayaḥ ||

1.085.02a त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः ।

1.085.02c अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः ॥

1.085.02a ta ukṣitāso mahimānam āśata divi rudrāso adhi cakrire sadaḥ |
1.085.02c arcanto arkaṁ janayanta indriyam adhi śriyo dadhire pṛśnimātaraḥ ||

1.085.03a गोमातरो यच्छुभयन्ते अञ्जिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः ।

1.085.03c बाधन्ते विश्वमभिमातिनमप वर्त्मान्येषामनु रीयते घृतम् ॥

1.085.03a gomātaro yac chubhayante añjibhis tanūṣu śubhrā dadhire virukmataḥ |
1.085.03c bādhante viśvam abhimātinam apa vartmāny eṣām anu rīyate ghṛtam ||

1.085.04a वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिदोजसा ।

1.085.04c मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वम् ॥

1.085.04a vi ye bhrājante sumakhāsa ṛṣṭibhiḥ pracyāvayanto acyutā cid ojasā |
1.085.04c manojuvo yan maruto ratheṣv ā vṛṣavrātāsaḥ pṛṣatīr ayugdhvam ||

1.085.05a प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः ।

1.085.05c उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूम ॥

1.085.05a pra yad ratheṣu pṛṣatīr ayugdhvaṁ vāje adrim maruto raṁhayantaḥ |
1.085.05c utāruṣasya vi ṣyanti dhārāś carmevodabhir vy undanti bhūma ||

1.085.06a आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।

1.085.06c सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ॥

1.085.06a ā vo vahantu saptayo raghuṣyado raghupatvānaḥ pra jigāta bāhubhiḥ |
1.085.06c sīdatā barhir uru vaḥ sadas kṛtam mādayadhvam maruto madhvo andhasaḥ ||

1.085.07a तेऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः ।

1.085.07c विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥

1.085.07a te 'vardhanta svatavaso mahitvanā nākaṁ tasthur uru cakrire sadaḥ |
1.085.07c viṣṇur yad dhāvad vṛṣaṇam madacyutaṁ vayo na sīdann adhi barhiṣi priye ||

1.085.08a शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे ।

1.085.08c भयन्ते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो नरः ॥

1.085.08a śūrā ived yuyudhayo na jagmayaḥ śravasyavo na pṛtanāsu yetire |
1.085.08c bhayante viśvā bhuvanā marudbhyo rājāna iva tveṣasandṛśo naraḥ ||

1.085.09a त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।

1.085.09c धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम् ॥

1.085.09a tvaṣṭā yad vajraṁ sukṛtaṁ hiraṇyayaṁ sahasrabhṛṣṭiṁ svapā avartayat |
1.085.09c dhatta indro nary apāṁsi kartave 'han vṛtraṁ nir apām aubjad arṇavam ||

1.085.10a ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम् ।

1.085.10c धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥

1.085.10a ūrdhvaṁ nunudre 'vataṁ ta ojasā dādṛhāṇaṁ cid bibhidur vi parvatam |
1.085.10c dhamanto vāṇam marutaḥ sudānavo made somasya raṇyāni cakrire ||

1.085.11a जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे ।

1.085.11c आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥

1.085.11a jihmaṁ nunudre 'vataṁ tayā diśāsiñcann utsaṁ gotamāya tṛṣṇaje |
1.085.11c ā gacchantīm avasā citrabhānavaḥ kāmaṁ viprasya tarpayanta dhāmabhiḥ ||

1.085.12a या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।

1.085.12c अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥

1.085.12a yā vaḥ śarma śaśamānāya santi tridhātūni dāśuṣe yacchatādhi |
1.085.12c asmabhyaṁ tāni maruto vi yanta rayiṁ no dhatta vṛṣaṇaḥ suvīram ||

1.086.01a मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।

1.086.01c स सुगोपातमो जनः ॥

1.086.01a maruto yasya hi kṣaye pāthā divo vimahasaḥ |
1.086.01c sa sugopātamo janaḥ ||

1.086.02a यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् ।

1.086.02c मरुतः शृणुता हवम् ॥

1.086.02a yajñair vā yajñavāhaso viprasya vā matīnām |
1.086.02c marutaḥ śṛṇutā havam ||

1.086.03a उत वा यस्य वाजिनोऽनु विप्रमतक्षत ।
1.086.03c स गन्ता गोमति व्रजे ॥

1.086.03a uta vā yasya vājino 'nu vipram atakṣata |
1.086.03c sa gantā gomati vraje ||

1.086.04a अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु ।
1.086.04c उक्थं मदश्च शस्यते ॥

1.086.04a asya vīrasya barhiṣi sutaḥ somo diviṣṭiṣu |
1.086.04c uktham madaś ca śasyate ||

1.086.05a अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि ।
1.086.05c सूरं चित्सस्रुषीरिषः ॥

1.086.05a asya śroṣantv ā bhuvo viśvā yaś carṣaṇīr abhi |
1.086.05c sūraṁ cit sasruṣīr iṣaḥ ||

1.086.06a पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् ।
1.086.06c अवोभिश्चर्षणीनाम् ॥

1.086.06a pūrvībhir hi dadāśima śaradbhir maruto vayam |
1.086.06c avobhiś carṣaṇīnām ||

1.086.07a सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः ।
1.086.07c यस्य प्रयांसि पर्षथ ॥

1.086.07a subhagaḥ sa prayajyavo maruto astu martyaḥ |
1.086.07c yasya prayāṁsi parṣatha ||

1.086.08a शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।
1.086.08c विदा कामस्य वेनतः ॥

1.086.08a śaśamānasya vā naraḥ svedasya satyaśavasaḥ |
1.086.08c vidā kāmasya venataḥ ||

1.086.09a यूयं तत्सत्यशवस आविष्कर्त महित्वना ।

1.086.09c विध्यता विद्युता रक्षः ॥

1.086.09a yū̱yaṁ tat sa̍tyaśavasa ā̱viṣ ka̍rta mahitva̱nā |
1.086.09c vidhya̍tā vi̱dyutā̱ rakṣa̍ḥ ||

1.086.10a गूहता गुह्यं तमो वि यात विश्वमत्रिणम् ।

1.086.10c ज्योतिष्कर्ता यदुश्मसि ॥

1.086.10a gūha̍tā̱ guhya̱ṁ tamo̱ vi yā̍ta̱ viśva̍m a̱triṇa̍m |
1.086.10c jyoti̍ṣ kartā̱ yad u̱śmasi̍ ||

1.087.01a प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।

1.087.01c जुष्टतमासो नृतमासो अञ्जिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः ॥

1.087.01a pratva̍kṣasa̱ḥ prata̍vaso vira̱pśino 'nā̍natā̱ avi̍thurā ṛjī̱ṣi̍ṇaḥ |
1.087.01c juṣṭa̍tamāso̱ nṛta̍māso a̱ñjibhi̱r vy ā̍najre̱ ke ci̍d u̱srā i̍va̱ stṛbhi̍ḥ ||

1.087.02a उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।

1.087.02c श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥

1.087.02a u̱pa̱hva̱re̱ṣu̱ yad a̍cidhvaṁ ya̱yiṁ vaya̍ iva maruta̱ḥ kena̍ cit pa̱thā |
1.087.02c ścota̍nti̱ kośā̱ upa̍ vo̱ rathe̱ṣv ā ghṛ̱tam ukṣatā̱ madhu̍varṇa̱m arca̍te ||

1.087.03a प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।

1.087.03c ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥

1.087.03a praiṣā̱m ajme̍ṣu vithu̱reva̍ rejate̱ bhūmi̱r yāme̍ṣu̱ yad dha̍ yu̱ñjate̍ śu̱bhe |
1.087.03c te krī̱ḻayo̱ dhuna̍yo̱ bhrāja̍dṛṣṭayaḥ sva̱yam ma̍hi̱tvam pana̍yanta̱ dhūta̍yaḥ ||

1.087.04a स हि स्वसृत्पृषदश्वो युवा गणो३ऽया ईशानस्तविषीभिरावृतः ।

1.087.04c असि सत्य ऋणयावानेद्योऽस्या धियः प्राविताथा वृषा गणः ॥

1.087.04a sa hi sva̱sṛt pṛṣa̍daśvo̱ yuvā̍ ga̱ṇo3̱ 'yā ī̍śā̱nas tavi̍ṣībhi̱r āvṛ̍taḥ |
1.087.04c asi̍ sa̱tya ṛ̍ṇa̱yāvāne̍dyo̱ 'syā dhi̱yaḥ prāvi̍tāthā̱ vṛṣā̱ ga̱ṇaḥ ||

1.087.05a पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।

1.087.05c यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ॥

1.087.05a pituḥ pratnasya janmanā vadāmasi somasya jihvā pra jigāti cakṣasā |
1.087.05c yad īm indraṁ śamy ṛkvāṇa āśatād in nāmāni yajñiyāni dadhire ||

1.087.06a श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।

1.087.06c ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥

1.087.06a śriyase kam bhānubhiḥ sam mimikṣire te raśmibhis ta ṛkvabhiḥ sukhādayaḥ |
1.087.06c te vāśīmanta iṣmiṇo abhīravo vidre priyasya mārutasya dhāmnaḥ ||

1.088.01a आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।

1.088.01c आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥

1.088.01a ā vidyunmadbhir marutaḥ svarkai rathebhir yāta ṛṣṭimadbhir aśvaparṇaiḥ |
1.088.01c ā varṣiṣṭhayā na iṣā vayo na paptatā sumāyāḥ ||

1.088.02a तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ।

1.088.02c रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूम ॥

1.088.02a te 'ruṇebhir varam ā piśaṅgaiḥ śubhe kaṁ yānti rathatūrbhir aśvaiḥ |
1.088.02c rukmo na citraḥ svadhitīvān pavyā rathasya jaṅghananta bhūma ||

1.088.03a श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।

1.088.03c युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥

1.088.03a śriye kaṁ vo adhi tanūṣu vāśīr medhā vanā na kṛṇavanta ūrdhvā |
1.088.03c yuṣmabhyaṁ kam marutaḥ sujātās tuvidyumnāso dhanayante adrim ||

1.088.04a अहानि गृध्राः पर्या व आगुरिमां धियं वार्कार्यां च देवीम् ।

1.088.04c ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥

1.088.04a ahāni gṛdhrāḥ pary ā va āgur imāṁ dhiyaṁ vārkāryāṁ ca devīm |
1.088.04c brahma kṛṇvanto gotamāso arkair ūrdhvaṁ nunudra utsadhim pibadhyai ||

1.088.05a एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।

1.088.05c पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून् ॥

1.088.05a etat tyan na yojanam aceti sasvar ha yan maruto gotamo vaḥ |
1.088.05c paśyan hiraṇyacakrān ayodaṁṣṭrān vidhāvato varāhūn ||

1.088.06a एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।

1.088.06c अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥

1.088.06a eṣā syā vo maruto 'nubhartrī prati ṣṭobhati vāghato na vāṇī |
1.088.06c astobhayad vṛthāsām anu svadhām gabhastyoḥ ||

1.089.01a आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।

1.089.01c देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥

1.089.01a ā no bhadrāḥ kratavo yantu viśvato 'dabdhāso aparītāsa udbhidaḥ |
1.089.01c devā no yathā sadam id vṛdhe asann aprāyuvo rakṣitāro dive-dive ||

1.089.02a देवानां भद्रा सुमतिरृजूयतां देवानां रातिरभि नो नि वर्तताम् ।

1.089.02c देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥

1.089.02a devānām bhadrā sumatir ṛjūyatāṁ devānāṁ rātir abhi no ni vartatām |
1.089.02c devānāṁ sakhyam upa sedimā vayaṁ devā na āyuḥ pra tirantu jīvase ||

1.089.03a तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।

1.089.03c अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥

1.089.03a tān pūrvayā nividā hūmahe vayam bhagam mitram aditiṁ dakṣam asridham |
1.089.03c aryamaṇaṁ varuṇaṁ somam aśvinā sarasvatī naḥ subhagā mayas karat ||

1.089.04a तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।

1.089.04c तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥

1.089.04a tan no vāto mayobhu vātu bheṣajaṁ tan mātā pṛthivī tat pitā dyauḥ |
1.089.04c tad grāvāṇaḥ somasuto mayobhuvas tad aśvinā śṛṇutaṁ dhiṣṇyā yuvam ||

1.089.05a तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।

1.089.05c पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

1.089.05a tam īśānaṁ jagatas tasthuṣas patiṁ dhiyañjinvam avase hūmahe vayam |
1.089.05c pūṣā no yathā vedasām asad vṛdhe rakṣitā pāyur adabdhaḥ svastaye ||

1.089.06a स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

1.089.06c स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

1.089.06a svasti na indro vṛddhaśravāḥ svasti naḥ pūṣā viśvavedāḥ |

1.089.06c svasti nas tārkṣyo ariṣṭanemiḥ svasti no bṛhaspatir dadhātu ||

1.089.07a पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।

1.089.07c अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥

1.089.07a pṛṣadaśvā marutaḥ pṛśnimātaraḥ śubhaṁyāvāno vidatheṣu jagmayaḥ |

1.089.07c agnijihvā manavaḥ sūracakṣaso viśve no devā avasā gamann iha ||

1.089.08a भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।

1.089.08c स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

1.089.08a bhadraṁ karṇebhiḥ śṛṇuyāma devā bhadram paśyemākṣabhir yajatrāḥ |

1.089.08c sthirair aṅgais tuṣṭuvāṁsas tanūbhir vy aśema devahitaṁ yad āyuḥ ||

1.089.09a शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।

1.089.09c पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

1.089.09a śatam in nu śarado anti devā yatrā naś cakrā jarasaṁ tanūnām |

1.089.09c putrāso yatra pitaro bhavanti mā no madhyā rīriṣatāyur gantoḥ ||

1.089.10a अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

1.089.10c विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥

1.089.10a aditir dyaur aditir antarikṣam aditir mātā sa pitā sa putraḥ |

1.089.10c viśve devā aditiḥ pañca janā aditir jātam aditir janitvam ||

1.090.01a ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।

1.090.01c अर्यमा देवैः सजोषाः ॥

1.090.01a ṛjunītī no varuṇo mitro nayatu vidvān |

1.090.01c aryamā devaiḥ sajoṣāḥ ||

1.090.02a ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ।

1.090.02c व्रता रक्षन्ते विश्वाहा ॥

1.090.02a te hi vasvo vasavānās te apramūrā mahobhiḥ |
1.090.02c vratā rakṣante viśvāhā ||

1.090.03a ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः ।

1.090.03c बाधमाना अप द्विषः ॥

1.090.03a te asmabhyaṁ śarma yaṁsann amṛtā martyebhyaḥ |
1.090.03c bādhamānā apa dviṣaḥ ||

1.090.04a वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः ।

1.090.04c पूषा भगो वन्द्यासः ॥

1.090.04a vi naḥ pathaḥ suvitāya ciyantv indro marutaḥ |
1.090.04c pūṣā bhago vandyāsaḥ ||

1.090.05a उत नो धियो गोअग्राः पूषन्विष्णवेवयावः ।

1.090.05c कर्ता नः स्वस्तिमतः ॥

1.090.05a uta no dhiyo goagrāḥ pūṣan viṣṇav evayāvaḥ |
1.090.05c kartā naḥ svastimataḥ ||

1.090.06a मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।

1.090.06c माध्वीर्नः सन्त्वोषधीः ॥

1.090.06a madhu vātā ṛtāyate madhu kṣaranti sindhavaḥ |
1.090.06c mādhvīr naḥ santv oṣadhīḥ ||

1.090.07a मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।

1.090.07c मधु द्यौरस्तु नः पिता ॥

1.090.07a madhu naktam utoṣaso madhumat pārthivaṁ rajaḥ |
1.090.07c madhu dyaur astu naḥ pitā ||

1.090.08a मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।

1.090.08c माध्वीर्गावो भवन्तु नः ॥

1.090.08a madhumān no vanaspatir madhumām̐ astu sūryaḥ |

1.090.08c mādhvīr gāvo bhavantu naḥ ||

1.090.09a शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

1.090.09c शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥

1.090.09a śaṁ no mitraḥ śaṁ varuṇaḥ śaṁ no bhavatv aryamā |
1.090.09c śaṁ na indro bṛhaspatiḥ śaṁ no viṣṇur urukramaḥ ||

1.091.01a त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।

1.091.01c तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥

1.091.01a tvaṁ soma pra cikito manīṣā tvaṁ rajiṣṭham anu neṣi panthām |
1.091.01c tava praṇītī pitaro na indo deveṣu ratnam abhajanta dhīrāḥ ||

1.091.02a त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।

1.091.02c त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥

1.091.02a tvaṁ soma kratubhiḥ sukratur bhūs tvaṁ dakṣaiḥ sudakṣo viśvavedāḥ |
1.091.02c tvaṁ vṛṣā vṛṣatvebhir mahitvā dyumnebhir dyumny abhavo nṛcakṣāḥ ||

1.091.03a राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।

1.091.03c शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥

1.091.03a rājño nu te varuṇasya vratāni bṛhad gabhīraṁ tava soma dhāma |
1.091.03c śuciṣ ṭvam asi priyo na mitro dakṣāyyo aryamevāsi soma ||

1.091.04a या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।

1.091.04c तेभिर्नो विश्वैः सुमना अहेळन्राजन्सोम प्रति हव्या गृभाय ॥

1.091.04a yā te dhāmāni divi yā pṛthivyāṁ yā parvateṣv oṣadhīṣv apsu |
1.091.04c tebhir no viśvaiḥ sumanā aheḷan rājan soma prati havyā gṛbhāya ||

1.091.05a त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा ।

1.091.05c त्वं भद्रो असि क्रतुः ॥

1.091.05a tvaṁ somāsi satpatis tvaṁ rājota vṛtrahā |
1.091.05c tvam bhadro asi kratuḥ ||

1.091.06a त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे।

1.091.06c प्रि॒यस्तो॑त्रो॒ वन॒स्पति॑ः॥

1.091.06a tvaṁ ca̍ soma no̱ vaśo̍ jī̱vātu̱ṁ na ma̍rāmahe |
1.091.06c pri̱yasto̍tro̱ vana̱spati̍ḥ ||

1.091.07a त्वं सो॑म म॒हे भगं॒ त्वं यून॑ ऋ॒ताय॒ते।

1.091.07c दक्षं॑ दधासि जी॒वसे॑॥

1.091.07a tvaṁ so̍ma ma̱he bhaga̱ṁ tvaṁ yūna̍ ṛtāya̱te |
1.091.07c dakṣa̍ṁ dadhāsi jī̱vase̍ ||

1.091.08a त्वं न॑ः सोम वि॒श्वतो॒ रक्षा॑ राजन्नघा॒यत॑ः।

1.091.08c न रि॑ष्ये॒त्त्वाव॑तः॒ सखा॑॥

1.091.08a tvaṁ na̍ḥ soma vi̱śvato̱ rakṣa̍ rājann aghāya̱taḥ |
1.091.08c na ri̍ṣye̱t tvāva̍ta̱ḥ sakhā̍ ||

1.091.09a सोम॒ यास्ते॑ मयो॒भुव॑ ऊ॒तय॑ः सन्ति॑ दा॒शुषे॑।

1.091.09c ताभि॑र्नोऽवि॒ता भव॑॥

1.091.09a soma̱ yās te̍ mayo̱bhuva̍ ū̱taya̱ḥ santi̍ dā̱śuṣe̍ |
1.091.09c tābhi̍r no 'vi̱tā bha̍va ||

1.091.10a इ॒मं य॒ज्ञमि॒दं वचो॑ जुजुषा॒ण उ॒पाग॑हि।

1.091.10c सोम॒ त्वं नो॑ वृ॒धे भव॑॥

1.091.10a i̱maṁ ya̱jñam i̱daṁ vaco̍ jujuṣā̱ṇa u̱pāga̍hi |
1.091.10c soma̱ tvaṁ no̍ vṛ̱dhe bha̍va ||

1.091.11a सोम॑ गी॒र्भिष्ट्वा॑ व॒यं व॒र्धया॑मो वचो॒विद॑ः।

1.091.11c सु॒मृ॒ळी॒को न॒ आ वि॑श॥

1.091.11a soma̍ gī̱rbhiṣ ṭvā̍ va̱yaṁ va̱rdhayā̍mo vaco̱vida̍ḥ |
1.091.11c su̱mṛ̱ḷī̱ko na̱ ā vi̍śa ||

1.091.12a ग॒य॒स्फानो॑ अमीव॒हा व॑सु॒वित्पु॑ष्टि॒वर्ध॑नः।

1.091.12c सुमित्रः सोम नो भव ॥

1.091.12a gayasphāno amīvahā vasuvit puṣṭivardhanaḥ |
1.091.12c sumitraḥ soma no bhava ||

1.091.13a सोम रारन्धि नो हृदि गावो न यवसेष्वा ।

1.091.13c मर्य इव स्व ओक्ये ॥

1.091.13a soma rārandhi no hṛdi gāvo na yavaseṣv ā |
1.091.13c marya iva sva okye ||

1.091.14a यः सोम सख्ये तव रारणद्देव मर्त्यः ।

1.091.14c तं दक्षः सचते कविः ॥

1.091.14a yaḥ soma sakhye tava rāraṇad deva martyaḥ |
1.091.14c taṁ dakṣaḥ sacate kaviḥ ||

1.091.15a उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः ।

1.091.15c सखा सुशेव एधि नः ॥

1.091.15a uruṣyā ṇo abhiśasteḥ soma ni pāhy aṁhasaḥ |
1.091.15c sakhā suśeva edhi naḥ ||

1.091.16a आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।

1.091.16c भवा वाजस्य संगथे ॥

1.091.16a ā pyāyasva sam etu te viśvataḥ soma vṛṣṇyam |
1.091.16c bhavā vājasya saṅgathe ||

1.091.17a आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।

1.091.17c भवा नः सुश्रवस्तमः सखा वृधे ॥

1.091.17a ā pyāyasva madintama soma viśvebhir aṁśubhiḥ |
1.091.17c bhavā naḥ suśravastamaḥ sakhā vṛdhe ||

1.091.18a सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।

1.091.18c आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥

1.091.18a saṁ te payāṁsi sam u yantu vājāḥ saṁ vṛṣṇyāny abhimātiṣāhaḥ |

1.091.18c āpyāyamāno amṛtāya soma divi śravāṁsy uttamāni dhiṣva ||

1.091.19a या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।

1.091.19c गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥

1.091.19a yā te dhāmāni haviṣā yajanti tā te viśvā paribhūr astu yajñam |

1.091.19c gayasphānaḥ prataraṇaḥ suvīro 'vīrahā pra carā soma duryān ||

1.091.20a सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।

1.091.20c सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥

1.091.20a somo dhenuṁ somo arvantam āśuṁ somo vīraṁ karmaṇyaṁ dadāti |

1.091.20c sādanyaṁ vidathyaṁ sabheyaṁ pitṛśravaṇaṁ yo dadāśad asmai ||

1.091.21a अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।

1.091.21c भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥

1.091.21a aṣāḷhaṁ yutsu pṛtanāsu papriṁ svarṣām apsāṁ vṛjanasya gopām |

1.091.21c bhareṣujāṁ sukṣitiṁ suśravasaṁ jayantaṁ tvām anu madema soma ||

1.091.22a त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।

1.091.22c त्वमा ततन्थोर्व१न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥

1.091.22a tvam imā oṣadhīḥ soma viśvās tvam apo ajanayas tvaṁ gāḥ |

1.091.22c tvam ā tatanthorv a1ntarikṣaṁ tvaṁ jyotiṣā vi tamo vavartha ||

1.091.23a देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।

1.091.23c मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥

1.091.23a devena no manasā deva soma rāyo bhāgaṁ sahasāvann abhi yudhya |

1.091.23c mā tvā tanad īśiṣe vīryasyobhayebhyaḥ pra cikitsā gaviṣṭau ||

1.092.01a एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।

1.092.01c निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥

1.092.01a etā u tyā uṣasaḥ ketum akrata pūrve ardhe rajaso bhānum añjate |

1.092.01c niṣkṛṇvānā āyudhānīva dhṛṣṇavaḥ prati gāvo 'ruṣīr yanti mātaraḥ ||

1.092.02a उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।

1.092.02c अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥

1.092.02a ud apaptann aruṇā bhānavo vṛthā svāyujo aruṣīr gā ayukṣata |
1.092.02c akrann uṣāso vayunāni pūrvathā ruśantam bhānum aruṣīr aśiśrayuḥ ||

1.092.03a अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।

1.092.03c इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥

1.092.03a arcanti nārīr apaso na viṣṭibhiḥ samānena yojanenā parāvataḥ |
1.092.03c iṣaṁ vahantīḥ sukṛte sudānave viśved aha yajamānāya sunvate ||

1.092.04a अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् ।

1.092.04c ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्यु१षा आवर्तमः ॥

1.092.04a adhi peśāṁsi vapate nṛtūr ivāporṇute vakṣa usreva barjaham |
1.092.04c jyotir viśvasmai bhuvanāya kṛṇvatī gāvo na vrajaṁ vy u1ṣā āvartamaḥ ||

1.092.05a प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।

1.092.05c स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥

1.092.05a praty arcī ruśad asyā adarśi vi tiṣṭhate bādhate kṛṣṇam abhvam |
1.092.05c svaruṁ na peśo vidatheṣv añjañ citraṁ divo duhitā bhānum aśret ||

1.092.06a अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।

1.092.06c श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥

1.092.06a atāriṣma tamasas pāram asyoṣā ucchantī vayunā kṛṇoti |
1.092.06c śriye chando na smayate vibhātī supratīkā saumanasāyājīgaḥ ||

1.092.07a भास्वती नेत्री सूनृतानां दिव स्तवे दुहिता गोतमेभिः ।

1.092.07c प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥

1.092.07a bhāsvatī netrī sūnṛtānāṁ diva stave duhitā gotamebhiḥ |
1.092.07c prajāvato nṛvato aśvabudhyān uṣo goagrām̐ upa māsi vājān ||

1.092.08a उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।

1.092.08c सु॒दं॑ससा॒ श्रव॑सा॒ या वि॒भासि॒ वाज॑प्रसूता सुभगे बृ॒हन्त॑म् ॥

1.092.08a uṣa̱s tam a̍śyāṁ ya̱śasa̍ṁ su̱vīra̍ṁ dā̱saprava̍rgaṁ ra̱yim aśva̍budhyam |
1.092.08c su̱da̍ṁsasā̱ śrava̍sā̱ yā vi̱bhāsi̱ vāja̍prasūtā subhage bṛ̱hanta̍m ||

1.092.09a विश्वा॑नि दे॒वी भुव॑नाभि॒चक्ष्या॑ प्रती॒ची चक्षु॑रुर्वि॒या वि भा॑ति ।

1.092.09c विश्वं॑ जी॒वं च॒रसे॑ बो॒धय॑न्ती॒ विश्व॑स्य॒ वाच॑मविदन्मना॒योः ॥

1.092.09a viśvā̍ni de̱vī bhuvanā̍bhi̱cakṣyā̍ pratī̱cī cakṣu̍r urvi̱yā vi bhā̍ti |
1.092.09c viśva̍ṁ jī̱vaṁ ca̱rase̍ bo̱dhaya̍ntī̱ viśva̍sya̱ vāca̍m avidan manā̱yoḥ ||

1.092.10a पुनः॑पुन॒र्जाय॑माना पुरा॒णी स॑मा॒नं वर्ण॑म॒भि शुम्भ॑माना ।

1.092.10c श्व॒घ्नीव॑ कृ॒त्नुर्विज॑ आमिना॒ना मर्त॑स्य दे॒वी ज॒रय॒न्त्यायुः॑ ॥

1.092.10a puna̍ḥ-puna̱r jāya̍mānā purā̱ṇī sa̍mā̱naṁ varṇa̍m a̱bhi śumbha̍mānā |
1.092.10c śva̱ghnīva̍ kṛ̱tnur vija̍ āminā̱nā marta̍sya de̱vī ja̱raya̱nty āyu̍ḥ ||

1.092.11a व्यू॒र्ण्व॒ती दि॒वो अ॒न्ताँ॑ अबो॒ध्यप॒ स्वसा॑रं सनु॒तर्यु॑योति ।

1.092.11c प्र॒मि॒न॒ती म॑नु॒ष्या॑ यु॒गानि॒ योषा॑ जा॒रस्य॒ चक्ष॑सा॒ वि भा॑ति ॥

1.092.11a vyū̱rṇva̱tī di̱vo antā̍m̐ abo̱dhy apa̱ svasā̍raṁ sanu̱tar yu̍yoti |
1.092.11c pra̱mi̱na̱tī ma̍nu̱ṣyā̍ yu̱gāni̱ yoṣā̍ jā̱rasya̱ cakṣa̍sā̱ vi bhā̍ti ||

1.092.12a प॒शून्न चि॒त्रा सु॒भगा॑ प्रथा॒ना सिन्धु॒र्न क्षोद॑ उर्वि॒या व्य॑श्वैत् ।

1.092.12c अमि॑नती॒ दैव्या॑नि व्र॒तानि॒ सूर्य॑स्य चेति र॒श्मिभि॑र्दृशा॒ना ॥

1.092.12a pa̱śūn na ci̱trā su̱bhagā̍ prathā̱nā sindhu̱r na kṣoda̍ urvi̱yā vy a̍śvait |
1.092.12c ami̍natī̱ daivyā̍ni vra̱tāni̱ sūrya̍sya ceti ra̱śmibhi̍r dṛ̱śā̱nā ||

1.092.13a उष॒स्तच्चि॒त्रमा भ॑रा॒स्मभ्यं॑ वाजिनीवति ।

1.092.13c येन॑ तो॒कं च॒ तन॑यं च॒ धाम॑हे ॥

1.092.13a uṣa̱s tac ci̱tram ā bha̍rā̱smabhya̍ṁ vājinīvati |
1.092.13c yena̍ to̱kaṁ ca̱ tana̍yaṁ ca̱ dhāma̍he ||

1.092.14a उषो॑ अ॒द्येह गो॑म॒त्यश्वा॑वति विभावरि ।

1.092.14c रे॒व॒दस्मे॑ व्युच्छ सूनृतावति ॥

1.092.14a uṣo̍ a̱dyeha go̍ma̱ty aśvā̍vati vibhāvari |

1.092.14c revad asme vy uccha sūnṛtāvati ||

1.092.15a युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।

1.092.15c अथा नो विश्वा सौभगान्या वह ॥

1.092.15a yukṣvā hi vājinīvaty aśvām̐ adyāruṇām̐ uṣaḥ |
1.092.15c athā no viśvā saubhagāny ā vaha ||

1.092.16a अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।

1.092.16c अर्वाग्रथं समनसा नि यच्छतम् ॥

1.092.16a aśvinā vartir asmad ā gomad dasrā hiraṇyavat |
1.092.16c arvāg rathaṁ samanasā ni yacchatam ||

1.092.17a यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।

1.092.17c आ न ऊर्जं वहतमश्विना युवम् ॥

1.092.17a yāv itthā ślokam ā divo jyotir janāya cakrathuḥ |
1.092.17c ā na ūrjaṁ vahatam aśvinā yuvam ||

1.092.18a एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।

1.092.18c उषर्बुधो वहन्तु सोमपीतये ॥

1.092.18a eha devā mayobhuvā dasrā hiraṇyavartanī |
1.092.18c uṣarbudho vahantu somapītaye ||

1.093.01a अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् ।

1.093.01c प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥

1.093.01a agnīṣomāv imaṁ su me śṛṇutaṁ vṛṣaṇā havam |
1.093.01c prati sūktāni haryataṁ bhavataṁ dāśuṣe mayaḥ ||

1.093.02a अग्नीषोमा यो अद्य वामिदं वचः सपर्यति ।

1.093.02c तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम् ॥

1.093.02a agnīṣomā yo adya vām idaṁ vacaḥ saparyati |
1.093.02c tasmai dhattaṁ suvīryaṁ gavām poṣaṁ svaśvyam ||

1.093.03a अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् ।

1.093.03c स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥

1.093.03a agnīṣomā ya āhutiṁ yo vāṁ dāśād dhaviṣkṛtim |
1.093.03c sa prajayā suvīryaṁ viśvam āyur vy aśnavat ||

1.093.04a अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।

1.093.04c अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥

1.093.04a agnīṣomā ceti tad vīryaṁ vāṁ yad amuṣṇītam avasam paṇiṁ gāḥ |
1.093.04c avātiratam bṛsayasya śeṣo 'vindataṁ jyotir ekam bahubhyaḥ ||

1.093.05a युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।

1.093.05c युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥

1.093.05a yuvam etāni divi rocanāny agniś ca soma sakratū adhattam |
1.093.05c yuvaṁ sindhūm̐r abhiśaster avadyād agnīṣomāv amuñcataṁ gṛbhītān ||

1.093.06a आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।

1.093.06c अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥

1.093.06a ānyaṁ divo mātariśvā jabhārāmathnād anyam pari śyeno adreḥ |
1.093.06c agnīṣomā brahmaṇā vāvṛdhānoruṁ yajñāya cakrathur u lokam ||

1.093.07a अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।

1.093.07c सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥

1.093.07a agnīṣomā haviṣaḥ prasthitasya vītaṁ haryataṁ vṛṣaṇā juṣethām |
1.093.07c suśarmāṇā svavasā hi bhūtam athā dhattaṁ yajamānāya śaṁ yoḥ ||

1.093.08a यो अग्नीषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन ।

1.093.08c तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् ॥

1.093.08a yo agnīṣomā haviṣā saparyād devadrīcā manasā yo ghṛtena |
1.093.08c tasya vrataṁ rakṣatam pātam aṁhaso viśe janāya mahi śarma yacchatam ||

1.093.09a अग्नीषोमा सवेदसा सहूती वनतं गिरः ।

1.093.09c सं देवत्रा बभूवथुः ॥

1.093.09a agnīṣomā savedasā sahūtī vanataṁ giraḥ |
1.093.09c saṁ devatrā babhūvathuḥ ||

1.093.10a अग्नीषोमावनेन वां यो वां घृतेन दाशति ।

1.093.10c तस्मै दीदयतं बृहत् ॥

1.093.10a agnīṣomāv anena vāṁ yo vāṁ ghṛtena dāśati |
1.093.10c tasmai dīdayatam bṛhat ||

1.093.11a अग्नीषोमाविमानि नो युवं हव्या जुजोषतम् ।

1.093.11c आ यातमुप नः सचा ॥

1.093.11a agnīṣomāv imāni no yuvaṁ havyā jujoṣatam |
1.093.11c ā yātam upa naḥ sacā ||

1.093.12a अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।

1.093.12c अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥

1.093.12a agnīṣomā pipṛtam arvato na ā pyāyantām usriyā havyasūdaḥ |
1.093.12c asme balāni maghavatsu dhattaṁ kṛṇutaṁ no adhvaraṁ śruṣṭimantam ||

1.094.01a इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।

1.094.01c भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.01a imaṁ stomam arhate jātavedase ratham iva sam mahemā manīṣayā |
1.094.01c bhadrā hi naḥ pramatir asya saṁsady agne sakhye mā riṣāmā vayaṁ tava ||

1.094.02a यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम् ।

1.094.02c स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥

1.094.02a yasmai tvam āyajase sa sādhaty anarvā kṣeti dadhate suvīryam |
1.094.02c sa tūtāva nainam aśnoty aṁhatir agne sakhye mā riṣāmā vayaṁ tava ||

1.094.03a शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।

1.094.03c त्वमादित्याँ आ वह तान्ह्यु१श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.03a śakema tvā samidhaṁ sādhayā dhiyas tve devā havir adanty āhutam |
1.094.03c tvam ādityām̐ ā vaha tān hy u1śmasy agne sakhye mā riṣāmā vayaṁ tava ||

1.094.04a भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।

1.094.04c जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥

1.094.04a bharāmedhmaṁ kṛṇavāmā havīṁṣi te citayantaḥ parvaṇā-parvaṇā vayam |
1.094.04c jīvātave prataraṁ sādhayā dhiyo 'gne sakhye mā riṣāmā vayaṁ tava ||

1.094.05a विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।

1.094.05c चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.05a viśāṁ gopā asya caranti jantavo dvipac ca yad uta catuṣpad aktubhiḥ |
1.094.05c citraḥ praketa uṣaso mahām̐ asy agne sakhye mā riṣāmā vayaṁ tava ||

1.094.06a त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।

1.094.06c विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.06a tvam adhvaryur uta hotāsi pūrvyaḥ praśāstā potā januṣā purohitaḥ |
1.094.06c viśvā vidvām̐ ārtvijyā dhīra puṣyasy agne sakhye mā riṣāmā vayaṁ tava ||

1.094.07a यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे ।

1.094.07c रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.07a yo viśvataḥ supratīkaḥ sadṛṅṅ asi dūre cit san taḷid ivāti rocase |
1.094.07c rātryāś cid andho ati deva paśyasy agne sakhye mā riṣāmā vayaṁ tava ||

1.094.08a पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः ।

1.094.08c तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥

1.094.08a pūrvo devā bhavatu sunvato ratho 'smākaṁ śaṁso abhy astu dūḍhyaḥ |
1.094.08c tad ā jānītota puṣyatā vaco 'gne sakhye mā riṣāmā vayaṁ tava ||

1.094.09a वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः ।

1.094.09c अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥

1.094.09a vadhair duḥśaṁsām̐ apa dūḍhyo jahi dūre vā ye anti vā ke cid atriṇaḥ |
1.094.09c athā yajñāya gṛṇate sugaṁ kṛdhy agne sakhye mā riṣāmā vayaṁ tava ||

1.094.10a यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।

1.094.10c आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥

1.094.10a yad ayukthā aruṣā rohitā rathe vātajūtā vṛṣabhasyeva te ravaḥ |
1.094.10c ād invasi vanino dhūmaketunāgne sakhye mā riṣāmā vayaṁ tava ||

1.094.11a अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन् ।

1.094.11c सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव ॥

1.094.11a adha svanād uta bibhyuḥ patatriṇo drapsā yat te yavasādo vy asthiran |
1.094.11c sugaṁ tat te tāvakebhyo rathebhyo 'gne sakhye mā riṣāmā vayaṁ tava ||

1.094.12a अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः ।

1.094.12c मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥

1.094.12a ayam mitrasya varuṇasya dhāyase 'vayātām marutāṁ heḷo adbhutaḥ |
1.094.12c mṛḷā su no bhūtv eṣām manaḥ punar agne sakhye mā riṣāmā vayaṁ tava ||

1.094.13a देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ।

1.094.13c शर्मन्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव ॥

1.094.13a devo devānām asi mitro adbhuto vasur vasūnām asi cārur adhvare |
1.094.13c śarman syāma tava saprathastame 'gne sakhye mā riṣāmā vayaṁ tava ||

1.094.14a तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।

1.094.14c दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव ॥

1.094.14a tat te bhadraṁ yat samiddhaḥ sve dame somāhuto jarase mṛḷayattamaḥ |
1.094.14c dadhāsi ratnaṁ draviṇaṁ ca dāśuṣe 'gne sakhye mā riṣāmā vayaṁ tava ||

1.094.15a यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।

1.094.15c यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥

1.094.15a yasmai tvaṁ sudraviṇo dadāśo 'nāgāstvam adite sarvatātā |
1.094.15c yam bhadreṇa śavasā codayāsi prajāvatā rādhasā te syāma ||

1.094.16a स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।

1.094.16c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.094.16a sa tvam agne saubhagatvasya vidvān asmākam āyuḥ pra tireha deva |
1.094.16c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.095.01a द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।

1.095.01c हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥

1.095.01a dve virūpe carataḥ svarthe anyānyā vatsam upa dhāpayete |
1.095.01c harir anyasyām bhavati svadhāvāñ chukro anyasyāṁ dadṛśe suvarcāḥ ||

1.095.02a दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम् ।

1.095.02c तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति ॥

1.095.02a daśemaṁ tvaṣṭur janayanta garbham atandrāso yuvatayo vibhṛtram |
1.095.02c tigmānīkaṁ svayaśasaṁ janeṣu virocamānam pari ṣīṁ nayanti ||

1.095.03a त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु ।

1.095.03c पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु ॥

1.095.03a trīṇi jānā pari bhūṣanty asya samudra ekaṁ divy ekam apsu |
1.095.03c pūrvām anu pra diśam pārthivānām ṛtūn praśāsad vi dadhāv anuṣṭhu ||

1.095.04a क इमं वो निण्यमा चिकेत वत्सो मातॄर्जनयत स्वधाभिः ।

1.095.04c बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान् ॥

1.095.04a ka imaṁ vo niṇyam ā ciketa vatso mātṝr janayata svadhābhiḥ |
1.095.04c bahvīnāṁ garbho apasām upasthān mahān kavir niś carati svadhāvān ||

1.095.05a आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।

1.095.05c उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते ॥

1.095.05a āviṣṭyo vardhate cārur āsu jihmānām ūrdhvaḥ svayaśā upasthe |
1.095.05c ubhe tvaṣṭur bibhyatur jāyamānāt pratīcī siṁham prati joṣayete ||

1.095.06a उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः ।

1.095.06c स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥

1.095.06a ubhe bhadre joṣayete na mene gāvo na vāśrā upa tasthur evaiḥ |
1.095.06c sa dakṣāṇāṁ dakṣapatir babhūvāñjanti yaṁ dakṣiṇato havirbhiḥ ||

1.095.07a उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।

1.095.07c उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥

1.095.07a ud yaṁyamīti saviteva bāhū ubhe sicau yatate bhīma ṛñjan |
1.095.07c uc chukram atkam ajate simasmān navā mātṛbhyo vasanā jahāti ||

1.095.08a त्वेषं रूपं कृणुत उत्तरं यत्सम्पृञ्चानः सदने गोभिरद्भिः ।

1.095.08c कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥

1.095.08a tveṣaṁ rūpaṁ kṛṇuta uttaraṁ yat sampṛñcānaḥ sadane gobhir adbhiḥ |
1.095.08c kavir budhnam pari marmṛjyate dhīḥ sā devatātā samitir babhūva ||

1.095.09a उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।

1.095.09c विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥

1.095.09a uru te jrayaḥ pary eti budhnaṁ virocamānam mahiṣasya dhāma |
1.095.09c viśvebhir agne svayaśobhir iddho 'dabdhebhiḥ pāyubhiḥ pāhy asmān ||

1.095.10a धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम् ।

1.095.10c विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥

1.095.10a dhanvan srotaḥ kṛṇute gātum ūrmiṁ śukrair ūrmibhir abhi nakṣati kṣām |
1.095.10c viśvā sanāni jaṭhareṣu dhatte 'ntar navāsu carati prasūṣu ||

1.095.11a एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।

1.095.11c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.095.11a evā no agne samidhā vṛdhāno revat pāvaka śravase vi bhāhi |
1.095.11c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.096.01a स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।

1.096.01c आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.01a sa pratnathā sahasā jāyamānaḥ sadyaḥ kāvyāni baḷ adhatta viśvā |
1.096.01c āpaś ca mitraṁ dhiṣaṇā ca sādhan devā agniṁ dhārayan draviṇodām ||

1.096.02a स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।

1.096.02c विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.02a sa pūrvayā nividā kavyatāyor imāḥ prajā ajanayan manūnām |
1.096.02c vivasvatā cakṣasā dyām apaś ca devā agniṁ dhārayan draviṇodām ||

1.096.03a तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानम् ।

1.096.03c ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.03a tam īlata prathamaṁ yajñasādhaṁ viśa ārīr āhutam ṛñjasānam |
1.096.03c ūrjaḥ putram bharataṁ sṛpradānuṁ devā agniṁ dhārayan draviṇodām ||

1.096.04a स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित् ।

1.096.04c विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.04a sa mātariśvā puruvārapuṣṭir vidad gātuṁ tanayāya svarvit |
1.096.04c viśāṁ gopā janitā rodasyor devā agniṁ dhārayan draviṇodām ||

1.096.05a नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची ।

1.096.05c द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.05a naktoṣāsā varṇam āmemyāne dhāpayete śiśum ekaṁ samīcī |
1.096.05c dyāvākṣāmā rukmo antar vi bhāti devā agniṁ dhārayan draviṇodām ||

1.096.06a रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः ।

1.096.06c अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.06a rāyo budhnaḥ saṅgamano vasūnāṁ yajñasya ketur manmasādhano veḥ |
1.096.06c amṛtatvaṁ rakṣamāṇāsa enaṁ devā agniṁ dhārayan draviṇodām ||

1.096.07a नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।

1.096.07c सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदाम् ॥

1.096.07a nū ca purā ca sadanaṁ rayīṇāṁ jātasya ca jāyamānasya ca kṣām |
1.096.07c sataś ca gopām bhavataś ca bhūrer devā agniṁ dhārayan draviṇodām ||

1.096.08a द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।

1.096.08c द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥

1.096.08a draviṇodā draviṇasas turasya draviṇodāḥ sanarasya pra yaṁsat |
1.096.08c draviṇodā vīravatīm iṣaṁ no draviṇodā rāsate dīrgham āyuḥ ||

1.096.09a एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।

1.096.09c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.096.09a evā no agne samidhā vṛdhāno revat pāvaka śravase vi bhāhi |
1.096.09c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.097.01a अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम् ।

1.097.01c अप नः शोशुचदघम् ॥

1.097.01a apa naḥ śośucad agham agne śuśugdhy ā rayim |
1.097.01c apa naḥ śośucad agham ||

1.097.02a सुक्षेत्रिया सुगातुया वसूया च यजामहे ।

1.097.02c अप नः शोशुचदघम् ॥

1.097.02a sukṣetriyā sugātuyā vasūyā ca yajāmahe |
1.097.02c apa naḥ śośucad agham ||

1.097.03a प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः ।

1.097.03c अप नः शोशुचदघम् ॥

1.097.03a pra yad bhandiṣṭha eṣām prāsmākāsaś ca sūrayaḥ |
1.097.03c apa naḥ śośucad agham ||

1.097.04a प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् ।

1.097.04c अप नः शोशुचदघम् ॥

1.097.04a pra yat te agne sūrayo jāyemahi pra te vayam |
1.097.04c apa naḥ śośucad agham ||

1.097.05a प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः ।

1.097.05c अप नः शोशुचदघम् ॥

1.097.05a pra yad agneḥ sahasvato viśvato yanti bhānavaḥ |
1.097.05c apa naḥ śośucad agham ||

1.097.06a त्वं हि विश्वतोमुख विश्वतः परिभूरसि ।

1.097.06c अप नः शोशुचदघम् ॥

1.097.06a tvaṁ hi viśvatomukha viśvataḥ paribhūr asi |
1.097.06c apa naḥ śośucad agham ||

1.097.07a द्विषो नो विश्वतोमुखाति नावेव पारय ।

1.097.07c अप नः शोशुचदघम् ॥

1.097.07a dviṣo no viśvatomukhāti nāveva pāraya |
1.097.07c apa naḥ śośucad agham ||

1.097.08a स नः सिन्धुमिव नावयाति पर्षा स्वस्तये ।

1.097.08c अप नः शोशुचदघम् ॥

1.097.08a sa naḥ sindhum iva nāvayāti parṣā svastaye |
1.097.08c apa naḥ śośucad agham ||

1.098.01a वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।

1.098.01c इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥

1.098.01a vaiśvānarasya sumatau syāma rājā hi kam bhuvanānām abhiśrīḥ |
1.098.01c ito jāto viśvam idaṁ vi caṣṭe vaiśvānaro yatate sūryeṇa ||

1.098.02a पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।

1.098.02c वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥

1.098.02a pṛṣṭo divi pṛṣṭo agniḥ pṛthivyām pṛṣṭo viśvā oṣadhīr ā viveśa |
1.098.02c vaiśvānaraḥ sahasā pṛṣṭo agniḥ sa no divā sa riṣaḥ pātu naktam ||

1.098.03a वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचन्ताम् ।

1.098.03c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.098.03a vaiśvānara tava tat satyam astv asmān rāyo maghavānaḥ sacantām |
1.098.03c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.099.01a जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।

1.099.01c स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

1.099.01a jā̱tave̍dase sunavāma̱ soma̍m arātīya̱to ni da̍hāti̱ veda̍ḥ |
1.099.01c sa na̍ḥ parṣa̱d ati̍ du̱rgāṇi̱ viśvā̍ nā̱veva̱ sindhu̍ṁ duri̱tāty a̱gniḥ ||

1.100.01a स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।

1.100.01c सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.01a sa yo vṛṣā̱ vṛṣṇye̍bhiḥ̱ samo̍kā ma̱ho di̱vaḥ pṛ̍thi̱vyāś ca̍ sa̱mrāṭ |
1.100.01c sa̱tī̱nasa̍tvā̱ havyo̱ bhare̍ṣu ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.02a यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।

1.100.02c वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.02a yasyānā̍pta̱ḥ sūrya̍syeva̱ yāmo̱ bhare̍-bhare vṛtra̱hā śuṣmo̱ asti̍ |
1.100.02c vṛṣa̍ntama̱ḥ sakhi̍bhiḥ̱ svebhi̱r evai̍r ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.03a दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।

1.100.03c तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.03a di̱vo na yasya̱ reta̍so̱ dughā̍nā̱ḥ panthā̍so̱ yanti̱ śava̱sāpa̍rītāḥ |
1.100.03c ta̱raddve̍ṣāḥ sāsa̱hiḥ pauṁsye̍bhir ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.04a सो अङ्गिरोभिरङ्गिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।

1.100.04c ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.04a so aṅgi̍robhi̱r aṅgi̍rastamo bhū̱d vṛṣā̱ vṛṣa̍bhiḥ̱ sakhi̍bhiḥ̱ sakhā̱ san |
1.100.04c ṛ̱gmibhi̍r ṛ̱gmī gā̱tubhi̱r jyeṣṭho̍ ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.05a स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान् ।

1.100.05c सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.05a sa sū̱nubhi̱r na ru̱drebhi̱r ṛbhvā̍ nṛ̱ṣāhye̍ sāsa̱hvāṁ̐ a̱mitrā̍n |
1.100.05c sanī̍ḷ̱ebhiḥ śravasyā̍ni̱ tūrva̍n ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.06a स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।

1.100.06c अस्मिन्नहन्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.06a sa ma̍nyu̱mīḥ sa̱mada̍nasya ka̱rtāsmāke̍bhi̱r nṛbhi̱ḥ sūrya̍ṁ sanat |
1.100.06c a̱sminn aha̱n satpa̍tiḥ puruhū̱to ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.07a तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।

1.100.07c स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.07a tam ūtayo̍ raṇaya̱ñ chūra̍sātau̱ taṁ kṣema̍sya kṣi̱taya̍ḥ kṛṇvata̱ trām |
1.100.07c sa viśva̍sya ka̱ruṇa̍syeśa̱ eko̍ ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.08a तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय ।

1.100.08c सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.08a tam a̍psanta̱ śava̍sa utsa̱veṣu̱ naro̱ nara̱m ava̍se̱ taṁ dhanā̍ya |
1.100.08c so a̱ndhe ci̱t tama̍si̱ jyoti̍r vidan ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.09a स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि ।

1.100.09c स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.09a sa sa̱vyena̍ yama̱ti vrādha̍taś ci̱t sa da̍kṣi̱ṇe saṅgṛ̍bhītā kṛ̱tāni̍ |
1.100.09c sa kī̱riṇā̍ ci̱t sani̍tā̱ dhanā̍ni ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.10a स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वद्य ।

1.100.10c स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.10a sa grāme̍bhi̱ḥ sani̍tā̱ sa rathe̍bhir vi̱de viśvā̍bhiḥ kṛ̱ṣṭibhi̱r nv a1̱dya |
1.100.10c sa pauṁsye̍bhir abhi̱bhūr aśa̍stīr ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.11a स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।

1.100.11c अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.11a sa jā̱mibhi̱r yat sa̱majā̍ti mī̱ḻhe 'jā̍mibhir vā puruhū̱ta evai̍ḥ |
1.100.11c a̱pāṁ to̱kasya̱ tana̍yasya je̱ṣe ma̱rutvā̍n no bhava̱tv indra̍ ū̱tī ||

1.100.12a स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।

1.100.12c चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.12a sa vajrabhṛd dasyuhā bhīma ugraḥ sahasracetāḥ śatanītha ṛbhvā |
1.100.12c camrīṣo na śavasā pāñcajanyo marutvān no bhavatv indra ūtī ||

1.100.13a तस्य वज्रः क्रन्दति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान् ।

1.100.13c तं सचन्ते सनयस्तं धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.13a tasya vajraḥ krandati smat svarṣā divo na tveṣo ravathaḥ śimīvān |
1.100.13c taṁ sacante sanayas taṁ dhanāni marutvān no bhavatv indra ūtī ||

1.100.14a यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीम् ।

1.100.14c स पारिषत्क्रतुभिर्मन्दसानो मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.14a yasyājasraṁ śavasā mānam uktham paribhujad rodasī viśvataḥ sīm |
1.100.14c sa pāriṣat kratubhir mandasāno marutvān no bhavatv indra ūtī ||

1.100.15a न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः ।

1.100.15c स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती ॥

1.100.15a na yasya devā devatā na martā āpaś cana śavaso antam āpuḥ |
1.100.15c sa prarikvā tvakṣasā kṣmo divaś ca marutvān no bhavatv indra ūtī ||

1.100.16a रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य ।

1.100.16c वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु ॥

1.100.16a rohic chyāvā sumadaṁśur lalāmīr dyukṣā rāya ṛjrāśvasya |
1.100.16c vṛṣaṇvantam bibhratī dhūrṣu ratham mandrā ciketa nāhuṣīṣu vikṣu ||

1.100.17a एतत्त्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।

1.100.17c ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः ॥

1.100.17a etat tyat ta indra vṛṣṇa ukthaṁ vārṣāgirā abhi gṛṇanti rādhaḥ |
1.100.17c ṛjrāśvaḥ praṣṭibhir ambarīṣaḥ sahadevo bhayamānaḥ surādhāḥ ||

1.100.18a दस्यूञ्छिम्यूँश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् ।

1.100.18c सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥

1.100.18a dasyūñ chimyūṁś ca puruhūta evair hatvā pṛthivyāṁ śarvā ni barhīt |

1.100.18c sanat kṣetraṁ sakhibhiḥ śvitnyebhiḥ sanat sūryaṁ sanad apaḥ suvajraḥ ||

1.100.19a विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।

1.100.19c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.100.19a viśvāhendro adhivaktā no astv aparihvṛtāḥ sanuyāma vājam |
1.100.19c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.101.01a प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।

1.101.01c अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥

1.101.01a pra mandine pitumad arcatā vaco yaḥ kṛṣṇagarbhā nirahann ṛjiśvanā |
1.101.01c avasyavo vṛṣaṇaṁ vajradakṣiṇam marutvantaṁ sakhyāya havāmahe ||

1.101.02a यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम् ।

1.101.02c इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे ॥

1.101.02a yo vyaṁsaṁ jāhṛṣāṇena manyunā yaḥ śambaraṁ yo ahan piprum avratam |
1.101.02c indro yaḥ śuṣṇam aśuṣaṁ ny āvṛṇaṅ marutvantaṁ sakhyāya havāmahe ||

1.101.03a यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।

1.101.03c यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे ॥

1.101.03a yasya dyāvāpṛthivī pauṁsyam mahad yasya vrate varuṇo yasya sūryaḥ |
1.101.03c yasyendrasya sindhavaḥ saścati vratam marutvantaṁ sakhyāya havāmahe ||

1.101.04a यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।

1.101.04c वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥

1.101.04a yo aśvānāṁ yo gavāṁ gopatir vaśī ya āritaḥ karmaṇi-karmaṇi sthiraḥ |
1.101.04c vīḷoś cid indro yo asunvato vadho marutvantaṁ sakhyāya havāmahe ||

1.101.05a यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत् ।

1.101.05c इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे ॥

1.101.05a yo viśvasya jagataḥ prāṇatas patir yo brahmaṇe prathamo gā avindat |
1.101.05c indro yo dasyūm̐r adharām̐ avātiran marutvantaṁ sakhyāya havāmahe ||

1.101.06a यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः ।

1.101.06c इन्द्रं यं विश्वा भुवनाभि संदधुर्मरुत्वन्तं सख्याय हवामहे ॥

1.101.06a yaḥ śūrebhir havyo yaś ca bhīrubhir yo dhāvadbhir hūyate yaś ca jigyubhiḥ |
1.101.06c indraṁ yaṁ viśvā bhuvanābhi sandadhur marutvantaṁ sakhyāya havāmahe ||

1.101.07a रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।

1.101.07c इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ॥

1.101.07a rudrāṇām eti pradiśā vicakṣaṇo rudrebhir yoṣā tanute pṛthu jrayaḥ |
1.101.07c indram manīṣā abhy arcati śrutam marutvantaṁ sakhyāya havāmahe ||

1.101.08a यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।

1.101.08c अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥

1.101.08a yad vā marutvaḥ parame sadhasthe yad vāvame vṛjane mādayāse |
1.101.08c ata ā yāhy adhvaraṁ no acchā tvāyā haviś cakṛmā satyarādhaḥ ||

1.101.09a त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।

1.101.09c अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि मादयस्व ॥

1.101.09a tvāyendra somaṁ suṣumā sudakṣa tvāyā haviś cakṛmā brahmavāhaḥ |
1.101.09c adhā niyutvaḥ sagaṇo marudbhir asmin yajñe barhiṣi mādayasva ||

1.101.10a मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।

1.101.10c आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व ॥

1.101.10a mādayasva haribhir ye ta indra vi ṣyasva śipre vi sṛjasva dhene |
1.101.10c ā tvā suśipra harayo vahantūśan havyāni prati no juṣasva ||

1.101.11a मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।

1.101.11c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.101.11a marutstotrasya vṛjanasya gopā vayam indreṇa sanuyāma vājam |
1.101.11c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.102.01a इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।

1.102.01c तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥

1.102.01a imāṁ te dhiyam pra bhare maho mahīm asya stotre dhiṣaṇā yat ta ānaje ।
1.102.01c tam utsave ca prasave ca sāsahim indraṁ devāsaḥ śavasāmadann anu ॥

1.102.02a अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।

1.102.02c अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥

1.102.02a asya śravo nadyaḥ sapta bibhrati dyāvākṣāmā pṛthivī darśataṁ vapuḥ ।
1.102.02c asme sūryācandramasābhicakṣe śraddhe kam indra carato vitarturam ॥

1.102.03a तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।

1.102.03c आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥

1.102.03a taṁ smā ratham maghavan prāva sātaye jaitraṁ yaṁ te anumadāma saṅgame ।
1.102.03c ājā na indra manasā puruṣṭuta tvāyadbhyo maghavañ charma yaccha naḥ ॥

1.102.04a वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।

1.102.04c अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥

1.102.04a vayaṁ jayema tvayā yujā vṛtam asmākam aṁśam ud avā bhare-bhare ।
1.102.04c asmabhyam indra varivaḥ sugaṁ kṛdhi pra śatrūṇām maghavan vṛṣṇyā ruja ॥

1.102.05a नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।

1.102.05c अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव ॥

1.102.05a nānā hi tvā havamānā janā ime dhanānāṁ dhartar avasā vipanyavaḥ ।
1.102.05c asmākaṁ smā ratham ā tiṣṭha sātaye jaitraṁ hīndra nibhṛtam manas tava ॥

1.102.06a गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः ।

1.102.06c अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः ॥

1.102.06a gojitā bāhū amitakratuḥ simaḥ karman-karmañ chatamūtiḥ khajaṅkaraḥ ।
1.102.06c akalpa indraḥ pratimānam ojasāthā janā vi hvayante siṣāsavaḥ ॥

1.102.07a उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।

1.102.07c अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥

1.102.07a ut te śatān maghavann uc ca bhūyasa ut sahasrād ririce kṛṣṭiṣu śravaḥ ।

1.102.07c amātraṁ tvā dhiṣaṇā titviṣe mahy adhā vṛtrāṇi jighnase purandara ||

1.102.08a त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।

1.102.08c अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि ॥

1.102.08a triviṣṭidhātu pratimānam ojasas tisro bhūmīr nṛpate trīṇi rocanā |
1.102.08c atīdaṁ viśvam bhuvanaṁ vavakṣithāśatrur indra januṣā sanād asi ||

1.102.09a त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः ।

1.102.09c सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः ॥

1.102.09a tvāṁ deveṣu prathamaṁ havāmahe tvam babhūtha pṛtanāsu sāsahiḥ |
1.102.09c semaṁ naḥ kārum upamanyum udbhidam indraḥ kṛṇotu prasave ratham puraḥ ||

1.102.10a त्वं जिगेथ न धना रुरोधिथार्भेष्वाजा मघवन्महत्सु च ।

1.102.10c त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय ॥

1.102.10a tvaṁ jigetha na dhanā rurodhithārbheṣv ājā maghavan mahatsu ca |
1.102.10c tvām ugram avase saṁ śiśīmasy athā na indra havaneṣu codaya ||

1.102.11a विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।

1.102.11c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.102.11a viśvāhendro adhivaktā no astv aparihvṛtāḥ sanuyāma vājam |
1.102.11c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.103.01a तत्त इन्द्रियं परमं पराचैरधारयन्त कवयः पुरेदम् ।

1.103.01c क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥

1.103.01a tat ta indriyam paramam parācair adhārayanta kavayaḥ puredam |
1.103.01c kṣamedam anyad divy a1nyad asya sam ī pṛcyate samaneva ketuḥ ||

1.103.02a स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।

1.103.02c अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥

1.103.02a sa dhārayat pṛthivīm paprathac ca vajreṇa hatvā nir apaḥ sasarja |
1.103.02c ahann ahim abhinad rauhiṇaṁ vy ahan vyaṁsam maghavā śacībhiḥ ||

1.103.03a स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद्वि दासीः ।

1.103.03c विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिन्द्र ॥

1.103.03a sa jātūbharmā śraddadhāna ojaḥ puro vibhindann acarad vi dāsīḥ |
1.103.03c vidvān vajrin dasyave hetim asyāryaṁ saho vardhayā dyumnam indra ||

1.103.04a तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।

1.103.04c उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥

1.103.04a tad ūcuṣe mānuṣemā yugāni kīrtenyam maghavā nāma bibhrat |
1.103.04c upaprayan dasyuhatyāya vajrī yad dha sūnuḥ śravase nāma dadhe ||

1.103.05a तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।

1.103.05c स गा अविन्दत्सो अविन्ददश्वान्स ओषधीः सो अपः स वनानि ॥

1.103.05a tad asyedam paśyatā bhūri puṣṭaṁ śrad indrasya dhattana vīryāya |
1.103.05c sa gā avindat so avindad aśvān sa oṣadhīḥ so apaḥ sa vanāni ||

1.103.06a भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।

1.103.06c य आदृत्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥

1.103.06a bhūrikarmaṇe vṛṣabhāya vṛṣṇe satyaśuṣmāya sunavāma somam |
1.103.06c ya ādṛtyā paripanthīva śūro 'yajvano vibhajann eti vedaḥ ||

1.103.07a तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।

1.103.07c अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥

1.103.07a tad indra preva vīryaṁ cakartha yat sasantaṁ vajreṇābodhayo 'him |
1.103.07c anu tvā patnīr hṛṣitaṁ vayaś ca viśve devāso amadann anu tvā ||

1.103.08a शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।

1.103.08c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.103.08a śuṣṇam pipruṁ kuyavaṁ vṛtram indra yadāvadhīr vi puraḥ śambarasya |
1.103.08c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.104.01a योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।

1.104.01c विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥

1.104.01a yoniṣ ṭa indra niṣade akāri tam ā ni ṣīda svāno nārvā |
1.104.01c vimucyā vayo 'vasāyāśvān doṣā vastor vahīyasaḥ prapitve ||

1.104.02a ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्सद्यो अध्वनो जगम्यात् ।

1.104.02c देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्सुविताय वर्णम् ॥

1.104.02a o tye nara indram ūtaye gur nū cit tān sadyo adhvano jagamyāt |
1.104.02c devāso manyuṁ dāsasya ścamnan te na ā vakṣan suvitāya varṇam ||

1.104.03a अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।

1.104.03c क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥

1.104.03a ava tmanā bharate ketavedā ava tmanā bharate phenam udan |
1.104.03c kṣīreṇa snātaḥ kuyavasya yoṣe hate te syātām pravaṇe śiphāyāḥ ||

1.104.04a युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।

1.104.04c अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ॥

1.104.04a yuyopa nābhir uparasyāyoḥ pra pūrvābhis tirate rāṣṭi śūraḥ |
1.104.04c añjasī kuliśī vīrapatnī payo hinvānā udabhir bharante ||

1.104.05a प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।

1.104.05c अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥

1.104.05a prati yat syā nīthādarśi dasyor oko nācchā sadanaṁ jānatī gāt |
1.104.05c adha smā no maghavañ carkṛtād in mā no magheva niṣṣapī parā dāḥ ||

1.104.06a स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।

1.104.06c मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥

1.104.06a sa tvaṁ na indra sūrye so apsv anāgāstva ā bhaja jīvaśaṁse |
1.104.06c māntarām bhujam ā rīriṣo naḥ śraddhitaṁ te mahata indriyāya ||

1.104.07a अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।

1.104.07c मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥

1.104.07a adhā manye śrat te asmā adhāyi vṛṣā codasva mahate dhanāya |

1.104.07c mā no akṛte puruhūta yonāv indra kṣudhyadbhyo vaya āsutiṁ dāḥ ||

1.104.08a मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।

1.104.08c आण्डा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि ॥

1.104.08a mā no vadhīr indra mā parā dā mā naḥ priyā bhojanāni pra moṣīḥ |
1.104.08c āṇḍā mā no maghavañ chakra nir bhen mā naḥ pātrā bhet sahajānuṣāṇi ||

1.104.09a अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।

1.104.09c उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥

1.104.09a arvāṅ ehi somakāmaṁ tvāhur ayaṁ sutas tasya pibā madāya |
1.104.09c uruvyacā jaṭhara ā vṛṣasva piteva naḥ śṛṇuhi hūyamānaḥ ||

1.105.01a चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।

1.105.01c न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥

1.105.01a candramā apsv a1ntar ā suparṇo dhāvate divi |
1.105.01c na vo hiraṇyanemayaḥ padaṁ vindanti vidyuto vittam me asya rodasī ||

1.105.02a अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।

1.105.02c तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥

1.105.02a artham id vā u arthina ā jāyā yuvate patim |
1.105.02c tuñjāte vṛṣṇyam payaḥ paridāya rasaṁ duhe vittam me asya rodasī ||

1.105.03a मो षु देवा अदः स्व१रव पादि दिवस्परि ।

1.105.03c मा सोम्यस्य शम्भुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥

1.105.03a mo ṣu devā adaḥ sva1r ava pādi divas pari |
1.105.03c mā somyasya śambhuvaḥ śūne bhūma kadā cana vittam me asya rodasī ||

1.105.04a यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।

1.105.04c क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥

1.105.04a yajñam pṛcchāmy avamaṁ sa tad dūto vi vocati |
1.105.04c kva ṛtam pūrvyaṁ gataṁ kas tad bibharti nūtano vittam me asya rodasī ||

1.105.05a अमी ये देवा स्थन त्रिष्वा रोचने दिवः ।

1.105.05c कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥

1.105.05a a̱mī ye de̍vā̱ sthana̍ tri̱ṣv ā ro̍ca̱ne di̱vaḥ |
1.105.05c kad va̍ ṛ̱taṁ kad anṛ̍ta̱ṁ kva̍ pra̱tnā va̱ āhu̍tir vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.06a कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।

1.105.06c कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥

1.105.06a kad va̍ ṛ̱tasya̍ dharṇa̱si kad varu̍ṇasya̱ cakṣa̍ṇam |
1.105.06c kad a̍rya̱mṇo ma̱has pa̱thāti̍ krāmema dū̱ḍhyo̍ vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.07a अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।

1.105.07c तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥

1.105.07a a̱haṁ so a̍smi̱ yaḥ pu̱rā su̱te vadā̍mi̱ kāni̍ cit |
1.105.07c tam mā̍ vyanty ā̱dhyo̱3̱ vṛko̱ na tṛ̱ṣṇaja̍m mṛ̱gaṁ vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.08a सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।

1.105.08c मूषो न शिश्ना व्यदन्ति माध्य स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी ॥

1.105.08a sam mā̍ tapanty a̱bhita̍ḥ sa̱patnī̍r iva̱ parśa̍vaḥ |
1.105.08c mūṣo̱ na śi̱śnā vy a̍danti mā̱dhya̍ sto̱tāra̍ṁ te śatakrato vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.09a अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।

1.105.09c त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥

1.105.09a a̱mī ye sa̱pta ra̱śmaya̱s tatrā̍ me̱ nābhi̱r āta̍tā |
1.105.09c tri̱tas tad ve̍dā̱ptyaḥ sa jā̍mi̱tvāya̍ rebhati vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.10a अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।

1.105.10c देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥

1.105.10a a̱mī ye pañco̱kṣaṇo̱ madhye̍ ta̱sthur ma̱ho di̱vaḥ |
1.105.10c de̱va̱trā nu pra̱vācya̍ṁ sadhrīcī̱nā ni vā̍vṛtur vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.11a सुपर्णा एत आसते मध्य आरोधने दिवः ।

1.105.11c ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ॥

1.105.11a suparṇā eta āsate madhya ārodhane divaḥ |
1.105.11c te sedhanti patho vṛkaṁ tarantaṁ yahvatīr apo vittam me asya rodasī ||

1.105.12a नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।

1.105.12c ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ॥

1.105.12a navyaṁ tad ukthyaṁ hitaṁ devāsaḥ supravācanam |
1.105.12c ṛtam arṣanti sindhavaḥ satyaṁ tātāna sūryo vittam me asya rodasī ||

1.105.13a अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।

1.105.13c स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ॥

1.105.13a agne tava tyad ukthyaṁ deveṣv asty āpyam |
1.105.13c sa naḥ satto manuṣvad ā devān yakṣi viduṣṭaro vittam me asya rodasī ||

1.105.14a सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।

1.105.14c अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥

1.105.14a satto hotā manuṣvad ā devām̐ acchā viduṣṭaraḥ |
1.105.14c agnir havyā suṣūdati devo deveṣu medhiro vittam me asya rodasī ||

1.105.15a ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।

1.105.15c व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥

1.105.15a brahmā kṛṇoti varuṇo gātuvidaṁ tam īmahe |
1.105.15c vy ūrṇoti hṛdā matiṁ navyo jāyatām ṛtaṁ vittam me asya rodasī ||

1.105.16a असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।

1.105.16c न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥

1.105.16a asau yaḥ panthā ādityo divi pravācyaṁ kṛtaḥ |
1.105.16c na sa devā atikrame tam martāso na paśyatha vittam me asya rodasī ||

1.105.17a त्रितः कूपेऽवहितो देवान्हवत ऊतये ।

1.105.17c तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥

1.105.17a tritaḥ kūpe 'vahito devān havata ūtaye |

1.105.17c tac chu̍śrāva̱ bṛha̱spati̍ḥ kṛ̱ṇvann a̍ṁhūra̱ṇād u̱ru vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.18a अ॒रु॒णो मा॑ स॒कृद्वृकः॑ प॒था यन्तं॑ द॒दर्श॒ हि ।

1.105.18c उज्जि॑हीते नि॒चाय्या॒ तष्टे॑व पृष्ट्याम॒यी वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥

1.105.18a a̱ru̱ṇo mā̍ sa̱kṛd vṛka̍ḥ pa̱thā yanta̍ṁ da̱darśa̱ hi |
1.105.18c uj ji̍hīte ni̱cāyyā̱ taṣṭe̍va pṛṣṭyāma̱yī vi̱ttam me̍ a̱sya ro̍dasī ||

1.105.19a ए॒ना॒ङ्गू॒षेण॑ व॒यमिन्द्र॑वन्तो॒ऽभि ष्या॑म वृ॒जने॒ सर्व॑वीराः ।

1.105.19c तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ः सिन्धु॑ः पृथि॒वी उ॒त द्यौः ॥

1.105.19a e̱nāṅgū̱ṣeṇa̍ va̱yam indra̍vanto̱ 'bhi ṣyā̍ma vṛ̱jane̱ sarva̍vīrāḥ |
1.105.19c tan no̍ mi̱tro varu̍ṇo māmahantā̱m adi̍ti̱ḥ sindhu̍ḥ pṛthi̱vī u̱ta dyauḥ ||

1.106.01a इन्द्रं॑ मि॒त्रं वरु॑णम॒ग्निमू॒तये॒ मारु॑तं॒ शर्धो॒ अदि॑तिं हवामहे ।

1.106.01c र॒थं न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

1.106.01a indra̍m mi̱tram varu̍ṇam a̱gnim ū̱taye̱ māru̍ta̱m śardho̱ adi̍tim havāmahe |
1.106.01c ratha̱ṁ na du̱rgād va̍savaḥ sudānavo̱ viśva̍smān no̱ aṁha̍so̱ niṣ pi̍partana ||

1.106.02a त आ॑दि॒त्या आ ग॑ता स॒र्वता॑तये भू॒त दे॑वा वृत्र॒तूर्ये॑षु श॒म्भुव॑ः ।

1.106.02c र॒थं न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

1.106.02a ta ā̍dityā̱ ā ga̍tā sa̱rvatā̍taye bhū̱ta de̍vā vṛtra̱tūrye̍ṣu śa̱mbhuva̍ḥ |
1.106.02c ratha̱ṁ na du̱rgād va̍savaḥ sudānavo̱ viśva̍smān no̱ aṁha̍so̱ niṣ pi̍partana ||

1.106.03a अव॑न्तु नः पि॒तर॑ः सुप्रवाच॒ना उ॒त दे॒वी दे॒वपु॑त्रे ऋता॒वृधा॑ ।

1.106.03c र॒थं न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

1.106.03a ava̍ntu naḥ pi̱tara̍ḥ supravāca̱nā u̱ta de̱vī de̱vapu̍tre ṛtā̱vṛdhā̍ |
1.106.03c ratha̱ṁ na du̱rgād va̍savaḥ sudānavo̱ viśva̍smān no̱ aṁha̍so̱ niṣ pi̍partana ||

1.106.04a न॒रा॒शंसं॑ वा॒जिनं॑ वा॒जय॑न्नि॒ह क्ष॒यद्वी॑रं पू॒षणं॑ सु॒म्नैरी॑महे ।

1.106.04c र॒थं न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

1.106.04a narā̱śaṁsa̍ṁ vā̱jina̍ṁ vā̱jaya̍nn i̱ha kṣa̱yadvī̍raṁ pū̱ṣa̱ṇa̍ṁ su̱mnair ī̍mahe |
1.106.04c ratha̱ṁ na du̱rgād va̍savaḥ sudānavo̱ viśva̍smān no̱ aṁha̍so̱ niṣ pi̍partana ||

1.106.05a बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।

1.106.05c रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो ग्रंहसो निष्पिपर्तन ॥

1.106.05a bṛhaspate sadam in naḥ sugaṁ kṛdhi śaṁ yor yat te manurhitaṁ tad īmahe |
1.106.05c rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

1.106.06a इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।

1.106.06c रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो ग्रंहसो निष्पिपर्तन ॥

1.106.06a indraṁ kutso vṛtrahaṇaṁ śacīpatiṁ kāṭe nibālha ṛṣir ahvad ūtaye |
1.106.06c rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

1.106.07a देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।

1.106.07c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.106.07a devair no devy aditir ni pātu devas trātā trāyatām aprayucchan |
1.106.07c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.107.01a यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।

1.107.01c ग्रा वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥

1.107.01a yajño devānām praty eti sumnam ādityāso bhavatā mṛlayantaḥ |
1.107.01c ā vo 'rvācī sumatir vavṛtyād aṁhoś cid yā varivovittarāsat ||

1.107.02a उप नो देवा ग्रवसा गमन्त्वङ्गिरसां सामभि स्तूयमानाः ।

1.107.02c इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो ग्रदितिः शर्म यंसत् ॥

1.107.02a upa no devā avasā gamantv aṅgirasāṁ sāmabhi stūyamānāḥ |
1.107.02c indra indriyair maruto marudbhir ādityair no aditiḥ śarma yaṁsat ||

1.107.03a तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।

1.107.03c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.107.03a tan na indras tad varuṇas tad agnis tad aryamā tat savitā cano dhāt |
1.107.03c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.108.01a य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।

1.108.01c तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥

1.108.01a ya indrāgnī citratamo ratho vām abhi viśvāni bhuvanāni caṣṭe |
1.108.01c tenā yātaṁ sarathaṁ tasthivāṁsāthā somasya pibataṁ sutasya ||

1.108.02a यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।

1.108.02c तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥

1.108.02a yāvad idam bhuvanaṁ viśvam asty uruvyacā varimatā gabhīram |
1.108.02c tāvām̐ ayam pātave somo astv aram indrāgnī manase yuvabhyām ||

1.108.03a चक्राथे हि सध्र्य१ङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः ।

1.108.03c ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥

1.108.03a cakrāthe hi sadhrya1ṅ nāma bhadraṁ sadhrīcīnā vṛtrahaṇā uta sthaḥ |
1.108.03c tāv indrāgnī sadhryañcā niṣadyā vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām ||

1.108.04a समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।

1.108.04c तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥

1.108.04a samiddheṣv agniṣv ānajānā yatasrucā barhir u tistirāṇā |
1.108.04c tīvraiḥ somaiḥ pariṣiktebhir arvāg endrāgnī saumanasāya yātam ||

1.108.05a यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि ।

1.108.05c या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥

1.108.05a yānīndrāgnī cakrathur vīryāṇi yāni rūpāṇy uta vṛṣṇyāni |
1.108.05c yā vām pratnāni sakhyā śivāni tebhiḥ somasya pibataṁ sutasya ||

1.108.06a यदब्रवं प्रथमं वां वृणानो३ऽयं सोमो असुरैर्नो विहव्यः ।

1.108.06c तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.06a yad abravam prathamaṁ vāṁ vṛṇāno3 'yaṁ somo asurair no vihavyaḥ |
1.108.06c tāṁ satyāṁ śraddhām abhy ā hi yātam athā somasya pibataṁ sutasya ||

1.108.07a यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा ।

1.108.07c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.07a yad indrāgnī madathaḥ sve durone yad brahmaṇi rājani vā yajatrā |
1.108.07c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.08a यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः ।

1.108.08c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.08a yad indrāgnī yaduṣu turvaśeṣu yad druhyuṣv anuṣu pūruṣu sthaḥ |
1.108.08c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.09a यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।

1.108.09c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.09a yad indrāgnī avamasyām pṛthivyām madhyamasyām paramasyām uta sthaḥ |
1.108.09c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.10a यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।

1.108.10c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.10a yad indrāgnī paramasyām pṛthivyām madhyamasyām avamasyām uta sthaḥ |
1.108.10c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.11a यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।

1.108.11c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.11a yad indrāgnī divi ṣṭho yat pṛthivyāṁ yat parvateṣv oṣadhīṣv apsu |
1.108.11c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.12a यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।

1.108.12c अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

1.108.12a yad indrāgnī uditā sūryasya madhye divaḥ svadhayā mādayethe |
1.108.12c ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

1.108.13a एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।

1.108.13c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.108.13a evendrāgnī papivāṁsā sutasya viśvāsmabhyaṁ saṁ jayataṁ dhanāni |

1.108.13c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.109.01a वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान् ।
1.109.01c नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥

1.109.01a vi hy akhyam manasā vasya icchann indrāgnī jñāsa uta vā sajātān |
1.109.01c nānyā yuvat pramatir asti mahyaṁ sa vāṁ dhiyaṁ vājayantīm atakṣam ||

1.109.02a अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
1.109.02c अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥

1.109.02a aśravaṁ hi bhūridāvattarā vāṁ vijāmātur uta vā ghā syālāt |
1.109.02c athā somasya prayatī yuvabhyām indrāgnī stomaṁ janayāmi navyam ||

1.109.03a मा च्छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः ।
1.109.03c इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥

1.109.03a mā cchedma raśmīm̐r iti nādhamānāḥ pitṝṇāṁ śaktīr anuyacchamānāḥ |
1.109.03c indrāgnibhyāṁ kaṁ vṛṣaṇo madanti tā hy adrī dhiṣaṇāyā upasthe ||

1.109.04a युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति ।
1.109.04c तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥

1.109.04a yuvābhyāṁ devī dhiṣaṇā madāyendrāgnī somam uśatī sunoti |
1.109.04c tāv aśvinā bhadrahastā supāṇī ā dhāvatam madhunā pṛṅktam apsu ||

1.109.05a युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
1.109.05c तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥

1.109.05a yuvām indrāgnī vasuno vibhāge tavastamā śuśrava vṛtrahatye |
1.109.05c tāv āsadyā barhiṣi yajñe asmin pra carṣaṇī mādayethāṁ sutasya ||

1.109.06a प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
1.109.06c प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥

1.109.06a pra carṣaṇibhyaḥ pṛtanāhaveṣu pra pṛthivyā riricāthe divaś ca |
1.109.06c pra sindhubhyaḥ pra giribhyo mahitvā prendrāgnī viśvā bhuvanāty anyā ||

1.109.07a आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।

1.109.07c इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥

1.109.07a ā bharataṁ śikṣataṁ vajrabāhū asmām̐ indrāgnī avataṁ śacībhiḥ |
1.109.07c ime nu te raśmayaḥ sūryasya yebhiḥ sapitvam pitaro na āsan ||

1.109.08a पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु ।

1.109.08c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.109.08a purandarā śikṣataṁ vajrahastāsmām̐ indrāgnī avatam bhareṣu |
1.109.08c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.110.01a ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।

1.110.01c अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥

1.110.01a tatam me apas tad u tāyate punaḥ svādiṣṭhā dhītir ucathāya śasyate |
1.110.01c ayaṁ samudra iha viśvadevyaḥ svāhākṛtasya sam u tṛpṇuta ṛbhavaḥ ||

1.110.02a आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः ।

1.110.02c सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥

1.110.02a ābhogayam pra yad icchanta aitanāpākāḥ prāñco mama ke cid āpayaḥ |
1.110.02c saudhanvanāsaś caritasya bhūmanāgacchata savitur dāśuṣo gṛham ||

1.110.03a तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।

1.110.03c त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥

1.110.03a tat savitā vo 'mṛtatvam āsuvad agohyaṁ yac chravayanta aitana |
1.110.03c tyaṁ cic camasam asurasya bhakṣaṇam ekaṁ santam akṛṇutā caturvayam ||

1.110.04a विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।

1.110.04c सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥

1.110.04a viṣṭvī śamī taraṇitvena vāghato martāsaḥ santo amṛtatvam ānaśuḥ |
1.110.04c saudhanvanā ṛbhavaḥ sūracakṣasaḥ saṁvatsare sam apṛcyanta dhītibhiḥ ||

1.110.05a क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।

1.110.05c उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥

1.110.05a kṣetram iva vi mamus tejanenam̐ ekam pātram ṛbhavo jehamānam |
1.110.05c upastutā upamaṁ nādhamānā amartyeṣu śrava icchamānāḥ ||

1.110.06a आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।

1.110.06c तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥

1.110.06a ā manīṣām antarikṣasya nṛbhyaḥ sruceva ghṛtaṁ juhavāma vidmanā |
1.110.06c taraṇitvā ye pitur asya saścira ṛbhavo vājam aruhan divo rajaḥ ||

1.110.07a ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।

1.110.07c युष्माकं देवा अवसाहनि प्रिये३ऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥

1.110.07a ṛbhur na indraḥ śavasā navīyān ṛbhur vājebhir vasubhir vasur dadiḥ |
1.110.07c yuṣmākaṁ devā avasāhani priye3 'bhi tiṣṭhema pṛtsutīr asunvatām ||

1.110.08a निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।

1.110.08c सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥

1.110.08a niś carmaṇa ṛbhavo gām apiṁśata saṁ vatsenāsṛjatā mātaram punaḥ |
1.110.08c saudhanvanāsaḥ svapasyayā naro jivrī yuvānā pitarākṛṇotana ||

1.110.09a वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ।

1.110.09c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.110.09a vājebhir no vājasātāv aviḍḍhy ṛbhumām̐ indra citram ā darṣi rādhaḥ |
1.110.09c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.111.01a तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।

1.111.01c तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ॥

1.111.01a takṣan rathaṁ suvṛtaṁ vidmanāpasas takṣan harī indravāhā vṛṣaṇvasū |
1.111.01c takṣan pitṛbhyām ṛbhavo yuvad vayas takṣan vatsāya mātaraṁ sacābhuvam ||

1.111.02a आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम् ।

1.111.02c यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम् ॥

1.111.02a ā no yajñāya takṣata ṛbhumad vayaḥ kratve dakṣāya suprajāvatīm iṣam |
1.111.02c yathā kṣayāma sarvavīrayā viśā tan naḥ śardhāya dhāsathā sv aindriyam ||

1.111.03a आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः ।

1.111.03c सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम् ॥

1.111.03a ā takṣata sātim asmabhyam ṛbhavaḥ sātiṁ rathāya sātim arvate naraḥ |
1.111.03c sātiṁ no jaitrīṁ sam maheta viśvahā jāmim ajāmim pṛtanāsu sakṣaṇim ||

1.111.04a ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये ।

1.111.04c उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥

1.111.04a ṛbhukṣaṇam indram ā huva ūtaya ṛbhūn vājān marutaḥ somapītaye |
1.111.04c ubhā mitrāvaruṇā nūnam aśvinā te no hinvantu sātaye dhiye jiṣe ||

1.111.05a ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।

1.111.05c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.111.05a ṛbhur bharāya saṁ śiśātu sātiṁ samaryajid vājo asmām̐ aviṣṭu |
1.111.05c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.112.01a ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये ।

1.112.01c याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.01a īḷe dyāvāpṛthivī pūrvacittaye 'gniṁ gharmaṁ surucaṁ yāmann iṣṭaye |
1.112.01c yābhir bhare kāram aṁśāya jinvathas tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.02a युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।

1.112.02c याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.02a yuvor dānāya subharā asaścato ratham ā tasthur vacasaṁ na mantave |
1.112.02c yābhir dhiyo 'vathaḥ karmann iṣṭaye tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.03a युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।

1.112.03c याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.03a yuvaṁ tāsāṁ divyasya praśāsane viśāṁ kṣayatho amṛtasya majmanā |
1.112.03c yābhir dhenum asva1m pinvatho narā tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.04a याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।

1.112.04c याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.04a yābhiḥ parijmā tanayasya majmanā dvimātā tūrṣu taraṇir vibhūṣati |
1.112.04c yābhis trimantur abhavad vicakṣaṇas tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.05a याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।

1.112.05c याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.05a yābhī rebhaṁ nivṛtaṁ sitam adbhya ud vandanam airayataṁ svar dṛśe |
1.112.05c yābhiḥ kaṇvam pra siṣāsantam āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.06a याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।

1.112.06c याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.06a yābhir antakaṁ jasamānam āraṇe bhujyuṁ yābhir avyathibhir jijinvathuḥ |
1.112.06c yābhiḥ karkandhuṁ vayyaṁ ca jinvathas tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.07a याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये ।

1.112.07c याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.07a yābhiḥ śucantiṁ dhanasāṁ suṣaṁsadaṁ taptaṁ gharmam omyāvantam atraye |
1.112.07c yābhiḥ pṛśnigum purukutsam āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.08a याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः ।

1.112.08c याभिर्वर्तिकां ग्रसिताममुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.08a yābhiḥ śacībhir vṛṣaṇā parāvṛjam prāndhaṁ śroṇaṁ cakṣasa etave kṛthaḥ |
1.112.08c yābhir vartikāṁ grasitām amuñcataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.09a याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम् ।

1.112.09c याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.09a yābhiḥ sindhum madhumantam asaścataṁ vasiṣṭhaṁ yābhir ajarāv ajinvatam |
1.112.09c yābhiḥ kutsaṁ śrutaryaṁ naryam āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.10a याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् ।

1.112.10c याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.10a yābhir viśpalāṁ dhanasām atharvyaṁ sahasramīḻha ājāv ajinvatam |
1.112.10c yābhir vaśam aśvyam preṇim āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.11a याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।

1.112.11c कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.11a yābhiḥ sudānū auśijāya vaṇije dīrghaśravase madhu kośo akṣarat |
1.112.11c kakṣīvantaṁ stotāraṁ yābhir āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.12a याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।

1.112.12c याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.12a yābhī rasāṁ kṣodasodnaḥ pipinvathur anaśvaṁ yābhī ratham āvataṁ jiṣe |
1.112.12c yābhis triśoka usriyā udājata tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.13a याभिः सूर्यं परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।

1.112.13c याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.13a yābhiḥ sūryam pariyāthaḥ parāvati mandhātāraṁ kṣaitrapatyeṣv āvatam |
1.112.13c yābhir vipram pra bharadvājam āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.14a याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।

1.112.14c याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.14a yābhir mahām atithigvaṁ kaśojuvaṁ divodāsaṁ śambarahatya āvatam |
1.112.14c yābhiḥ pūrbhidye trasadasyum āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.15a याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः ।

1.112.15c याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.15a yābhir vamraṁ vipipānam upastutaṁ kaliṁ yābhir vittajāniṁ duvasyathaḥ |
1.112.15c yābhir vyaśvam uta pṛthim āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.16a याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।

1.112.16c याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.16a yābhir narā śayave yābhir atraye yābhiḥ purā manave gātum īṣathuḥ |

1.112.16c yābhiḥ śārīr ājataṁ syūmaraśmaye tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.17a याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।

1.112.17c याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.17a yābhiḥ paṭharvā jaṭharasya majmanāgnir nādīdec cita iddho ajmann ā |
1.112.17c yābhiḥ śaryātam avatho mahādhane tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.18a याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।

1.112.18c याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.18a yābhir aṅgiro manasā niraṇyatho 'graṁ gacchatho vivare goarṇasaḥ |
1.112.18c yābhir manuṁ śūram iṣā samāvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.19a याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।

1.112.19c याभिः सुदास ऊहथुः सुदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.19a yābhiḥ patnīr vimadāya nyūhathur ā gha vā yābhir aruṇīr aśikṣatam |
1.112.19c yābhiḥ sudāsa ūhathuḥ sudevyaṁ1 tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.20a याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।

1.112.20c ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.20a yābhiḥ śantātī bhavatho dadāśuṣe bhujyuṁ yābhir avatho yābhir adhrigum |
1.112.20c omyāvatīṁ subharām ṛtastubhaṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.21a याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।

1.112.21c मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.21a yābhiḥ kṛśānum asane duvasyatho jave yābhir yūno arvantam āvatam |
1.112.21c madhu priyam bharatho yat saraḍbhyas tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.22a याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।

1.112.22c याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.22a yābhir naraṁ goṣuyudhaṁ nṛṣāhye kṣetrasya sātā tanayasya jinvathaḥ |
1.112.22c yābhī rathām̐ avatho yābhir arvatas tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.23a याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।

1.112.23c याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

1.112.23a yābhiḥ kutsam ārjuneyaṁ śatakratū pra turvītim pra ca dabhītim āvatam |
1.112.23c yābhir dhvasantim puruṣantim āvataṁ tābhir ū ṣu ūtibhir aśvinā gatam ||

1.112.24a अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।

1.112.24c अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥

1.112.24a apnasvatīm aśvinā vācam asme kṛtaṁ no dasrā vṛṣaṇā manīṣām |
1.112.24c adyūtye 'vase ni hvaye vāṁ vṛdhe ca no bhavataṁ vājasātau ||

1.112.25a द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।

1.112.25c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.112.25a dyubhir aktubhiḥ pari pātam asmān ariṣṭebhir aśvinā saubhagebhiḥ |
1.112.25c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.113.01a इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।

1.113.01c यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥

1.113.01a idaṁ śreṣṭhaṁ jyotiṣāṁ jyotir āgāc citraḥ praketo ajaniṣṭa vibhvā |
1.113.01c yathā prasūtā savituḥ savāyaṁ̐ evā rātry uṣase yonim āraik ||

1.113.02a रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।

1.113.02c समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥

1.113.02a ruśadvatsā ruśatī śvetyāgād āraig u kṛṣṇā sadanāny asyāḥ |
1.113.02c samānabandhū amṛte anūcī dyāvā varṇaṁ carata āmināne ||

1.113.03a समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।

1.113.03c न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥

1.113.03a samāno adhvā svasror anantas tam anyānyā carato devaśiṣṭe |
1.113.03c na methete na tasthatuḥ sumeke naktoṣāsā samanasā virūpe ||

1.113.04a भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।

1.113.04c प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥

1.113.04a bhāsvatī netrī sūnṛtānām aceti citrā vi duro na āvaḥ |
1.113.04c prārpyā jagad vy u no rāyo akhyad uṣā ajīgar bhuvanāni viśvā ||

1.113.05a जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उ त्वम् ।
1.113.05c दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥

1.113.05a jihmaśye3 caritave maghony ābhogaya iṣṭaye rāya u tvam |
1.113.05c dabhram paśyadbhya urviyā vicakṣa uṣā ajīgar bhuvanāni viśvā ||

1.113.06a क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।
1.113.06c विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥

1.113.06a kṣatrāya tvaṁ śravase tvam mahīyā iṣṭaye tvam artham iva tvam ityai |
1.113.06c visadṛśā jīvitābhipracakṣa uṣā ajīgar bhuvanāni viśvā ||

1.113.07a एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।
1.113.07c विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥

1.113.07a eṣā divo duhitā praty adarśi vyucchantī yuvatiḥ śukravāsāḥ |
1.113.07c viśvasyeśānā pārthivasya vasva uṣo adyeha subhage vy uccha ||

1.113.08a परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम् ।
1.113.08c व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती ॥

1.113.08a parāyatīnām anv eti pātha āyatīnām prathamā śaśvatīnām |
1.113.08c vyucchantī jīvam udīrayanty uṣā mṛtaṁ kaṁ cana bodhayantī ||

1.113.09a उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य ।
1.113.09c यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चकृषे भद्रमप्नः ॥

1.113.09a uṣo yad agniṁ samidhe cakartha vi yad āvaś cakṣasā sūryasya |
1.113.09c yan mānuṣān yakṣyamāṇāṁ̐ ajīgas tad deveṣu cakṛṣe bhadram apnaḥ ||

1.113.10a कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।
1.113.10c अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥

1.113.10a kiyāty ā yat samayā bhavāti yā vyūṣur yāś ca nūnaṁ vyucchān |
1.113.10c anu pūrvāḥ kṛpate vāvaśānā pradīdhyānā joṣam anyābhir eti ||

1.113.11a ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः ।

1.113.11c अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥

1.113.11a īyuṣ ṭe ye pūrvatarām apaśyan vyucchantīm uṣasam martyāsaḥ |
1.113.11c asmābhir ū nu praticakṣyābhūd o te yanti ye aparīṣu paśyān ||

1.113.12a यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती ।

1.113.12c सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥

1.113.12a yāvayaddveṣā ṛtapā ṛtejāḥ sumnāvarī sūnṛtā īrayantī |
1.113.12c sumaṅgalīr bibhratī devavītim ihādyoṣaḥ śreṣṭhatamā vy uccha ||

1.113.13a शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।

1.113.13c अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥

1.113.13a śaśvat puroṣā vy uvāsa devy atho adyedaṁ vy āvo maghonī |
1.113.13c atho vy ucchād uttarām̐ anu dyūn ajarāmṛtā carati svadhābhiḥ ||

1.113.14a व्यञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः ।

1.113.14c प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥

1.113.14a vy a1ñjibhir diva ātāsv adyaud apa kṛṣṇāṁ nirṇijaṁ devy āvaḥ |
1.113.14c prabodhayanty aruṇebhir aśvair oṣā yāti suyujā rathena ||

1.113.15a आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।

1.113.15c ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥

1.113.15a āvahantī poṣyā vāryāṇi citraṁ ketuṁ kṛṇute cekitānā |
1.113.15c īyuṣīṇām upamā śaśvatīnāṁ vibhātīnām prathamoṣā vy aśvait ||

1.113.16a उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।

1.113.16c आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥

1.113.16a ud īrdhvaṁ jīvo asur na āgād apa prāgāt tama ā jyotir eti |
1.113.16c āraik panthāṁ yātave sūryāyāganma yatra pratiranta āyuḥ ||

1.113.17a स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।

1.113.17c अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥

1.113.17a syūmanā vāca ud iyarti vahni stavāno rebha uṣaso vibhātīḥ |
1.113.17c adyā tad uccha gṛṇate maghony asme āyur ni didīhi prajāvat ||

1.113.18a या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय ।

1.113.18c वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥

1.113.18a yā gomatīr uṣasaḥ sarvavīrā vyucchanti dāśuṣe martyāya |
1.113.18c vāyor iva sūnṛtānām udarke tā aśvadā aśnavat somasutvā ||

1.113.19a माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि ।

1.113.19c प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने जनय विश्ववारे ॥

1.113.19a mātā devānām aditer anīkaṁ yajñasya ketur bṛhatī vi bhāhi |
1.113.19c praśastikṛd brahmaṇe no vy u1cchā no jane janaya viśvavāre ||

1.113.20a यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।

1.113.20c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.113.20a yac citram apna uṣaso vahantījānāya śaśamānāya bhadram |
1.113.20c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.114.01a इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।

1.114.01c यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

1.114.01a imā rudrāya tavase kapardine kṣayadvīrāya pra bharāmahe matīḥ |
1.114.01c yathā śam asad dvipade catuṣpade viśvam puṣṭaṁ grāme asminn anāturam ||

1.114.02a मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।

1.114.02c यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥

1.114.02a mṛḷā no rudrota no mayas kṛdhi kṣayadvīrāya namasā vidhema te |
1.114.02c yac chaṁ ca yoś ca manur āyeje pitā tad aśyāma tava rudra praṇītiṣu ||

1.114.03a अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।

1.114.03c सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥

1.114.03a aśyāma te sumatiṁ devayajyayā kṣayadvīrasya tava rudra mīḍhvaḥ |
1.114.03c sumnāyann id viśo asmākam ā carāriṣṭavīrā juhavāma te haviḥ ||

1.114.04a त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।

1.114.04c आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥

1.114.04a tveṣaṁ vayaṁ rudraṁ yajñasādhaṁ vaṅkuṁ kavim avase ni hvayāmahe |
1.114.04c āre asmad daivyaṁ heḷo asyatu sumatim id vayam asyā vṛṇīmahe ||

1.114.05a दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।

1.114.05c हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥

1.114.05a divo varāham aruṣaṁ kapardinaṁ tveṣaṁ rūpaṁ namasā ni hvayāmahe |
1.114.05c haste bibhrad bheṣajā vāryāṇi śarma varma cchardir asmabhyaṁ yaṁsat ||

1.114.06a इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।

1.114.06c रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥

1.114.06a idam pitre marutām ucyate vacaḥ svādoḥ svādīyo rudrāya vardhanam |
1.114.06c rāsvā ca no amṛta martabhojanaṁ tmane tokāya tanayāya mṛḷa ||

1.114.07a मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।

1.114.07c मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥

1.114.07a mā no mahāntam uta mā no arbhakam mā na ukṣantam uta mā na ukṣitam |
1.114.07c mā no vadhīḥ pitaram mota mātaram mā naḥ priyās tanvo rudra rīriṣaḥ ||

1.114.08a मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।

1.114.08c वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

1.114.08a mā nas toke tanaye mā na āyau mā no goṣu mā no aśveṣu rīriṣaḥ |
1.114.08c vīrān mā no rudra bhāmito vadhīr haviṣmantaḥ sadam it tvā havāmahe ||

1.114.09a उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।

1.114.09c भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥

1.114.09a upa te stomān paśupā ivākaraṁ rāsvā pitar marutāṁ sumnam asme |
1.114.09c bhadrā hi te sumatir mṛḷayattamāthā vayam ava it te vṛṇīmahe ||

1.114.10a आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।

1.114.10c मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥

1.114.10a āre te goghnam uta pūruṣaghnaṁ kṣayadvīra sumnam asme te astu |
1.114.10c mṛḷā ca no adhi ca brūhi devādhā ca naḥ śarma yaccha dvibarhāḥ ||

1.114.11a अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।

1.114.11c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.114.11a avocāma namo asmā avasyavaḥ śṛṇotu no havaṁ rudro marutvān |
1.114.11c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.115.01a चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

1.115.01c आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥

1.115.01a citraṁ devānām ud agād anīkaṁ cakṣur mitrasya varuṇasyāgneḥ |
1.115.01c āprā dyāvāpṛthivī antarikṣaṁ sūrya ātmā jagatas tasthuṣaś ca ||

1.115.02a सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।

1.115.02c यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥

1.115.02a sūryo devīm uṣasaṁ rocamānām maryo na yoṣām abhy eti paścāt |
1.115.02c yatrā naro devayanto yugāni vitanvate prati bhadrāya bhadram ||

1.115.03a भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।

1.115.03c नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥

1.115.03a bhadrā aśvā haritaḥ sūryasya citrā etagvā anumādyāsaḥ |
1.115.03c namasyanto diva ā pṛṣṭham asthuḥ pari dyāvāpṛthivī yanti sadyaḥ ||

1.115.04a तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।

1.115.04c यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥

1.115.04a tat sūryasya devatvaṁ tan mahitvam madhyā kartor vitataṁ saṁ jabhāra |
1.115.04c yaded ayukta haritaḥ sadhasthād ād rātrī vāsas tanute simasmai ||

1.115.05a तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।

1.115.05c अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥

1.115.05a tan mitrasya varuṇasyābhicakṣe sūryo rūpaṁ kṛṇute dyor upasthe |
1.115.05c anantam anyad ruśad asya pājaḥ kṛṣṇam anyad dharitaḥ sam bharanti ||

1.115.06a अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।

1.115.06c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

1.115.06a adyā devā uditā sūryasya nir aṁhasaḥ pipṛtā nir avadyāt |
1.115.06c tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

1.116.01a नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः ।

1.116.01c यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥

1.116.01a nāsatyābhyām barhir iva pra vṛñje stomām̐ iyarmy abhriyeva vātaḥ |
1.116.01c yāv arbhagāya vimadāya jāyāṁ senājuvā nyūhatū rathena ||

1.116.02a वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।

1.116.02c तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥

1.116.02a vīḷupatmabhir āśuhemabhir vā devānāṁ vā jūtibhiḥ śāśadānā |
1.116.02c tad rāsabho nāsatyā sahasram ājā yamasya pradhane jigāya ||

1.116.03a तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।

1.116.03c तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥

1.116.03a tugro ha bhujyum aśvinodameghe rayiṁ na kaś cin mamṛvām̐ avāhāḥ |
1.116.03c tam ūhathur naubhir ātmanvatībhir antarikṣaprudbhir apodakābhiḥ ||

1.116.04a तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।

1.116.04c समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥

1.116.04a tisraḥ kṣapas trir ahātivrajadbhir nāsatyā bhujyum ūhathuḥ pataṅgaiḥ |
1.116.04c samudrasya dhanvann ārdrasya pāre tribhī rathaiḥ śatapadbhiḥ ṣaḷaśvaiḥ ||

1.116.05a अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।

1.116.05c यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥

1.116.05a anārambhaṇe tad avīrayethām anāsthāne agrabhaṇe samudre |
1.116.05c yad aśvinā ūhathur bhujyum astaṁ śatāritrāṁ nāvam ātasthivāṁsam ||

1.116.06a यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।

1.116.06c तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥

1.116.06a yam aśvinā dadathuḥ śvetam aśvam aghāśvāya śaśvad it svasti |
1.116.06c tad vāṁ dātram mahi kīrtenyam bhūt paidvo vājī sadam id dhavyo aryaḥ ||

1.116.07a युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम् ।

1.116.07c कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥

1.116.07a yuvaṁ narā stuvate pajriyāya kakṣīvate aradatam purandhim |
1.116.07c kārotarāc chaphād aśvasya vṛṣṇaḥ śataṁ kumbhām̐ asiñcataṁ surāyāḥ ||

1.116.08a हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।

1.116.08c ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥

1.116.08a himenāgniṁ ghraṁsam avārayethām pitumatīm ūrjam asmā adhattam |
1.116.08c ṛbīse atrim aśvināvanītam un ninyathuḥ sarvagaṇaṁ svasti ||

1.116.09a परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।

1.116.09c क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥

1.116.09a parāvataṁ nāsatyānudethām uccābudhnaṁ cakrathur jihmabāram |
1.116.09c kṣarann āpo na pāyanāya rāye sahasrāya tṛṣyate gotamasya ||

1.116.10a जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात् ।

1.116.10c प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम् ॥

1.116.10a jujuruṣo nāsatyota vavrim prāmuñcataṁ drāpim iva cyavānāt |
1.116.10c prātirataṁ jahitasyāyur dasrād it patim akṛṇutaṁ kanīnām ||

1.116.11a तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम् ।

1.116.11c यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय ॥

1.116.11a tad vāṁ narā śaṁsyaṁ rādhyaṁ cābhiṣṭiman nāsatyā varūtham |
1.116.11c yad vidvāṁsā nidhim ivāpagūḷham ud darśatād ūpathur vandanāya ||

1.116.12a तद्वां॑ नरा स॒नये॒ दंस॑ उ॒ग्रमा॒विष्कृ॑णोमि तन्य॒तुर्न वृ॒ष्टिम् ।

1.116.12c द॒ध्यङ्ह॒ यन्मध्वा॑थर्व॒णो वा॒मश्व॑स्य शी॒र्ष्णा प्र यदी॑मु॒वाच ॥

1.116.12a tad vā̍ṁ narā sa̱naye̱ daṁsa̍ u̱gram ā̱viṣ kṛ̍ṇomi tanya̱tur na vṛ̱ṣṭim |
1.116.12c da̱dhyaṅ ha̱ yan madhv ā̍tharva̱ṇo vā̱m aśva̍sya śī̱rṣṇā pra yad ī̍m u̱vāca̍ ||

1.116.13a अजो॑हवीन्नासत्या क॒रा वां॑ म॒हे याम॑न्पुरुभु॒जा पुरं॑धिः ।

1.116.13c श्रु॒तं तच्छासु॑रिव वध्रिम॒त्या हिर॑ण्यहस्तमश्विनावदत्तम् ॥

1.116.13a ajo̍havīn nāsatyā ka̱rā vā̍m ma̱he yāma̍n purubhujā̱ pura̍ndhiḥ |
1.116.13c śru̱taṁ tac chāsu̍r iva vadhrima̱tyā hira̍ṇyahastam aśvināv adattam ||

1.116.14a आ॒स्नो वृक॑स्य॒ वर्ति॑काम॒भीके॑ यु॒वं न॑रा नासत्यामुमुक्तम् ।

1.116.14c उ॒तो क॒विं पु॑रुभुजा यु॒वं ह॒ कृप॑माणमकृणुतं वि॒चक्षे॑ ॥

1.116.14a ā̱sno vṛka̍sya̱ varti̍kām a̱bhīke̍ yu̱vaṁ na̍rā nāsatyāmumuktam |
1.116.14c u̱to ka̱vim pu̍rubhujā yu̱vaṁ ha̱ kṛpa̍māṇam akṛṇutaṁ vi̱cakṣe̍ ||

1.116.15a च॒रित्रं॒ हि वेरि॒वाच्छे॑दि प॒र्णमा॒जा खे॒लस्य॒ परि॑तक्म्यायाम् ।

1.116.15c स॒द्यो जङ्घा॒माय॑सीं वि॒श्पला॑यै॒ धने॑ हि॑ते सर्त॑वे॒ प्रत्य॑धत्तम् ॥

1.116.15a ca̱ritra̱ṁ hi ver i̱vācche̍di pa̱rṇam ā̱jā khe̱lasya̱ pari̍takmyāyām |
1.116.15c sa̱dyo jaṅghā̱m āya̍sīṁ vi̱śpalā̍yai̱ dhane̍ hi̍te sarta̍ve̱ praty a̍dhattam ||

1.116.16a श॒तं मे॒षान्वृ॒क्ये॑ चक्षदा॒नमृ॒ज्राश्वं॒ तं पि॒तान्धं च॑कार ।

1.116.16c तस्मा॑ अ॒क्षी ना॑सत्या वि॒चक्ष॒ आध॑त्तं दस्रा भिषजावन॒र्वन् ॥

1.116.16a śa̱tam me̱ṣān vṛ̱kye̍ cakṣadā̱nam ṛ̱jrāśva̱ṁ tam pi̱tāndhaṁ ca̍kāra |
1.116.16c tasmā̍ a̱kṣī nā̍satyā vi̱cakṣa̱ ādha̍ttaṁ dasrā bhiṣajāv ana̱rvan ||

1.116.17a आ वां॒ रथं॑ दुहि॒ता सूर्य॑स्य॒ कार्ष्मे॑वातिष्ठ॒दर्व॑ता॒ जय॑न्ती ।

1.116.17c विश्वे॑ दे॒वा अन्व॑मन्यन्त हृ॒द्भिः समु॑ श्रि॒या ना॑सत्या सचेथे ॥

1.116.17a ā vā̱ṁ ratha̍ṁ duhi̱tā sūrya̍sya̱ kārṣme̍vātiṣṭha̱d arva̍tā̱ jaya̍ntī |
1.116.17c viśve̍ de̱vā anv a̍manyanta hṛ̱dbhiḥ sam u̍ śri̱yā nā̍satyā sacethe ||

1.116.18a यद॒या॑तं दिवो॑दासाय व॒र्तिर्भ॒रद्वा॑जायाश्विना॒ हय॑न्ता ।

1.116.18c रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥

1.116.18a yad ayātaṁ divodāsāya vartir bharadvājāyāśvinā hayantā |
1.116.18c revad uvāha sacano ratho vāṁ vṛṣabhaś ca śiṁśumāraś ca yuktā ||

1.116.19a रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता ।

1.116.19c आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥

1.116.19a rayiṁ sukṣatraṁ svapatyam āyuḥ suvīryaṁ nāsatyā vahantā |
1.116.19c ā jahnāvīṁ samanasopa vājais trir ahno bhāgaṁ dadhatīm ayātam ||

1.116.20a परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।

1.116.20c विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥

1.116.20a pariviṣṭaṁ jāhuṣaṁ viśvataḥ sīṁ sugebhir naktam ūhathū rajobhiḥ |
1.116.20c vibhindunā nāsatyā rathena vi parvatāṁ̐ ajarayū ayātam ||

1.116.21a एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।

1.116.21c निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥

1.116.21a ekasyā vastor āvataṁ raṇāya vaśam aśvinā sanaye sahasrā |
1.116.21c nir ahataṁ ducchunā indravantā pṛthuśravaso vṛṣaṇāv arātīḥ ||

1.116.22a शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।

1.116.22c शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥

1.116.22a śarasya cid ārcatkasyāvatād ā nīcād uccā cakrathuḥ pātave vāḥ |
1.116.22c śayave cin nāsatyā śacībhir jasuraye staryam pipyathur gām ||

1.116.23a अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।

1.116.23c पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥

1.116.23a avasyate stuvate kṛṣṇiyāya ṛjūyate nāsatyā śacībhiḥ |
1.116.23c paśuṁ na naṣṭam iva darśanāya viṣṇāpvaṁ dadathur viśvakāya ||

1.116.24a दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्व१न्तः ।

1.116.24c विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥

1.116.24a daśa rātrīr aśivenā nava dyūn avanaddhaṁ śnathitam apsv a1ntaḥ |

1.116.24c viprutaṁ rebham udani pravṛktam un ninyathuḥ somam iva sruveṇa ||

1.116.25a प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।

1.116.25c उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥

1.116.25a pra vāṁ daṁsāṁsy aśvināv avocam asya patiḥ syāṁ sugavaḥ suvīraḥ |
1.116.25c uta paśyann aśnuvan dīrgham āyur astam ivej jarimāṇaṁ jagamyām ||

1.117.01a मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।

1.117.01c बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥

1.117.01a madhvaḥ somasyāśvinā madāya pratno hotā vivāsate vām |
1.117.01c barhiṣmatī rātir viśritā gīr iṣā yātaṁ nāsatyopa vājaiḥ ||

1.117.02a यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति ।

1.117.02c येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥

1.117.02a yo vām aśvinā manaso javīyān rathaḥ svaśvo viśa ājigāti |
1.117.02c yena gacchathaḥ sukṛto duroṇaṁ tena narā vartir asmabhyaṁ yātam ||

1.117.03a ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन ।

1.117.03c मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥

1.117.03a ṛṣiṁ narāv aṁhasaḥ pāñcajanyam ṛbīsād atrim muñcatho gaṇena |
1.117.03c minantā dasyor aśivasya māyā anupūrvaṁ vṛṣaṇā codayantā ||

1.117.04a अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु ।

1.117.04c सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥

1.117.04a aśvaṁ na gūḻham aśvinā durevair ṛṣiṁ narā vṛṣaṇā rebham apsu |
1.117.04c saṁ taṁ riṇītho viprutaṁ daṁsobhir na vāṁ jūryanti pūrvyā kṛtāni ||

1.117.05a सुषुप्वांसं न निरृतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।

1.117.05c शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥

1.117.05a suṣupvāṁsaṁ na nirṛter upasthe sūryaṁ na dasrā tamasi kṣiyantam |
1.117.05c śubhe rukmaṁ na darśataṁ nikhātam ud ūpathur aśvinā vandanāya ||

1.117.06a तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।

1.117.06c शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥

1.117.06a tad vāṁ narā śaṁsyam pajriyeṇa kakṣīvatā nāsatyā parijman |
1.117.06c śaphād aśvasya vājino janāya śataṁ kumbhām̐ asiñcatam madhūnām ||

1.117.07a युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।

1.117.07c घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥

1.117.07a yuvaṁ narā stuvate kṛṣṇiyāya viṣṇāpvaṁ dadathur viśvakāya |
1.117.07c ghoṣāyai cit pitṛṣade duroṇe patiṁ jūryantyā aśvināv adattam ||

1.117.08a युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।

1.117.08c प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥

1.117.08a yuvaṁ śyāvāya ruśatīm adattam mahaḥ kṣoṇasyāśvinā kaṇvāya |
1.117.08c pravācyaṁ tad vṛṣaṇā kṛtaṁ vāṁ yan nārṣadāya śravo adhyadhattam ||

1.117.09a पुरू वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वम् ।

1.117.09c सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रम् ॥

1.117.09a purū varpāṁsy aśvinā dadhānā ni pedava ūhathur āśum aśvam |
1.117.09c sahasrasāṁ vājinam apratītam ahihanaṁ śravasyaṁ1 tarutram ||

1.117.10a एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।

1.117.10c यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम् ॥

1.117.10a etāni vāṁ śravasyā sudānū brahmāṅgūṣaṁ sadanaṁ rodasyoḥ |
1.117.10c yad vāṁ pajrāso aśvinā havante yātam iṣā ca viduṣe ca vājam ||

1.117.11a सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।

1.117.11c अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥

1.117.11a sūnor mānenāśvinā gṛṇānā vājaṁ viprāya bhuraṇā radantā |
1.117.11c agastye brahmaṇā vāvṛdhānā saṁ viśpalāṁ nāsatyāriṇītam ||

1.117.12a कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।

1.117.12c हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥

1.117.12a kuha yāntā suṣṭutiṁ kāvyasya divo napātā vṛṣaṇā śayutrā |
1.117.12c hiraṇyasyeva kalaśaṁ nikhātam ud ūpathur daśame aśvināhan ||

1.117.13a युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।

1.117.13c युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥

1.117.13a yuvaṁ cyavānam aśvinā jarantam punar yuvānaṁ cakrathuḥ śacībhiḥ |
1.117.13c yuvo rathaṁ duhitā sūryasya saha śriyā nāsatyāvṛṇīta ||

1.117.14a युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।

1.117.14c युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुरृज्रेभिरश्वैः ॥

1.117.14a yuvaṁ tugrāya pūrvyebhir evaiḥ punarmanyāv abhavataṁ yuvānā |
1.117.14c yuvam bhujyum arṇaso niḥ samudrād vibhir ūhathur ṛjrebhir aśvaiḥ ||

1.117.15a अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान् ।

1.117.15c निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥

1.117.15a ajohavīd aśvinā taugryo vām prolhaḥ samudram avyathir jaganvān |
1.117.15c niṣ ṭam ūhathuḥ suyujā rathena manojavasā vṛṣaṇā svasti ||

1.117.16a अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य ।

1.117.16c वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥

1.117.16a ajohavīd aśvinā vartikā vām āsno yat sīm amuñcataṁ vṛkasya |
1.117.16c vi jayuṣā yayathuḥ sānv adrer jātaṁ viṣvāco ahataṁ viṣeṇa ||

1.117.17a शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा ।

1.117.17c आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥

1.117.17a śatam meṣān vṛkye māmahānaṁ tamaḥ praṇītam aśivena pitrā |
1.117.17c ākṣī ṛjrāśve aśvināv adhattaṁ jyotir andhāya cakrathur vicakṣe ||

1.117.18a शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।

1.117.18c जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥

1.117.18a śunam andhāya bharam ahvayat sā vṛkīr aśvinā vṛṣaṇā nareti |

1.117.18c jāraḥ kanīna iva cakṣadāna ṛjrāśvaḥ śatam ekaṁ ca meṣān ||

1.117.19a मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।

1.117.19c अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥

1.117.19a mahī vām ūtir aśvinā mayobhūr uta srāmaṁ dhiṣṇyā saṁ riṇīthaḥ |
1.117.19c athā yuvām id ahvayat purandhir āgacchataṁ sīṁ vṛṣaṇāv avobhiḥ ||

1.117.20a अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गाम् ।

1.117.20c युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ॥

1.117.20a adhenuṁ dasrā staryaṁ1 viṣaktām apinvataṁ śayave aśvinā gām |
1.117.20c yuvaṁ śacībhir vimadāya jāyāṁ ny ūhathuḥ purumitrasya yoṣām ||

1.117.21a यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।

1.117.21c अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥

1.117.21a yavaṁ vṛkeṇāśvinā vapanteṣaṁ duhantā manuṣāya dasrā |
1.117.21c abhi dasyum bakureṇā dhamantoru jyotiś cakrathur āryāya ||

1.117.22a आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।

1.117.22c स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥

1.117.22a ātharvaṇāyāśvinā dadhīce 'śvyaṁ śiraḥ praty airayatam |
1.117.22c sa vām madhu pra vocad ṛtāyan tvāṣṭraṁ yad dasrāv apikakṣyaṁ vām ||

1.117.23a सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।

1.117.23c अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥

1.117.23a sadā kavī sumatim ā cake vāṁ viśvā dhiyo aśvinā prāvatam me |
1.117.23c asme rayiṁ nāsatyā bṛhantam apatyasācaṁ śrutyaṁ rarāthām ||

1.117.24a हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।

1.117.24c त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥

1.117.24a hiraṇyahastam aśvinā rarāṇā putraṁ narā vadhrimatyā adattam |
1.117.24c tridhā ha śyāvam aśvinā vikastam uj jīvasa airayataṁ sudānū ||

1.117.25a एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।

1.117.25c ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥

1.117.25a etāni vām aśvinā vīryāṇi pra pūrvyāṇy āyavo 'vocan |
1.117.25c brahma kṛṇvanto vṛṣaṇā yuvabhyāṁ suvīrāso vidatham ā vadema ||

1.118.01a आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।

1.118.01c यो मर्त्यस्य मनसो जवीयान्त्रिवन्धुरो वृषणा वातरंहाः ॥

1.118.01a ā vāṁ ratho aśvinā śyenapatvā sumṛḷīkaḥ svavām̐ yātv arvāṅ |
1.118.01c yo martyasya manaso javīyān trivandhuro vṛṣaṇā vātaraṁhāḥ ||

1.118.02a त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।

1.118.02c पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥

1.118.02a trivandhureṇa trivṛtā rathena tricakreṇa suvṛtā yātam arvāk |
1.118.02c pinvataṁ gā jinvatam arvato no vardhayatam aśvinā vīram asme ||

1.118.03a प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।

1.118.03c किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥

1.118.03a pravadyāmanā suvṛtā rathena dasrāv imaṁ śṛṇutaṁ ślokam adreḥ |
1.118.03c kim aṅga vām praty avartiṁ gamiṣṭhāhur viprāso aśvinā purājāḥ ||

1.118.04a आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतंगाः ।

1.118.04c ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥

1.118.04a ā vāṁ śyenāso aśvinā vahantu rathe yuktāsa āśavaḥ pataṅgāḥ |
1.118.04c ye apturo divyāso na gṛdhrā abhi prayo nāsatyā vahanti ||

1.118.05a आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।

1.118.05c परि वामश्वा वपुषः पतंगा वयो वहन्त्वरुषा अभीके ॥

1.118.05a ā vāṁ rathaṁ yuvatis tiṣṭhad atra juṣṭvī narā duhitā sūryasya |
1.118.05c pari vām aśvā vapuṣaḥ pataṅgā vayo vahantv aruṣā abhīke ||

1.118.06a उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।

1.118.06c निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानम् ॥

1.118.06a ud vandanam airataṁ daṁsanābhir ud rebhaṁ dasrā vṛṣaṇā śacībhiḥ |

1.118.06c niṣ ṭaugryam pārayathaḥ samudrāt punaś cyavānaṁ cakrathur yuvānam ||

1.118.07a युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।

1.118.07c युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥

1.118.07a yuvam atraye 'vanītāya taptam ūrjam omānam aśvināv adhattam |

1.118.07c yuvaṁ kaṇvāyāpiriptāya cakṣuḥ praty adhattaṁ suṣṭutiṁ jujuṣāṇā ||

1.118.08a युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।

1.118.08c अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम् ॥

1.118.08a yuvaṁ dhenuṁ śayave nādhitāyāpinvatam aśvinā pūrvyāya |

1.118.08c amuñcataṁ vartikām aṁhaso niḥ prati jaṅghāṁ viśpalāyā adhattam ||

1.118.09a युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।

1.118.09c जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम् ॥

1.118.09a yuvaṁ śvetam pedava indrajūtam ahihanam aśvinādattam aśvam |

1.118.09c johūtram aryo abhibhūtim ugraṁ sahasrasāṁ vṛṣaṇaṁ vīḍvaṅgam ||

1.118.10a ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।

1.118.10c आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥

1.118.10a tā vāṁ narā sv avase sujātā havāmahe aśvinā nādhamānāḥ |

1.118.10c ā na upa vasumatā rathena giro juṣāṇā suvitāya yātam ||

1.118.11a आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।

1.118.11c हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥

1.118.11a ā śyenasya javasā nūtanenāsme yātaṁ nāsatyā sajoṣāḥ |

1.118.11c have hi vām aśvinā rātahavyaḥ śaśvattamāyā uṣaso vyuṣṭau ||

1.119.01a आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।

1.119.01c सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥

1.119.01a ā vāṁ ratham purumāyam manojuvaṁ jīrāśvaṁ yajñiyaṁ jīvase huve |

1.119.01c sahasraketuṁ vaninaṁ śatadvasuṁ śruṣṭīvānaṁ varivodhām abhi prayaḥ ||

1.119.02a ऊ॒र्ध्वा धी॒तिः प्रत्य॑स्य॒ प्रया॑म॒न्यधा॑यि॒ शस्म॒न्सम॑यन्त॒ आ दिशः॑ ।

1.119.02c स्वदा॑मि घ॒र्मं प्रति॑ यन्त्यू॒तय॒ आ वा॑मू॒र्जानी॒ रथ॑मश्विनारुहत् ॥

1.119.02a ū̱rdhvā dhī̱tiḥ praty a̍sya̱ prayā̍ma̱ny adhā̍yi̱ śasma̱n sam a̍yanta̱ ā diśa̍ḥ |
1.119.02c svadā̍mi gha̱rmam prati̍ yanty ū̱taya̱ ā vā̍m ū̱rjānī̱ ratha̍m aśvināruhat ||

1.119.03a सं यन्मि॒थः प॑स्पृधा॒नासो॒ अग्म॑त शु॒भे म॒खा अमि॑ता जा॒यवो॒ रणे॑ ।

1.119.03c यु॒वोरह॑ प्रव॒णे चेकि॑ते॒ रथो॒ यद॑श्विना॒ वह॑थः सू॒रिमा वर॑म् ॥

1.119.03a saṁ yan mi̱thaḥ pa̍spṛdhā̱nāso̱ agma̍ta śu̱bhe ma̱khā ami̍tā jā̱yavo̱ raṇe̍ |
1.119.03c yu̱vor aha̍ prava̱ṇe ceki̍te̱ ratho̱ yad a̍śvinā̱ vaha̍thaḥ sū̱rim ā vara̍m ||

1.119.04a यु॒वं भु॒ज्युं भु॒रमा॑णं॒ विभि॑र्ग॒तं स्वयु॑क्तिभिर्नि॒वह॑न्ता पि॒तृभ्य॒ आ ।

1.119.04c या॒सि॒ष्टं व॒र्तिर्वृ॑षणा विजे॒न्यं१॒॑ दिवो॑दासाय॒ महि॑ चेति वा॒मवः॑ ॥

1.119.04a yu̱vam bhu̱jyum bhu̱ramā̍ṇa̱ṁ vibhi̍r ga̱taṁ svayu̍ktibhir ni̱vaha̍ntā pi̱tṛbhya̱ ā |
1.119.04c yā̱si̱ṣṭaṁ va̱rtir vṛ̍ṣaṇā vije̱nya̍ṁ1̱ divo̍dāsāya̱ mahi̍ ceti vā̱m ava̍ḥ ||

1.119.05a यु॒वोर॑श्विना॒ वपु॑षे युवा॒युजं॑ रथं॒ वाणी॑ येमतुरस्य॒ शर्ध्य॑म् ।

1.119.05c आ वां॑ पति॒त्वं स॒ख्याय॑ ज॒ग्मुषी॒ योषा॑वृणीत॒ जेन्या॑ यु॒वां पती॑ ॥

1.119.05a yu̱vor a̍śvinā̱ vapu̍ṣe yuvā̱yuja̍ṁ ratha̱ṁ vāṇī̍ yematur asya̱ śardhya̍m |
1.119.05c ā vā̍m pati̱tvaṁ sa̱khyāya̍ ja̱gmuṣī̱ yoṣā̍vṛṇīta̱ jenyā̍ yu̱vām patī̍ ||

1.119.06a यु॒वं रे॒भं परि॑षूतेरुरुष्यथो हि॒मेन॑ घ॒र्मं परि॑तप्त॒मत्र॑ये ।

1.119.06c यु॒वं श॒योर॑वसं पि॑प्यथु॒र्गवि॒ प्र दी॒र्घेण॒ वन्द॑नस्ता॒र्यायु॑षा ॥

1.119.06a yu̱vaṁ re̱bham pari̍ṣūter uruṣyatho hi̱mena̍ gha̱rmam pari̍tapta̱m atra̍ye |
1.119.06c yu̱vaṁ śa̱yor a̍vasam pi̍pyathu̱r gavi̱ pra dī̱rgheṇa̱ vanda̍nas tā̱ry āyu̍ṣā ||

1.119.07a यु॒वं वन्द॑नं निरृ॑तं जर॒ण्यया॒ रथं॒ न द॑स्रा कर॒णा समि॑न्वथः ।

1.119.07c क्षे॒त्रादा विप्रं॑ जनथो विप॒न्यया॒ प्र वा॒मत्र॑ विध॒ते दं॒सना॑ भुवत् ॥

1.119.07a yu̱vaṁ vanda̍naṁ nirṛ̍taṁ jara̱ṇyayā̱ ratha̱ṁ na da̍srā kara̱ṇā sam i̍nvathaḥ |
1.119.07c kṣe̱trād ā vipra̍ṁ janatho vipa̱nyayā̱ pra vā̱m atra̍ vidha̱te da̱ṁsanā̍ bhuvat ||

1.119.08a अग॑च्छतं॒ कृप॑माणं प॒राव॑ति पि॒तुः स्वस्य॒ त्यज॑सा नि॒बाधि॑तम् ।

1.119.08c स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः ॥

1.119.08a agacchataṁ kṛpamāṇam parāvati pituḥ svasya tyajasā nibādhitam |
1.119.08c svarvatīr ita ūtīr yuvor aha citrā abhīke abhavann abhiṣṭayaḥ ||

1.119.09a उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।

1.119.09c युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥

1.119.09a uta syā vām madhuman makṣikārapan made somasyauśijo huvanyati |
1.119.09c yuvaṁ dadhīco mana ā vivāsatho 'thā śiraḥ prati vām aśvyaṁ vadat ||

1.119.10a युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।

1.119.10c शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥

1.119.10a yuvam pedave puruvāram aśvinā spṛdhāṁ śvetaṁ tarutāraṁ duvasyathaḥ |
1.119.10c śaryair abhidyum pṛtanāsu duṣṭaraṁ carkṛtyam indram iva carṣaṇīsaham ||

1.120.01a का राधद्धोत्राश्विना वां को वां जोष उभयोः ।

1.120.01c कथा विधात्यप्रचेताः ॥

1.120.01a kā rādhad dhotrāśvinā vāṁ ko vāṁ joṣa ubhayoḥ |
1.120.01c kathā vidhāty apracetāḥ ||

1.120.02a विद्वांसाविद्दुरः पृच्छेदविद्वानित्थापरो अचेताः ।

1.120.02c नू चिन्नु मर्ते अक्रौ ॥

1.120.02a vidvāṁsāv id duraḥ pṛcched avidvān itthāparo acetāḥ |
1.120.02c nū cin nu marte akrau ||

1.120.03a ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य ।

1.120.03c प्रार्चद्दयमानो युवाकुः ॥

1.120.03a tā vidvāṁsā havāmahe vāṁ tā no vidvāṁsā manma vocetam adya |
1.120.03c prārcad dayamāno yuvākuḥ ||

1.120.04a वि पृच्छामि पाक्या३ न देवान्वषट्कृतस्याद्भुतस्य दस्रा ।

1.120.04c पातं च सह्यसो युवं च रभ्यसो नः ॥

1.120.04a vi pṛcchāmi pākyā3 na devān vaṣaṭkṛtasyādbhutasya dasrā |
1.120.04c pātaṁ ca sahyaso yuvaṁ ca rabhyaso naḥ ||

1.120.05a प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वाम्।

1.120.05c प्रैषयुर्न विद्वान्॥

1.120.05a pra yā ghoṣe bhṛgavāṇe na śobhe yayā vācā yajati pajriyo vām |
1.120.05c praiṣayur na vidvān ||

1.120.06a श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम्।

1.120.06c आक्षी शुभस्पती दन्॥

1.120.06a śrutaṁ gāyatraṁ takavānasyāhaṁ cid dhi rirebhāśvinā vām |
1.120.06c ākṣī śubhas patī dan ||

1.120.07a युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतम्।

1.120.07c ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः॥

1.120.07a yuvaṁ hy āstam maho ran yuvaṁ vā yan niratataṁsatam |
1.120.07c tā no vasū sugopā syātam pātaṁ no vṛkād aghāyoḥ ||

1.120.08a मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः।

1.120.08c स्तनाभुजो अशिश्वीः॥

1.120.08a mā kasmai dhātam abhy amitriṇe no mākutrā no gṛhebhyo dhenavo guḥ |
1.120.08c stanābhujo aśiśvīḥ ||

1.120.09a दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै।

1.120.09c इषे च नो मिमीतं धेनुमत्यै॥

1.120.09a duhīyan mitradhitaye yuvāku rāye ca no mimītaṁ vājavatyai |
1.120.09c iṣe ca no mimītaṁ dhenumatyai ||

1.120.10a अश्विनोरसनं रथमनश्वं वाजिनीवतोः।

1.120.10c तेनाहं भूरि चाकन॥

1.120.10a aśvinor asanaṁ ratham anaśvaṁ vājinīvatoḥ |
1.120.10c tenāham bhūri cākana ||

1.120.11a अयं समह मा तनूह्याते जनाँ अनु ।

1.120.11c सोमपेयं सुखो रथः ॥

1.120.11a ayaṁ samaha mā tanūhyāte janām̐ anu |
1.120.11c somapeyaṁ sukho rathaḥ ||

1.120.12a अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः ।

1.120.12c उभा ता बस्रि नश्यतः ॥

1.120.12a adha svapnasya nir vide 'bhuñjataś ca revataḥ |
1.120.12c ubhā tā basri naśyataḥ ||

1.121.01a कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अङ्गिरसां तुरण्यन् ।

1.121.01c प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥

1.121.01a kad itthā nṝm̐ḥ pātraṁ devayatāṁ śravad giro aṅgirasāṁ turaṇyan |
1.121.01c pra yad ānaḍ viśa ā harmyasyoru kraṁsate adhvare yajatraḥ ||

1.121.02a स्तम्भीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।

1.121.02c अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥

1.121.02a stambhīd dha dyāṁ sa dharuṇaṁ pruṣāyad ṛbhur vājāya draviṇaṁ naro goḥ |
1.121.02c anu svajām mahiṣaś cakṣata vrām menām aśvasya pari mātaraṁ goḥ ||

1.121.03a नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।

1.121.03c तक्षद्वज्रं नियुतं तस्तम्भद्द्यां चतुष्पदे नर्याय द्विपादे ॥

1.121.03a nakṣad dhavam aruṇīḥ pūrvyaṁ rāṭ turo viśām aṅgirasām anu dyūn |
1.121.03c takṣad vajraṁ niyutaṁ tastambhad dyāṁ catuṣpade naryāya dvipāde ||

1.121.04a अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।

1.121.04c यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥

1.121.04a asya made svaryaṁ dā ṛtāyāpīvṛtam usriyāṇām anīkam |
1.121.04c yad dha prasarge trikakum nivartad apa druho mānuṣasya duro vaḥ ||

1.121.05a तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।

1.121.05c शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥

1.121.05a tubhyam payo yat pitarāv anītām rādhaḥ suretas turaṇe bhuraṇyū |
1.121.05c śuci yat te rekṇa āyajanta sabardughāyāḥ paya usriyāyāḥ ||

1.121.06a अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः ।

1.121.06c इन्दुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिञ्चञ्जरणाभि धाम ॥

1.121.06a adha pra jajñe taraṇir mamattu pra rocy asyā uṣaso na sūraḥ |
1.121.06c indur yebhir āṣṭa sveduhavyaiḥ sruveṇa siñcañ jaraṇābhi dhāma ||

1.121.07a स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।

1.121.07c यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥

1.121.07a svidhmā yad vanadhitir apasyāt sūro adhvare pari rodhanā goḥ |
1.121.07c yad dha prabhāsi kṛtvyām̐ anu dyūn anarviśe paśviṣe turāya ||

1.121.08a अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम् ।

1.121.08c हरिं यत्ते मन्दिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यम् ॥

1.121.08a aṣṭā maho diva ādo harī iha dyumnāsāham abhi yodhāna utsam |
1.121.08c hariṁ yat te mandinaṁ dukṣan vṛdhe gorabhasam adribhir vātāpyam ||

1.121.09a त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा ।

1.121.09c कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः ॥

1.121.09a tvam āyasam prati vartayo gor divo aśmānam upanītam ṛbhvā |
1.121.09c kutsāya yatra puruhūta vanvañ chuṣṇam anantaiḥ pariyāsi vadhaiḥ ||

1.121.10a पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।

1.121.10c शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥

1.121.10a purā yat sūras tamaso apītes tam adrivaḥ phaligaṁ hetim asya |
1.121.10c śuṣṇasya cit parihitaṁ yad ojo divas pari sugrathitaṁ tad ādaḥ ||

1.121.11a अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।

1.121.11c त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥

1.121.11a anu tvā mahī pājasī acakre dyāvākṣāmā madatām indra karman |

1.121.11c tvaṁ vṛtram āśayānaṁ sirāsu maho vajreṇa siṣvapo varāhum ||

1.121.12a त्वमिन्द्र नर्यो याँ अवो नॄन्तिष्ठा वातस्य सुयुजो वहिष्ठान् ।

1.121.12c यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रम् ॥

1.121.12a tvam indra naryo yām̐ avo nṝn tiṣṭhā vātasya suyujo vahiṣṭhān |
1.121.12c yaṁ te kāvya uśanā mandinaṁ dād vṛtrahaṇam pāryaṁ tatakṣa vajram ||

1.121.13a त्वं सूरो हरितो रामयो नॄन्भरच्चक्रमेतशो नायमिन्द्र ।

1.121.13c प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥

1.121.13a tvaṁ sūro harito rāmayo nṝn bharac cakram etaśo nāyam indra |
1.121.13c prāsya pāraṁ navatiṁ nāvyānām api kartam avartayo 'yajyūn ||

1.121.14a त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके ।

1.121.14c प्र नो वाजान्रथ्यो३ अश्वबुध्यानिषे यन्धि श्रवसे सूनृतायै ॥

1.121.14a tvaṁ no asyā indra durhaṇāyāḥ pāhi vajrivo duritād abhīke |
1.121.14c pra no vājān rathyo3 aśvabudhyān iṣe yandhi śravase sūnṛtāyai ||

1.121.15a मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरन्त ।

1.121.15c आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥

1.121.15a mā sā te asmat sumatir vi dasad vājapramahaḥ sam iṣo varanta |
1.121.15c ā no bhaja maghavan goṣv aryo maṁhiṣṭhās te sadhamādaḥ syāma ||

1.122.01a प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।

1.122.01c दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥

1.122.01a pra vaḥ pāntaṁ raghumanyavo 'ndho yajñaṁ rudrāya mīḻhuṣe bharadhvam |
1.122.01c divo astoṣy asurasya vīrair iṣudhyeva maruto rodasyoḥ ||

1.122.02a पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।

1.122.02c स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥

1.122.02a patnīva pūrvahūtiṁ vāvṛdhadhyā uṣāsānaktā purudhā vidāne |
1.122.02c starīr nātkaṁ vyutaṁ vasānā sūryasya śriyā sudṛśī hiraṇyaiḥ ||

1.122.03a ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।

1.122.03c शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥

1.122.03a mamattu naḥ parijmā vasarhā mamattu vāto apāṁ vṛṣaṇvān |
1.122.03c śiśītam indrāparvatā yuvaṁ nas tan no viśve varivasyantu devāḥ ||

1.122.04a उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।

1.122.04c प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥

1.122.04a uta tyā me yaśasā śvetanāyai vyantā pāntauśijo huvadhyai |
1.122.04c pra vo napātam apāṁ kṛṇudhvam pra mātarā rāspinasyāyoḥ ||

1.122.05a आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे ।

1.122.05c प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ॥

1.122.05a ā vo ruvaṇyum auśijo huvadhyai ghoṣeva śaṁsam arjunasya naṁśe |
1.122.05c pra vaḥ pūṣṇe dāvana ām̐ acchā voceya vasutātim agneḥ ||

1.122.06a श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।

1.122.06c श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ॥

1.122.06a śrutam me mitrāvaruṇā havemota śrutaṁ sadane viśvataḥ sīm |
1.122.06c śrotu naḥ śroturātiḥ suśrotuḥ sukṣetrā sindhur adbhiḥ ||

1.122.07a स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।

1.122.07c श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन् ॥

1.122.07a stuṣe sā vāṁ varuṇa mitra rātir gavāṁ śatā pṛkṣayāmeṣu pajre |
1.122.07c śrutarathe priyarathe dadhānāḥ sadyaḥ puṣṭiṁ nirundhānāso agman ||

1.122.08a अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।

1.122.08c जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ॥

1.122.08a asya stuṣe mahimaghasya rādhaḥ sacā sanema nahuṣaḥ suvīrāḥ |
1.122.08c jano yaḥ pajrebhyo vājinīvān aśvāvato rathino mahyaṁ sūriḥ ||

1.122.09a जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।

1.122.09c स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥

1.122.09a jano yo mitrāvaruṇāv abhidhrug apo na vāṁ sunoty akṣṇayādhruk |
1.122.09c svayaṁ sa yakṣmaṁ hṛdaye ni dhatta āpa yad īṁ hotrābhir ṛtāvā ||

1.122.10a स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।

1.122.10c विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥

1.122.10a sa vrādhato nahuṣo daṁsujūtaḥ śardhastaro narāṁ gūrtaśravāḥ |
1.122.10c visṛṣṭarātir yāti bāḷhasṛtvā viśvāsu pṛtsu sadam ic chūraḥ ||

1.122.11a अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।

1.122.11c नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥

1.122.11a adha gmantā nahuṣo havaṁ sūreḥ śrotā rājāno amṛtasya mandrāḥ |
1.122.11c nabhojuvo yan niravasya rādhaḥ praśastaye mahinā rathavate ||

1.122.12a एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।

1.122.12c द्युम्नानि येषु वसुताती रारन्विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥

1.122.12a etaṁ śardhaṁ dhāma yasya sūrer ity avocan daśatayasya naṁśe |
1.122.12c dyumnāni yeṣu vasutātī rāran viśve sanvantu prabhṛtheṣu vājam ||

1.122.13a मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना ।

1.122.13c किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ॥

1.122.13a mandāmahe daśatayasya dhāser dvir yat pañca bibhrato yanty annā |
1.122.13c kim iṣṭāśva iṣṭaraśmir eta īśānāsas taruṣa ṛñjate nṝn ||

1.122.14a हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।

1.122.14c अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥

1.122.14a hiraṇyakarṇam maṇigrīvam arṇas tan no viśve varivasyantu devāḥ |
1.122.14c aryo giraḥ sadya ā jagmuṣīr osrāś cākantūbhayeṣv asme ||

1.122.15a चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः ।

1.122.15c रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥

1.122.15a catvāro mā maśarśārasya śiśvas trayo rājña āyavasasya jiṣṇoḥ |

1.122.15c ratho vām mitrāvaruṇā dīrghāpsāḥ syūmagabhastiḥ sūro nādyaut ||

1.123.01a पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ।

1.123.01c कृष्णादुदस्थादर्या३ विहायाश्चिकित्सन्ती मानुषाय क्षयाय ॥

1.123.01a pṛthū ratho dakṣiṇāyā ayojy ainaṁ devāso amṛtāso asthuḥ |
1.123.01c kṛṣṇād ud asthād aryā3 vihāyāś cikitsantī mānuṣāya kṣayāya ||

1.123.02a पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।

1.123.02c उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥

1.123.02a pūrvā viśvasmād bhuvanād abodhi jayantī vājam bṛhatī sanutrī |
1.123.02c uccā vy akhyad yuvatiḥ punarbhūr oṣā agan prathamā pūrvahūtau ||

1.123.03a यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।

1.123.03c देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥

1.123.03a yad adya bhāgaṁ vibhajāsi nṛbhya uṣo devi martyatrā sujāte |
1.123.03c devo no atra savitā damūnā anāgaso vocati sūryāya ||

1.123.04a गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।

1.123.04c सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम् ॥

1.123.04a gṛhaṁ-gṛham ahanā yāty acchā dive-dive adhi nāmā dadhānā |
1.123.04c siṣāsantī dyotanā śaśvad āgād agram-agram id bhajate vasūnām ||

1.123.05a भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।

1.123.05c पश्चा स दघ्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥

1.123.05a bhagasya svasā varuṇasya jāmir uṣaḥ sūnṛte prathamā jarasva |
1.123.05c paścā sa daghyā yo aghasya dhātā jayema taṁ dakṣiṇayā rathena ||

1.123.06a उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः ।

1.123.06c स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः ॥

1.123.06a ud īratāṁ sūnṛtā ut purandhīr ud agnayaḥ śuśucānāso asthuḥ |
1.123.06c spārhā vasūni tamasāpagūḷhāviṣ kṛṇvanty uṣaso vibhātīḥ ||

1.123.07a अपान्यदेत्यभ्य१न्यदेति विषुरूपे अहनी सं चरेते ।

1.123.07c परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥

1.123.07a apānyad ety abhy a1nyad eti viṣurūpe ahanī saṁ carete |
1.123.07c parikṣitos tamo anyā guhākar adyaud uṣāḥ śośucatā rathena ||

1.123.08a सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम ।

1.123.08c अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः ॥

1.123.08a sadṛśīr adya sadṛśīr id u śvo dīrghaṁ sacante varuṇasya dhāma |
1.123.08c anavadyās triṁśataṁ yojanāny ekaikā kratum pari yanti sadyaḥ ||

1.123.09a जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।

1.123.09c ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥

1.123.09a jānaty ahnaḥ prathamasya nāma śukrā kṛṣṇād ajaniṣṭa śvitīcī |
1.123.09c ṛtasya yoṣā na mināti dhāmāhar-ahar niṣkṛtam ācarantī ||

1.123.10a कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम् ।

1.123.10c संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥

1.123.10a kanyeva tanvā3 śāśadānām̐ eṣi devi devam iyakṣamāṇam |
1.123.10c saṁsmayamānā yuvatiḥ purastād āvir vakṣāṁsi kṛṇuṣe vibhātī ||

1.123.11a सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।

1.123.11c भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥

1.123.11a susaṅkāśā mātṛmṛṣṭeva yoṣāvis tanvaṁ kṛṇuṣe dṛśe kam |
1.123.11c bhadrā tvam uṣo vitaraṁ vy uccha na tat te anyā uṣaso naśanta ||

1.123.12a अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।

1.123.12c परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः ॥

1.123.12a aśvāvatīr gomatīr viśvavārā yatamānā raśmibhiḥ sūryasya |
1.123.12c parā ca yanti punar ā ca yanti bhadrā nāma vahamānā uṣāsaḥ ||

1.123.13a ऋतस्य रश्मिमनुयच्छमाना भद्रम्भद्रं क्रतुमस्मासु धेहि ।

1.123.13c उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः ॥

1.123.13a ṛtasya raśmim anuyacchamānā bhadram-bhadraṁ kratum asmāsu dhehi |
1.123.13c uṣo no adya suhavā vy ucchāsmāsu rāyo maghavatsu ca syuḥ ||

1.124.01a उषा उच्छन्ती समिधाने अग्ना उद्यन्सूर्य उर्विया ज्योतिरश्रेत् ।

1.124.01c देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥

1.124.01a uṣā ucchantī samidhāne agnā udyan sūrya urviyā jyotir aśret |
1.124.01c devo no atra savitā nv artham prāsāvīd dvipat pra catuṣpad ityai ||

1.124.02a अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।

1.124.02c ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥

1.124.02a aminatī daivyāni vratāni praminatī manuṣyā yugāni |
1.124.02c īyuṣīṇām upamā śaśvatīnām āyatīnām prathamoṣā vy adyaut ||

1.124.03a एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।

1.124.03c ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥

1.124.03a eṣā divo duhitā praty adarśi jyotir vasānā samanā purastāt |
1.124.03c ṛtasya panthām anv eti sādhu prajānatīva na diśo mināti ||

1.124.04a उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।

1.124.04c अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥

1.124.04a upo adarśi śundhyuvo na vakṣo nodhā ivāvir akṛta priyāṇi |
1.124.04c admasan na sasato bodhayantī śaśvattamāgāt punar eyuṣīṇām ||

1.124.05a पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुम् ।

1.124.05c व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ॥

1.124.05a pūrve ardhe rajaso aptyasya gavāṁ janitry akṛta pra ketum |
1.124.05c vy u prathate vitaraṁ varīya obhā pṛṇantī pitror upasthā ||

1.124.06a एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।

1.124.06c अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥

1.124.06a eved eṣā purutamā dṛśe kaṁ nājāmiṁ na pari vṛṇakti jāmim |
1.124.06c arepasā tanvā3 śāśadānā nārbhād īṣate na maho vibhātī ||

1.124.07a अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।

1.124.07c जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥

1.124.07a abhrāteva puṁsa eti pratīcī gartārug iva sanaye dhanānām |
1.124.07c jāyeva patya uśatī suvāsā uṣā hasreva ni riṇīte apsaḥ ||

1.124.08a स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।

1.124.08c व्युच्छन्ती रश्मिभिः सूर्यस्याञ्ज्यङ्क्ते समनगा इव व्राः ॥

1.124.08a svasā svasre jyāyasyai yonim āraig apaity asyāḥ praticakṣyeva |
1.124.08c vyucchantī raśmibhiḥ sūryasyāñjy aṅkte samanagā iva vrāḥ ||

1.124.09a आसां पूर्वासामहसु स्वसृणामपरा पूर्वामभ्येति पश्चात् ।

1.124.09c ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥

1.124.09a āsām pūrvāsām ahasu svasṝṇām aparā pūrvām abhy eti paścāt |
1.124.09c tāḥ pratnavan navyasīr nūnam asme revad ucchantu sudinā uṣāsaḥ ||

1.124.10a प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।

1.124.10c रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती ॥

1.124.10a pra bodhayoṣaḥ pṛṇato maghony abudhyamānāḥ paṇayaḥ sasantu |
1.124.10c revad uccha maghavadbhyo maghoni revat stotre sūnṛte jārayantī ||

1.124.11a अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।

1.124.11c वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥

1.124.11a aveyam aśvaid yuvatiḥ purastād yuṅkte gavām aruṇānām anīkam |
1.124.11c vi nūnam ucchād asati pra ketur gṛhaṁ-gṛham upa tiṣṭhāte agniḥ ||

1.124.12a उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।

1.124.12c अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥

1.124.12a ut te vayaś cid vasater apaptan naraś ca ye pitubhājo vyuṣṭau |
1.124.12c amā sate vahasi bhūri vāmam uṣo devi dāśuṣe martyāya ||

1.124.13a अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।

1.124.13c युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम् ॥

1.124.13a astoḍhvaṁ stomyā brahmaṇā me 'vīvṛdhadhvam uśatīr uṣāsaḥ |
1.124.13c yuṣmākaṁ devīr avasā sanema sahasriṇaṁ ca śatinaṁ ca vājam ||

1.125.01a प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।

1.125.01c तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥

1.125.01a prātā ratnam prātaritvā dadhāti taṁ cikitvān pratigṛhyā ni dhatte |
1.125.01c tena prajāṁ vardhayamāna āyū rāyas poṣeṇa sacate suvīraḥ ||

1.125.02a सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।

1.125.02c यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥

1.125.02a sugur asat suhiraṇyaḥ svaśvo bṛhad asmai vaya indro dadhāti |
1.125.02c yas tvāyantaṁ vasunā prātaritvo mukṣījayeva padim utsināti ||

1.125.03a आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।

1.125.03c अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥

1.125.03a āyam adya sukṛtam prātar icchann iṣṭeḥ putraṁ vasumatā rathena |
1.125.03c aṁśoḥ sutam pāyaya matsarasya kṣayadvīraṁ vardhaya sūnṛtābhiḥ ||

1.125.04a उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।

1.125.04c पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥

1.125.04a upa kṣaranti sindhavo mayobhuva ījānaṁ ca yakṣyamāṇaṁ ca dhenavaḥ |
1.125.04c pṛṇantaṁ ca papuriṁ ca śravasyavo ghṛtasya dhārā upa yanti viśvataḥ ||

1.125.05a नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।

1.125.05c तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥

1.125.05a nākasya pṛṣṭhe adhi tiṣṭhati śrito yaḥ pṛṇāti sa ha deveṣu gacchati |
1.125.05c tasmā āpo ghṛtam arṣanti sindhavas tasmā iyaṁ dakṣiṇā pinvate sadā ||

1.125.06a दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।

1.125.06c दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥

1.125.06a dakṣiṇāvatām id imāni citrā dakṣiṇāvatāṁ divi sūryāsaḥ |
1.125.06c dakṣiṇāvanto amṛtam bhajante dakṣiṇāvantaḥ pra tiranta āyuḥ ||

1.125.07a मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।

1.125.07c अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ॥

1.125.07a mā pṛṇanto duritam ena āran mā jāriṣuḥ sūrayaḥ suvratāsaḥ |
1.125.07c anyas teṣām paridhir astu kaś cid apṛṇantam abhi saṁ yantu śokāḥ ||

1.126.01a अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।

1.126.01c यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥

1.126.01a amandān stomān pra bhare manīṣā sindhāv adhi kṣiyato bhāvyasya |
1.126.01c yo me sahasram amimīta savān atūrto rājā śrava icchamānaḥ ||

1.126.02a शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्सद्य आदम् ।

1.126.02c शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥

1.126.02a śataṁ rājño nādhamānasya niṣkāñ chatam aśvān prayatān sadya ādam |
1.126.02c śataṁ kakṣīvāṁ̐ asurasya gonāṁ divi śravo 'jaram ā tatāna ||

1.126.03a उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः ।

1.126.03c षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ॥

1.126.03a upa mā śyāvāḥ svanayena dattā vadhūmanto daśa rathāso asthuḥ |
1.126.03c ṣaṣṭiḥ sahasram anu gavyam āgāt sanat kakṣīvāṁ̐ abhipitve ahnām ||

1.126.04a चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।

1.126.04c मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ॥

1.126.04a catvāriṁśad daśarathasya śoṇāḥ sahasrasyāgre śreṇiṁ nayanti |
1.126.04c madacyutaḥ kṛśanāvato atyān kakṣīvanta ud amṛkṣanta pajrāḥ ||

1.126.05a पूर्वामनु प्रयतिमा ददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ।

1.126.05c सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥

1.126.05a pūrvām anu prayatim ā dade vas trīn yuktām̐ aṣṭāv aridhāyaso gāḥ |
1.126.05c subandhavo ye viśyā iva vrā anasvantaḥ śrava aiṣanta pajrāḥ ||

1.126.06a आगधिता परिगधिता या कशीकेव जङ्गहे ।

1.126.06c ददाति मह्यं यादुरी याशूनां भोज्या शता ॥

1.126.06a āgadhitā parigadhitā yā kaśīkeva jaṅgahe |
1.126.06c dadāti mahyaṁ yādurī yāśūnām bhojyā śatā ||

1.126.07a उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।

1.126.07c सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥

1.126.07a upopa me parā mṛśa mā me dabhrāṇi manyathāḥ |
1.126.07c sarvāham asmi romaśā gandhārīṇām ivāvikā ||

1.127.01a अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।

1.127.01d य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।

1.127.01f घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥

1.127.01a agniṁ hotāram manye dāsvantaṁ vasuṁ sūnuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam |
1.127.01d ya ūrdhvayā svadhvaro devo devācyā kṛpā |
1.127.01f ghṛtasya vibhrāṣṭim anu vaṣṭi śociṣājuhvānasya sarpiṣaḥ ||

1.127.02a यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।

1.127.02d परिज्मानमिव द्यां होतारं चर्षणीनाम् ।

1.127.02f शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥

1.127.02a yajiṣṭhaṁ tvā yajamānā huvema jyeṣṭham aṅgirasāṁ vipra manmabhir viprebhiḥ śukra manmabhiḥ |
1.127.02d parijmānam iva dyāṁ hotāraṁ carṣaṇīnām |
1.127.02f śociṣkeśaṁ vṛṣaṇaṁ yam imā viśaḥ prāvantu jūtaye viśaḥ ||

1.127.03a स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ।

1.127.03d वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।

1.127.03f निःषहमाणो यमते नायते धन्वासहा नायते ॥

1.127.03a sa hi purū cid ojasā virukmatā dīdyāno bhavati druhantaraḥ paraśur na druhantaraḥ |
1.127.03d vīḷu cid yasya samṛtau śruvad vaneva yat sthiram |
1.127.03f niḥṣahamāṇo yamate nāyate dhanvāsahā nāyate ||

1.127.04a दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे ।

1.127.04d प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा ।

1.127.04f स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥

1.127.04a dṛḷhā cid asmā anu dur yathā vide tejiṣṭhābhir araṇibhir dāṣṭy avase 'gnaye dāṣṭy avase |
1.127.04d pra yaḥ purūṇi gāhate takṣad vaneva śociṣā |
1.127.04f sthirā cid annā ni riṇāty ojasā ni sthirāṇi cid ojasā ||

1.127.05a तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात् ।

1.127.05d आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे ।

1.127.05f भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥

1.127.05a tam asya pṛkṣam uparāsu dhīmahi naktaṁ yaḥ sudarśataro divātarād aprāyuṣe divātarāt |
1.127.05d ād asyāyur grabhaṇavad vīḷu śarma na sūnave |
1.127.05f bhaktam abhaktam avo vyanto ajarā agnayo vyanto ajarāḥ ||

1.127.06a स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।

1.127.06d आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।

1.127.06f अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥

1.127.06a sa hi śardho na mārutaṁ tuviṣvaṇir apnasvatīṣūrvarāsv iṣṭanir ārtanāsv iṣṭaniḥ |
1.127.06d ādad dhavyāny ādadir yajñasya ketur arhaṇā |
1.127.06f adha smāsya harṣato hṛṣīvato viśve juṣanta panthāṁ naraḥ śubhe na panthām ||

1.127.07a द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।

1.127.07d अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।

1.127.07f प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥

1.127.07a dvitā yad īṁ kīstāso abhidyavo namasyanta upavocanta bhṛgavo mathnanto dāśā

bhṛgavaḥ |
1.127.07d agnir īśe vasūnāṁ śucir yo dharṇir eṣām |
1.127.07f priyām̐ apidhīm̐r vaniṣīṣṭa medhira ā vaniṣīṣṭa medhiraḥ ||

1.127.08a विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दम्पतिं भुजे सत्यगिर्वाहसं भुजे ।

1.127.08d अतिथिं मानुषाणां पितुर्न यस्यासया ।

1.127.08f अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥

1.127.08a viśvāsāṁ tvā viśām patiṁ havāmahe sarvāsāṁ samānaṁ dampatim bhuje satyagirvāhasam bhuje |
1.127.08d atithim mānuṣāṇām pitur na yasyāsayā |
1.127.08f amī ca viśve amṛtāsa ā vayo havyā deveṣv ā vayaḥ ||

1.127.09a त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।

1.127.09d शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।

1.127.09f अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥

1.127.09a tvam agne sahasā sahantamaḥ śuṣmintamo jāyase devatātaye rayir na devatātaye |
1.127.09d śuṣmintamo hi te mado dyumnintama uta kratuḥ |
1.127.09f adha smā te pari caranty ajara śruṣṭīvāno nājara ||

1.127.10a प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये ।

1.127.10d प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे ।

1.127.10f अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणाम् ॥

1.127.10a pra vo mahe sahasā sahasvata uṣarbudhe paśuṣe nāgnaye stomo babhūtv agnaye |
1.127.10d prati yad īṁ haviṣmān viśvāsu kṣāsu joguve |
1.127.10f agre rebho na jarata ṛṣūṇāṁ jūrṇir hota ṛṣūṇām ||

1.127.11a स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना ।

1.127.11d महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।

1.127.11f महि स्तोतृभ्यो मघवन्सुवीर्यं मथीरुग्रो न शवसा ॥

1.127.11a sa no nediṣṭhaṁ dadṛśāna ā bharāgne devebhiḥ sacanāḥ sucetunā maho rāyaḥ sucetunā |
1.127.11d mahi śaviṣṭha nas kṛdhi sañcakṣe bhuje asyai |
1.127.11f mahi stotṛbhyo maghavan suvīryam mathīr ugro na śavasā ||

1.128.01a अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतम् ।

1.128.01d विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते ।

1.128.01f अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे ॥

1.128.01a ayaṁ jāyata manuṣo dharīmaṇi hotā yajiṣṭha uśijām anu vratam agniḥ svam anu vratam |
1.128.01d viśvaśruṣṭiḥ sakhīyate rayir iva śravasyate |
1.128.01f adabdho hotā ni ṣadad ilas pade parivīta ilas pade ||

1.128.02a तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता ।

1.128.02d स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।

1.128.02f यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥

1.128.02a taṁ yajñasādham api vātayāmasy ṛtasya pathā namasā haviṣmatā devatātā haviṣmatā |
1.128.02d sa na ūrjām upābhṛty ayā kṛpā na jūryati |
1.128.02f yam mātariśvā manave parāvato devam bhāḥ parāvataḥ ||

1.128.03a एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत् ।

1.128.03d शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ।

1.128.03f सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥

1.128.03a evena sadyaḥ pary eti pārthivam muhurgī reto vṛṣabhaḥ kanikradad dadhad retaḥ
kanikradat |
1.128.03d śataṁ cakṣāṇo akṣabhir devo vaneṣu turvaṇiḥ |
1.128.03f sado dadhāna upareṣu sānuṣv agniḥ pareṣu sānuṣu ||

1.128.04a स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ।

1.128.04d क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।

1.128.04f यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥

1.128.04a sa sukratuḥ purohito dame-dame 'gnir yajñasyādhvarasya cetati kratvā yajñasya cetati |
1.128.04d kratvā vedhā iṣūyate viśvā jātāni paspaśe |
1.128.04f yato ghṛtaśrīr atithir ajāyata vahnir vedhā ajāyata ||

1.128.05a क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या ।

1.128.05d स हि ष्मा दानमिन्वति वसूनां च मज्मना ।

1.128.05f स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥

1.128.05a kratvā yad asya taviṣīṣu pṛñcate 'gner avena marutāṁ na bhojyeṣirāya na bhojyā |
1.128.05d sa hi ṣmā dānam invati vasūnāṁ ca majmanā |
1.128.05f sa nas trāsate duritād abhihrutaḥ śaṁsād aghād abhihrutaḥ ||

1.128.06a विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत् ।

1.128.06d विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ।

1.128.06f विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥

1.128.06a viśvo vihāyā aratir vasur dadhe haste dakṣiṇe taraṇir na śiśrathac chravasyayā na śiśrathat |
1.128.06d viśvasmā id iṣudhyate devatrā havyam ohiṣe |
1.128.06f viśvasmā it sukṛte vāram ṛṇvaty agnir dvārā vy ṛṇvati ||

1.128.07a स मानुषे वृजने शंतमो हितो३ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः ।

1.128.07d स हव्या मानुषाणामिळा कृतानि पत्यते ।

1.128.07f स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥

1.128.07a sa mānuṣe vṛjane śantamo hito3 'gnir yajñeṣu jenyo na viśpatiḥ priyo yajñeṣu viśpatiḥ |
1.128.07d sa havyā mānuṣāṇām iḻā kṛtāni patyate |
1.128.07f sa nas trāsate varuṇasya dhūrter maho devasya dhūrteḥ ||

1.128.08a अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।

1.128.08d विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।

1.128.08f देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥

1.128.08a agniṁ hotāram īḻate vasudhitim priyaṁ cetiṣṭham aratiṁ ny erire havyavāhaṁ ny erire |
1.128.08d viśvāyuṁ viśvavedasaṁ hotāraṁ yajataṁ kavim |
1.128.08f devāso raṇvam avase vasūyavo gīrbhī raṇvaṁ vasūyavaḥ ||

1.129.01a यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि ।

1.129.01d सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।

1.129.01f सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥

1.129.01a yaṁ tvaṁ ratham indra medhasātaye 'pākā santam iṣira praṇayasi prānavadya nayasi ।
1.129.01d sadyaś cit tam abhiṣṭaye karo vaśaś ca vājinam ।
1.129.01f sāsmākam anavadya tūtujāna vedhasām imāṁ vācaṁ na vedhasām ॥

1.129.02a स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः ।

1.129.02d यः शूरैः स्व१ः सनिता यो विप्रैर्वाजं तरुता ।

1.129.02f तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥

1.129.02a sa śrudhi yaḥ smā pṛtanāsu kāsu cid dakṣāyya indra bharahūtaye nṛbhir asi pratūrtaye nṛbhiḥ ।
1.129.02d yaḥ śūraiḥ sva1ḥ sanitā yo viprair vājaṁ tarutā ।
1.129.02f tam īśānāsa iradhanta vājinam pṛkṣam atyaṁ na vājinam ॥

1.129.03a दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीरररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् ।

1.129.03d इन्द्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे ।

1.129.03f मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥

1.129.03a dasmo hi ṣmā vṛṣaṇam pinvasi tvacaṁ kaṁ cid yāvīr ararum śūra martyam parivṛṇakṣi martyam ।
1.129.03d indrota tubhyaṁ tad dive tad rudrāya svayaśase ।
1.129.03f mitrāya vocaṁ varuṇāya saprathaḥ sumṛḻīkāya saprathaḥ ॥

1.129.04a अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।

1.129.04d अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।

1.129.04f नहि त्वा शत्रु स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥

1.129.04a asmākaṁ va indram uśmasīṣṭaye sakhāyaṁ viśvāyum prāsahaṁ yujaṁ vājeṣu prāsahaṁ yujam ।
1.129.04d asmākam brahmotaye 'vā pṛtsuṣu kāsu cit ।
1.129.04f nahi tvā śatru starate stṛṇoṣi yaṁ viśvaṁ śatruṁ stṛṇoṣi yam ॥

1.129.05a नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।

1.129.05d नेषि णो यथा पुरानेनाः शूर मन्यसे ।

1.129.05f विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥

1.129.05a ni ṣū namātimatiṁ kayasya cit tejiṣṭhābhir araṇibhir notibhir ugrābhir ugrotibhiḥ |
1.129.05d neṣi ṇo yathā purānenāḥ śūra manyase |
1.129.05f viśvāni pūror apa parṣi vahnir āsā vahnir no accha ||

1.129.06a प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।

1.129.06d स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।

1.129.06f अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥

1.129.06a pra tad voceyam bhavyāyendave havyo na ya iṣavān manma rejati rakṣohā manma rejati |
1.129.06d svayaṁ so asmad ā nido vadhair ajeta durmatim |
1.129.06f ava sraved aghaśaṁso 'vataram ava kṣudram iva sravet ||

1.129.07a वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।

1.129.07d दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि ।

1.129.07f आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥

1.129.07a vanema tad dhotrayā citantyā vanema rayiṁ rayivaḥ suvīryaṁ raṇvaṁ santaṁ suvīryam |
1.129.07d durmanmānaṁ sumantubhir em iṣā pṛcīmahi |
1.129.07f ā satyābhir indraṁ dyumnahūtibhir yajatraṁ dyumnahūtibhiḥ ||

1.129.08a प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।

1.129.08d स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।

1.129.08f हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥

1.129.08a pra-prā vo asme svayaśobhir ūtī parivarga indro durmatīnāṁ darīman durmatīnām |
1.129.08d svayaṁ sā riṣayadhyai yā na upeṣe atraiḥ |
1.129.08f hatem asan na vakṣati kṣiptā jūrṇir na vakṣati ||

1.129.09a त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।

1.129.09d सचस्व नः पराक आ सचस्वास्तमीक आ ।

1.129.09f पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥

1.129.09a tvaṁ na indra rāyā parīṇasā yāhi pathām̐ anehasā puro yāhy arakṣasā |

1.129.09d sacasva naḥ parāka ā sacasvāstamīka ā |
1.129.09f pāhi no dūrād ārād abhiṣṭibhiḥ sadā pāhy abhiṣṭibhiḥ ||

1.129.10a त्वं न इन्द्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे ।

1.129.10d ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।

1.129.10f अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥

1.129.10a tvaṁ na indra rāyā tarūṣasograṁ cit tvā mahimā sakṣad avase mahe mitraṁ nāvase |
1.129.10d ojiṣṭha trātar avitā rathaṁ kaṁ cid amartya |
1.129.10f anyam asmad ririṣeḥ kaṁ cid adrivo ririkṣantaṁ cid adrivaḥ ||

1.129.11a पाहि न इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम् ।

1.129.11d हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः ।

1.129.11f अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥

1.129.11a pāhi na indra suṣṭuta sridho 'vayātā sadam id durmatīnāṁ devaḥ san durmatīnām |
1.129.11d hantā pāpasya rakṣasas trātā viprasya māvataḥ |
1.129.11f adhā hi tvā janitā jījanad vaso rakṣohaṇaṁ tvā jījanad vaso ||

1.130.01a एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः ।

1.130.01d हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।

1.130.01f पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥

1.130.01a endra yāhy upa naḥ parāvato nāyam acchā vidathānīva satpatir astaṁ rājeva satpatiḥ |
1.130.01d havāmahe tvā vayam prayasvantaḥ sute sacā |
1.130.01f putrāso na pitaraṁ vājasātaye maṁhiṣṭhaṁ vājasātaye ||

1.130.02a पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः ।

1.130.02d मदाय हर्यताय ते तुविष्टमाय धायसे ।

1.130.02f आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥

1.130.02a pibā somam indra suvānam adribhiḥ kośena siktam avataṁ na vaṁsagas tātṛṣāṇo na vaṁsagaḥ |
1.130.02d madāya haryatāya te tuviṣṭamāya dhāyase |
1.130.02f ā tvā yacchantu harito na sūryam ahā viśveva sūryam ||

1.130.03a अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनन्ते अन्तरश्मनि ।

1.130.03d व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।

1.130.03f अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः ॥

1.130.03a avindad divo nihitaṁ guhā nidhiṁ ver na garbham parivītam aśmany anante antar aśmani |
1.130.03d vrajaṁ vajrī gavām iva siṣāsann aṅgirastamaḥ |
1.130.03f apāvṛṇod iṣa indraḥ parīvṛtā dvāra iṣaḥ parīvṛtāḥ ||

1.130.04a दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत् ।

1.130.04d संविव्यान ओजसा शवोभिरिन्द्र मज्मना ।

1.130.04f तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥

1.130.04a dādṛhāṇo vajram indro gabhastyoḥ kṣadmeva tigmam asanāya saṁ śyad ahihatyāya saṁ śyat |
1.130.04d saṁvivyāna ojasā śavobhir indra majmanā |
1.130.04f taṣṭeva vṛkṣaṁ vanino ni vṛścasi paraśveva ni vṛścasi ||

1.130.05a त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव ।

1.130.05d इत ऊतीरयुञ्जत समानमर्थमक्षितम् ।

1.130.05f धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥

1.130.05a tvaṁ vṛthā nadya indra sartave 'cchā samudram asṛjo rathām̐ iva vājayato rathām̐ iva |
1.130.05d ita ūtīr ayuñjata samānam artham akṣitam |
1.130.05f dhenūr iva manave viśvadohaso janāya viśvadohasaḥ ||

1.130.06a इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः ।

1.130.06d शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।

1.130.06f अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥

1.130.06a imāṁ te vācaṁ vasūyanta āyavo rathaṁ na dhīraḥ svapā atakṣiṣuḥ sumnāya tvām atakṣiṣuḥ |
1.130.06d śumbhanto jenyaṁ yathā vājeṣu vipra vājinam |
1.130.06f atyam iva śavase sātaye dhanā viśvā dhanāni sātaye ||

1.130.07a भिनत्पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।

1.130.07d अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।

1.130.07f महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥

1.130.07a bhinat puro navatim indra pūrave divodāsāya mahi dāśuṣe nṛto vajreṇa dāśuṣe nṛto |
1.130.07d atithigvāya śambaraṁ girer ugro avābharat |
1.130.07f maho dhanāni dayamāna ojasā viśvā dhanāny ojasā ||

1.130.08a इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।

1.130.08d मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत् ।

1.130.08f दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥

1.130.08a indraḥ samatsu yajamānam āryam prāvad viśveṣu śatamūtir ājiṣu svarmīḷheṣv ājiṣu |
1.130.08d manave śāsad avratān tvacaṁ kṛṣṇām arandhayat |
1.130.08f dakṣan na viśvaṁ tatṛṣāṇam oṣati ny arśasānam oṣati ||

1.130.09a सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीऽशान आ मुषायति ।

1.130.09d उशना यत्परावतोऽजगन्नूतये कवे ।

1.130.09f सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥

1.130.09a sūraś cakram pra vṛhaj jāta ojasā prapitve vācam aruṇo muṣāyatī 'śāna ā muṣāyati |
1.130.09d uśanā yat parāvato 'jagann ūtaye kave |
1.130.09f sumnāni viśvā manuṣeva turvaṇir ahā viśveva turvaṇiḥ ||

1.130.10a स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।

1.130.10b दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥

1.130.10a sa no navyebhir vṛṣakarmann ukthaiḥ purāṁ dartaḥ pāyubhiḥ pāhi śagmaiḥ |
1.130.10b divodāsebhir indra stavāno vāvṛdhīthā ahobhir iva dyauḥ ||

1.131.01a इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः ।

1.131.01d इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।

1.131.01f इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥

1.131.01a indrāya hi dyaur asuro anamnatendrāya mahī pṛthivī varīmabhir dyumnasātā varīmabhiḥ |
1.131.01d indraṁ viśve sajoṣaso devāso dadhire puraḥ |
1.131.01f indrāya viśvā savanāni mānuṣā rātāni santu mānuṣā ||

1.131.02a विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक्स्वः सनिष्यवः पृथक् ।

1.131.02d तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।

1.131.02f इन्द्रं न यज्ञैश्चितयन्त आयव स्तोमेभिरिन्द्रमायवः ॥

1.131.02a viśveṣu hi tvā savaneṣu tuñjate samānam ekaṁ vṛṣamaṇyavaḥ pṛthak svaḥ saniṣyavaḥ pṛthak |
1.131.02d taṁ tvā nāvaṁ na parṣaṇiṁ śūṣasya dhuri dhīmahi |
1.131.02f indraṁ na yajñaiś citayanta āyava stomebhir indram āyavaḥ ||

1.131.03a वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।

1.131.03d यद्गव्यन्ता द्वा जना स्व१र्यन्ता समूहसि ।

1.131.03f आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥

1.131.03a vi tvā tatasre mithunā avasyavo vrajasya sātā gavyasya niḥsṛjaḥ sakṣanta indra niḥsṛjaḥ |
1.131.03d yad gavyantā dvā janā sva1r yantā samūhasi |
1.131.03f āviṣ karikrad vṛṣaṇaṁ sacābhuvaṁ vajram indra sacābhuvam ||

1.131.04a विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।

1.131.04d शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।

1.131.04f महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥

1.131.04a viduṣ ṭe asya vīryasya pūravaḥ puro yad indra śāradīr avātiraḥ sāsahāno avātiraḥ |
1.131.04d śāsas tam indra martyam ayajyuṁ śavasas pate |
1.131.04f mahīm amuṣṇāḥ pṛthivīm imā apo mandasāna imā apaḥ ||

1.131.05a आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।

1.131.05d चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे ।

1.131.05f ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥

1.131.05a ād it te asya vīryasya carkiran madeṣu vṛṣann uśijo yad āvitha sakhīyato yad āvitha ।
1.131.05d cakartha kāram ebhyaḥ pṛtanāsu pravantave ।
1.131.05f te anyām-anyāṁ nadyaṁ saniṣṇata śravasyantaḥ saniṣṇata ॥

1.131.06a उतो नो अस्या उषसो जुषेत ह्य१र्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।

1.131.06d यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।

1.131.06f आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥

1.131.06a uto no asyā uṣaso juṣeta hy a1rkasya bodhi haviṣo havīmabhiḥ svarṣātā havīmabhiḥ ।
1.131.06d yad indra hantave mṛdho vṛṣā vajriñ ciketasi ।
1.131.06f ā me asya vedhaso navīyaso manma śrudhi navīyasaḥ ॥

1.131.07a त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।

1.131.07d जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।

1.131.07f रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥

1.131.07a tvaṁ tam indra vāvṛdhāno asmayur amitrayantaṁ tuvijāta martyaṁ vajreṇa śūra martyam ।
1.131.07d jahi yo no aghāyati śṛṇuṣva suśravastamaḥ ।
1.131.07f riṣṭaṁ na yāmann apa bhūtu durmatir viśvāpa bhūtu durmatiḥ ॥

1.132.01a त्वया वयं मघवन्पूर्व्ये धन इन्द्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।

1.132.01d नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते ।

1.132.01f अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् ॥

1.132.01a tvayā vayam maghavan pūrvye dhana indratvotāḥ sāsahyāma pṛtanyato vanuyāma vanuṣyataḥ ।
1.132.01d nediṣṭhe asminn ahany adhi vocā nu sunvate ।
1.132.01f asmin yajñe vi cayemā bhare kṛtaṁ vājayanto bhare kṛtam ॥

1.132.02a स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नञ्जसि क्राणस्य स्वस्मिन्नञ्जसि ।

1.132.02d अहन्निन्द्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।

1.132.02f अस्मत्रा ते सध्र्यक्सन्तु रातयो भद्रा भद्रस्य रातयः ॥

1.132.02a svarjeṣe bhara āprasya vakmany uṣarbudhaḥ svasminn añjasi krāṇasya svasminn añjasi ।

1.132.02d ahann indro yathā vide śīrṣṇā-śīrṣṇopavācyaḥ |
1.132.02f asmatrā te sadhryak santu rātayo bhadrā bhadrasya rātayaḥ ||

1.132.03a तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयम् ।

1.132.03d वि तद्वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।

1.132.03f स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ॥

1.132.03a tat tu prayaḥ pratnathā te śuśukvanaṁ yasmin yajñe vāram akṛṇvata kṣayam ṛtasya vār asi kṣayam |
1.132.03d vi tad vocer adha dvitāntaḥ paśyanti raśmibhiḥ |
1.132.03f sa ghā vide anv indro gaveṣaṇo bandhukṣidbhyo gaveṣaṇaḥ ||

1.132.04a नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम् ।

1.132.04d ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च ।

1.132.04f सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥

1.132.04a nū itthā te pūrvathā ca pravācyaṁ yad aṅgirobhyo 'vṛṇor apa vrajam indra śikṣann apa vrajam |
1.132.04d aibhyaḥ samānyā diśāsmabhyaṁ jeṣi yotsi ca |
1.132.04f sunvadbhyo randhayā kaṁ cid avrataṁ hṛṇāyantaṁ cid avratam ||

1.132.05a सं यज्जनान्क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः ।

1.132.05d तस्मा आयुः प्रजावदिद्बाधे अर्चन्त्योजसा ।

1.132.05f इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥

1.132.05a saṁ yaj janān kratubhiḥ śūra īkṣayad dhane hite taruṣanta śravasyavaḥ pra yakṣanta śravasyavaḥ |
1.132.05d tasmā āyuḥ prajāvad id bādhe arcanty ojasā |
1.132.05f indra okyaṁ didhiṣanta dhītayo devām̐ acchā na dhītayaḥ ||

1.132.06a युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम् ।

1.132.06d दूरे चत्ताय च्छन्त्सद्गहनं यदिनक्षत् ।

1.132.06f अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥

1.132.06a yuvaṁ tam indrāparvatā puroyudhā yo naḥ pṛtanyād apa taṁ-tam id dhataṁ vajreṇa taṁ-tam id dhatam |

1.132.06d dūre cattāya cchantsad gahanaṁ yad inakṣat |
1.132.06f asmākaṁ śatrūn pari śūra viśvato darmā darṣīṣṭa viśvataḥ ||

1.133.01a उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।

1.133.01c अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥

1.133.01a ubhe punāmi rodasī ṛtena druho dahāmi sam mahīr anindrāḥ |
1.133.01c abhivlagya yatra hatā amitrā vailasthānam pari tṛḷhā aśeran ||

1.133.02a अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।

1.133.02c छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥

1.133.02a abhivlagyā cid adrivaḥ śīrṣā yātumatīnām |
1.133.02c chindhi vaṭūriṇā padā mahāvaṭūriṇā padā ||

1.133.03a अवासां मघवञ्जहि शर्धो यातुमतीनाम् ।

1.133.03c वैलस्थानके अर्मके महावैलस्थे अर्मके ॥

1.133.03a avāsām maghavañ jahi śardho yātumatīnām |
1.133.03c vailasthānake armake mahāvailasthe armake ||

1.133.04a यासां तिस्रः पञ्चाशतोऽभिव्लङ्गैरपावपः ।

1.133.04c तत्सु ते मनायति तकत्सु ते मनायति ॥

1.133.04a yāsāṁ tisraḥ pañcāśato 'bhivlaṅgair apāvapaḥ |
1.133.04c tat su te manāyati takat su te manāyati ||

1.133.05a पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण ।

1.133.05c सर्वं रक्षो नि बर्हय ॥

1.133.05a piśaṅgabhṛṣṭim ambhṛṇam piśācim indra sam mṛṇa |
1.133.05c sarvaṁ rakṣo ni barhaya ||

1.133.06a अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ।

1.133.06d शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे ।

1.133.06f अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥

1.133.06a avar maha indra dādṛhi śrudhī naḥ śuśoca hi dyauḥ kṣā na bhīṣām̐ adrivo ghṛṇān na bhīṣām̐ adrivaḥ |
1.133.06d śuṣmintamo hi śuṣmibhir vadhair ugrebhir īyase |
1.133.06f apūruṣaghno apratīta śūra satvabhis trisaptaiḥ śūra satvabhiḥ ||

1.133.07a वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः ।

1.133.07d सुन्वान इत्सिषासति सहस्रा वाज्यवृतः ।

1.133.07f सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥

1.133.07a vanoti hi sunvan kṣayam parīṇasaḥ sunvāno hi ṣmā yajaty ava dviṣo devānām ava dviṣaḥ |
1.133.07d sunvāna it siṣāsati sahasrā vājy avṛtaḥ |
1.133.07f sunvānāyendro dadāty ābhuvaṁ rayiṁ dadāty ābhuvam ||

1.134.01a आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये सोमस्य पूर्वपीतये ।

1.134.01d ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती ।

1.134.01f नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥

1.134.01a ā tvā juvo rārahāṇā abhi prayo vāyo vahantv iha pūrvapītaye somasya pūrvapītaye |
1.134.01d ūrdhvā te anu sūnṛtā manas tiṣṭhatu jānatī |
1.134.01f niyutvatā rathenā yāhi dāvane vāyo makhasya dāvane ||

1.134.02a मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ।

1.134.02d यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः ।

1.134.02f सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥

1.134.02a mandantu tvā mandino vāyav indavo 'smat krāṇāsaḥ sukṛtā abhidyavo gobhiḥ krāṇā abhidyavaḥ |
1.134.02d yad dha krāṇā iradhyai dakṣaṁ sacanta ūtayaḥ |
1.134.02f sadhrīcīnā niyuto dāvane dhiya upa bruvata īṁ dhiyaḥ ||

1.134.03a वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ।

1.134.03d प्र बोधया पुरंधिं जार आ ससतीमिव ।

1.134.03f प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥

1.134.03a vāyur yuṅkte rohitā vāyur aruṇā vāyū rathe ajirā dhuri volhave vahiṣṭhā dhuri volhave |
1.134.03d pra bodhayā purandhiṁ jāra ā sasatīm iva |
1.134.03f pra cakṣaya rodasī vāsayoṣasaḥ śravase vāsayoṣasaḥ ||

1.134.04a तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।

1.134.04d तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।

1.134.04f अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥

1.134.04a tubhyam uṣāsaḥ śucayaḥ parāvati bhadrā vastrā tanvate daṁsu raśmiṣu citrā navyeṣu raśmiṣu |
1.134.04d tubhyaṁ dhenuḥ sabardughā viśvā vasūni dohate |
1.134.04f ajanayo maruto vakṣaṇābhyo diva ā vakṣaṇābhyaḥ ||

1.134.05a तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि ।

1.134.05d त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ।

1.134.05f त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥

1.134.05a tubhyaṁ śukrāsaḥ śucayas turaṇyavo madeṣūgrā iṣaṇanta bhurvaṇy apām iṣanta bhurvaṇi |
1.134.05d tvāṁ tsārī dasamāno bhagam īṭṭe takvavīye |
1.134.05f tvaṁ viśvasmād bhuvanāt pāsi dharmaṇāsuryāt pāsi dharmaṇā ||

1.134.06a त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।

1.134.06d उतो विहुत्मतीनां विशां ववर्जुषीणाम् ।

1.134.06f विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ॥

1.134.06a tvaṁ no vāyav eṣām apūrvyaḥ somānām prathamaḥ pītim arhasi sutānām pītim arhasi |
1.134.06d uto vihutmatīnāṁ viśāṁ vavarjuṣīṇām |
1.134.06f viśvā it te dhenavo duhra āśiraṁ ghṛtaṁ duhrata āśiram ||

1.135.01a स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ।

1.135.01d तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।

1.135.01f प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥

1.135.01a stīrṇam barhir upa no yāhi vītaye sahasreṇa niyutā niyutvate śatinībhir niyutvate |

1.135.01d tubhyaṁ hi pūrvapītaye devā devāya yemire |
1.135.01f pra te sutāso madhumanto asthiran madāya kratve asthiran ||

1.135.02a तुभ्यायं सोमः परिपूतो अद्रिभि स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति ।

1.135.02d तवायं भाग आयुषु सोमो देवेषु हूयते ।

1.135.02f वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥

1.135.02a tubhyāyaṁ somaḥ paripūto adribhi spārhā vasānaḥ pari kośam arṣati śukrā vasāno arṣati |
1.135.02d tavāyam bhāga āyuṣu somo deveṣu hūyate |
1.135.02f vaha vāyo niyuto yāhy asmayur juṣāṇo yāhy asmayuḥ ||

1.135.03a आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये ।

1.135.03d तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।

1.135.03f अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥

1.135.03a ā no niyudbhiḥ śatinībhir adhvaraṁ sahasriṇībhir upa yāhi vītaye vāyo havyāni vītaye |
1.135.03d tavāyam bhāga ṛtviyaḥ saraśmiḥ sūrye sacā |
1.135.03f adhvaryubhir bharamāṇā ayaṁsata vāyo śukrā ayaṁsata ||

1.135.04a आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।

1.135.04d पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।

1.135.04f वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ॥

1.135.04a ā vāṁ ratho niyutvān vakṣad avase 'bhi prayāṁsi sudhitāni vītaye vāyo havyāni vītaye |
1.135.04d pibatam madhvo andhasaḥ pūrvapeyaṁ hi vāṁ hitam |
1.135.04f vāyav ā candreṇa rādhasā gatam indraś ca rādhasā gatam ||

1.135.05a आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् ।

1.135.05d तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।

1.135.05f इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥

1.135.05a ā vāṁ dhiyo vavṛtyur adhvarāँ upemam indum marmṛjanta vājinam āśum atyaṁ na vājinam |
1.135.05d teṣāṁ pibatam asmayū ā no gantam ihotyā |
1.135.05f indravāyū sutānām adribhir yuvam madāya vājadā yuvam ||

1.135.06a इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।

1.135.06d एते वामभ्यसृक्षत तिरः पवित्रमाशवः ।

1.135.06f युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥

1.135.06a ime vāṁ somā apsv ā sutā ihādhvaryubhir bharamāṇā ayaṁsata vāyo śukrā ayaṁsata |
1.135.06d ete vām abhy asṛkṣata tiraḥ pavitram āśavaḥ |
1.135.06f yuvāyavo 'ti romāṇy avyayā somāso aty avyayā ||

1.135.07a अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ।

1.135.07d वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ॥

1.135.07a ati vāyo sasato yāhi śaśvato yatra grāvā vadati tatra gacchataṁ gṛham indraś ca gacchatam |

1.135.07d vi sūnṛtā dadṛśe rīyate ghṛtam ā pūrṇayā niyutā yātho adhvaram indraś ca yātho adhvaram ||

1.135.08a अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते सन्तु जायवः ।

1.135.08d साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ॥

1.135.08a atrāha tad vahethe madhva āhutiṁ yam aśvattham upatiṣṭhanta jāyavo 'sme te santu jāyavaḥ |
1.135.08d sākaṁ gāvaḥ suvate pacyate yavo na te vāya upa dasyanti dhenavo nāpa dasyanti dhenavaḥ ||

1.135.09a इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः ।

1.135.09d धन्वञ्चिद्ये अनाशवो जीराश्चिदगिरौकसः ।

1.135.09f सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ॥

1.135.09a ime ye te su vāyo bāhvojaso 'ntar nadī te patayanty ukṣaṇo mahi vrādhanta ukṣaṇaḥ |
1.135.09d dhanvañ cid ye anāśavo jīrāś cid agiraukasaḥ |
1.135.09f sūryasyeva raśmayo durniyantavo hastayor durniyantavaḥ ||

1.136.01a प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम् ।

1.136.01d ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता ।

1.136.01f अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥

1.136.01a pra su jyeṣṭhaṁ nicirābhyām bṛhan namo havyam matim bharatā mṛḻayadbhyāṁ svādiṣṭham mṛḻayadbhyām ।
1.136.01d tā samrājā ghṛtāsutī yajñe-yajña upastutā ।
1.136.01f athainoḥ kṣatraṁ na kutaś canādhṛṣe devatvaṁ nū cid ādhṛṣe ॥

1.136.02a अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः ।

1.136.02d द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च ।

1.136.02f अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः ॥

1.136.02a adarśi gātur urave varīyasī panthā ṛtasya sam ayaṁsta raśmibhiś cakṣur bhagasya raśmibhiḥ ।
1.136.02d dyukṣam mitrasya sādanam aryamṇo varuṇasya ca ।
1.136.02f athā dadhāte bṛhad ukthyaṁ1 vaya upastutyam bṛhad vayaḥ ॥

1.136.03a ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे ।

1.136.03d ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती ।

1.136.03f मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥

1.136.03a jyotiṣmatīm aditiṁ dhārayatkṣitiṁ svarvatīm ā sacete dive-dive jāgṛvāṁsā dive-dive ।
1.136.03d jyotiṣmat kṣatram āśāte ādityā dānunas patī ।
1.136.03f mitras tayor varuṇo yātayajjano 'ryamā yātayajjanaḥ ॥

1.136.04a अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।

1.136.04d तं देवासो जुषेरत विश्वे अद्य सजोषसः ।

1.136.04f तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥

1.136.04a ayam mitrāya varuṇāya śantamaḥ somo bhūtv avapāneṣv ābhago devo deveṣv ābhagaḥ ।
1.136.04d taṁ devāso juṣerata viśve adya sajoṣasaḥ ।
1.136.04f tathā rājānā karatho yad īmaha ṛtāvānā yad īmahe ॥

1.136.05a यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः ।

1.136.05d तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।

1.136.05f उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥

1.136.05a yo mitrāya varuṇāyāvidhaj jano 'narvāṇaṁ tam pari pāto aṁhaso dāśvāṁsam martam aṁhasaḥ |
1.136.05d tam aryamābhi rakṣaty ṛjūyantam anu vratam |
1.136.05f ukthair ya enoḥ paribhūṣati vrataṁ stomair ābhūṣati vratam ||

1.136.06a नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे ।

1.136.06d इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।

1.136.06f ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥

1.136.06a namo dive bṛhate rodasībhyām mitrāya vocaṁ varuṇāya mīḻhuṣe sumṛḻīkāya mīḻhuṣe |
1.136.06d indram agnim upa stuhi dyukṣam aryamaṇam bhagam |
1.136.06f jyog jīvantaḥ prajayā sacemahi somasyotī sacemahi ||

1.136.07a ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।

1.136.07c अग्निर्मित्रो वरुणः शर्म यंसन्तदश्याम मघवानो वयं च ॥

1.136.07a ūtī devānāṁ vayam indravanto maṁsīmahi svayaśaso marudbhiḥ |
1.136.07c agnir mitro varuṇaḥ śarma yaṁsan tad aśyāma maghavāno vayaṁ ca ||

1.137.01a सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।

1.137.01d आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।

1.137.01f इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥

1.137.01a suṣumā yātam adribhir gośrītā matsarā ime somāso matsarā ime |
1.137.01d ā rājānā divispṛśāsmatrā gantam upa naḥ |
1.137.01f ime vām mitrāvaruṇā gavāśiraḥ somāḥ śukrā gavāśiraḥ ||

1.137.02a इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।

1.137.02d उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।

1.137.02f सुतो मित्राय वरुणाय पीतये चारुरृताय पीतये ॥

1.137.02a ima ā yātam indavaḥ somāso dadhyāśiraḥ sutāso dadhyāśiraḥ |
1.137.02d uta vām uṣaso budhi sākaṁ sūryasya raśmibhiḥ |
1.137.02f suto mitrāya varuṇāya pītaye cārur ṛtāya pītaye ||

1.137.03a तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।

1.137.03d अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।

1.137.03f अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥

1.137.03a tāṁ vāṁ dhenuṁ na vāsarīm aṁśuṁ duhanty adribhiḥ somaṁ duhanty adribhiḥ |
1.137.03d asmatrā gantam upa no 'rvāñcā somapītaye |
1.137.03f ayaṁ vām mitrāvaruṇā nṛbhiḥ sutaḥ soma ā pītaye sutaḥ ||

1.138.01a प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते ।

1.138.01d अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् ।

1.138.01f विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥

1.138.01a pra-pra pūṣṇas tuvijātasya śasyate mahitvam asya tavaso na tandate stotram asya na tandate |
1.138.01d arcāmi sumnayann aham antyūtim mayobhuvam |
1.138.01f viśvasya yo mana āyuyuve makho deva āyuyuve makhaḥ ||

1.138.02a प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ।

1.138.02d हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः ।

1.138.02f अस्माकमाङ्गूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥

1.138.02a pra hi tvā pūṣann ajiraṁ na yāmani stomebhiḥ kṛṇva ṛṇavo yathā mṛdha uṣṭro na pīparo mṛdhaḥ |
1.138.02d huve yat tvā mayobhuvaṁ devaṁ sakhyāya martyaḥ |
1.138.02f asmākam āṅgūṣān dyumninas kṛdhi vājeṣu dyumninas kṛdhi ||

1.138.03a यस्य ते पूषन्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।

1.138.03d तामनु त्वा नवीयसीं नियुतं राय ईमहे ।

1.138.03f अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥

1.138.03a yasya te pūṣan sakhye vipanyavaḥ kratvā cit santo 'vasā bubhujrira iti kratvā bubhujrire |
1.138.03d tām anu tvā navīyasīṁ niyutaṁ rāya īmahe |
1.138.03f ahelamāna uruśaṁsa sarī bhava vāje-vāje sarī bhava ||

1.138.04a अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व ।

1.138.04d ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।

1.138.04f नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥

1.138.04a asyā ū ṣu ṇa upa sātaye bhuvo 'heḷamāno rarivām̐ ajāśva śravasyatām ajāśva |
1.138.04d o ṣu tvā vavṛtīmahi stomebhir dasma sādhubhiḥ |
1.138.04f nahi tvā pūṣann atimanya āghṛṇe na te sakhyam apahnuve ||

1.139.01a अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।

1.139.01d यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।

1.139.01f अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥

1.139.01a astu śrauṣaṭ puro agnīṁ dhiyā dadha ā nu tac chardho divyaṁ vṛṇīmaha indravāyū vṛṇīmahe |
1.139.01d yad dha krāṇā vivasvati nābhā sandāyi navyasī |
1.139.01f adha pra sū na upa yantu dhītayo devām̐ acchā na dhītayaḥ ||

1.139.02a यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ।

1.139.02d युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् ।

1.139.02a yad dha tyan mitrāvaruṇāv ṛtād adhy ādadāthe anṛtaṁ svena manyunā dakṣasya svena manyunā |
1.139.02d yuvor itthādhi sadmasv apaśyāma hiraṇyayam |

1.139.02f धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥

1.139.02f dhībhiś cana manasā svebhir akṣabhiḥ somasya svebhir akṣabhiḥ ||

1.139.03a युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्त इव श्लोकमायवो युवां हव्याभ्या३यवः ।

1.139.03d युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा ।

1.139.03f प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥

1.139.03a yuvāṁ stomebhir devayanto aśvināśrāvayanta iva ślokam āyavo yuvāṁ havyābhy ā3yavaḥ |
1.139.03d yuvor viśvā adhi śriyaḥ pṛkṣaś ca viśvavedasā |
1.139.03f pruṣāyante vām pavayo hiraṇyaye rathe dasrā hiraṇyaye ||

1.139.04a अचेति दस्रा व्यु१ नाकमृण्वथो युञ्जते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु ।

1.139.04d अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये ।

1.139.04f पथेव यन्तावनुशासता रजोऽञ्जसा शासता रजः ॥

1.139.04a aceti dasrā vy u1 nākam ṛṇvatho yuñjate vāṁ rathayujo diviṣṭiṣv adhvasmāno diviṣṭiṣu |
1.139.04d adhi vāṁ sthāma vandhure rathe dasrā hiraṇyaye |
1.139.04f patheva yantāv anuśāsatā rajo 'ñjasā śāsatā rajaḥ ||

1.139.05a शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम् ।

1.139.05c मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥

1.139.05a śacībhir naḥ śacīvasū divā naktaṁ daśasyatam |
1.139.05c mā vāṁ rātir upa dasat kadā canāsmad rātiḥ kadā cana ||

1.139.06a वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः ।

1.139.06d ते त्वा मन्दन्तु दावने महे चित्राय राधसे ।

1.139.06f गीर्भिर्गिर्वाह स्तवमान आ गहि सुमृळीको न आ गहि ॥

1.139.06a vṛṣann indra vṛṣapāṇāsa indava ime sutā adriṣutāsa udbhidas tubhyaṁ sutāsa udbhidaḥ |
1.139.06d te tvā mandantu dāvane mahe citrāya rādhase |
1.139.06f gīrbhir girvāha stavamāna ā gahi sumṛḻīko na ā gahi ||

1.139.07a ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः ।

1.139.07d यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन ।

1.139.07f वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥

1.139.07a o ṣū ṇo agne śṛṇuhi tvam īḻito devebhyo bravasi yajñiyebhyo rājabhyo yajñiyebhyaḥ |
1.139.07d yad dha tyām aṅgirobhyo dhenuṁ devā adattana |
1.139.07f vi tāṁ duhre aryamā kartarī sacām̐ eṣa tāṁ veda me sacā ||

1.139.08a मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः ।

1.139.08d यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम् ।

1.139.08f अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥

1.139.08a mo ṣu vo asmad abhi tāni pauṁsyā sanā bhūvan dyumnāni mota jāriṣur asmat purota jāriṣuḥ |

1.139.08d yad vaś citraṁ yuge-yuge navyaṁ ghoṣād amartyam |
1.139.08f asmāsu tan maruto yac ca duṣṭaraṁ didhṛtā yac ca duṣṭaram ||

1.139.09a दध्यङ्ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः ।

1.139.09d तेषां देवेष्वायतिरस्माकं तेषु नाभयः ।

1.139.09f तेषां पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥

1.139.09a dadhyaṅ ha me januṣam pūrvo aṅgirāḥ priyamedhaḥ kaṇvo atrir manur vidus te me pūrve manur viduḥ |
1.139.09d teṣāṁ deveṣv āyatir asmākaṁ teṣu nābhayaḥ |
1.139.09f teṣām padena mahy ā name girendrāgnī ā name girā ||

1.139.10a होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।

1.139.10d जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।

1.139.10f अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥

1.139.10a hotā yakṣad vanino vanta vāryam bṛhaspatir yajati vena ukṣabhiḥ puruvārebhir ukṣabhiḥ |
1.139.10d jagṛbhmā dūraādiśaṁ ślokam adrer adha tmanā |
1.139.10f adhārayad ararindāni sukratuḥ purū sadmāni sukratuḥ ||

1.139.11a ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।

1.139.11c अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥

1.139.11a ye devāso divy ekādaśa stha pṛthivyām adhy ekādaśa stha |
1.139.11c apsukṣito mahinaikādaśa stha te devāso yajñam imaṁ juṣadhvam ||

1.140.01a वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।

1.140.01c वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥

1.140.01a vediṣade priyadhāmāya sudyute dhāsim iva pra bharā yonim agnaye |
1.140.01c vastreṇeva vāsayā manmanā śuciṁ jyotīrathaṁ śukravarṇaṁ tamohanam ||

1.140.02a अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।

1.140.02c अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः ॥

1.140.02a abhi dvijanmā trivṛd annam ṛjyate saṁvatsare vāvṛdhe jagdham ī punaḥ |
1.140.02c anyasyāsā jihvayā jenyo vṛṣā ny a1nyena vanino mṛṣṭa vāraṇaḥ ||

1.140.03a कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम्।

1.140.03c प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः॥

1.140.03a kṛṣṇaprutau vevije asya sakṣitā ubhā tarete abhi mātarā śiśum |
1.140.03c prācājihvaṁ dhvasayantaṁ tṛṣucyutam ā sācyaṁ kupayaṁ vardhanam pituḥ ||

1.140.04a मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः।

1.140.04c असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः॥

1.140.04a mumukṣvo3 manave mānavasyate raghudruvaḥ kṛṣṇasītāsa ū juvaḥ |
1.140.04c asamanā ajirāso raghuṣyado vātajūtā upa yujyanta āśavaḥ ||

1.140.05a आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः।

1.140.05c यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति नानदत्॥

1.140.05a ād asya te dhvasayanto vṛtherate kṛṣṇam abhvam mahi varpaḥ karikrataḥ |
1.140.05c yat sīm mahīm avanim prābhi marmṛśad abhiśvasan stanayann eti nānadat ||

1.140.06a भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत्।

1.140.06c ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः॥

1.140.06a bhūṣan na yo 'dhi babhrūṣu namnate vṛṣeva patnīr abhy eti roruvat |
1.140.06c ojāyamānas tanvaś ca śumbhate bhīmo na śṛṅgā davidhāva durgṛbhiḥ ||

1.140.07a स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये।

1.140.07c पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा॥

1.140.07a sa saṁstiro viṣṭiraḥ saṁ gṛbhāyati jānann eva jānatīr nitya ā śaye |
1.140.07c punar vardhante api yanti devyam anyad varpaḥ pitroḥ kṛṇvate sacā ||

1.140.08a तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः।

1.140.08c तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम्॥

1.140.08a tam agruvaḥ keśinīḥ saṁ hi rebhira ūrdhvās tasthur mamruṣīḥ prāyave punaḥ |
1.140.08c tāsāṁ jarām pramuñcann eti nānadad asum paraṁ janayañ jīvam astṛtam ||

1.140.09a अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।

1.140.09c वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥

1.140.09a adhīvāsam pari mātū rihann aha tuvigrebhiḥ satvabhir yāti vi jrayaḥ |
1.140.09c vayo dadhat padvate rerihat sadānu śyenī sacate vartanīr aha ||

1.140.10a अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।

1.140.10c अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥

1.140.10a asmākam agne maghavatsu dīdihy adha śvasīvān vṛṣabho damūnāḥ |
1.140.10c avāsyā śiśumatīr adīder varmeva yutsu parijarbhurāṇaḥ ||

1.140.11a इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते ।

1.140.11c यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥

1.140.11a idam agne sudhitaṁ durdhitād adhi priyād u cin manmanaḥ preyo astu te |
1.140.11c yat te śukraṁ tanvo3 rocate śuci tenāsmabhyaṁ vanase ratnam ā tvam ||

1.140.12a रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।

1.140.12c अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥

1.140.12a rathāya nāvam uta no gṛhāya nityāritrām padvatīṁ rāsy agne |
1.140.12c asmākaṁ vīrām̐ uta no maghono janām̐ś ca yā pārayāc charma yā ca ||

1.140.13a अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।

1.140.13c गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ॥

1.140.13a abhī no agna uktham ij juguryā dyāvākṣāmā sindhavaś ca svagūrtāḥ |
1.140.13c gavyaṁ yavyaṁ yanto dīrghāheṣaṁ varam aruṇyo varanta ||

1.141.01a बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।

1.141.01c यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥

1.141.01a baḷ itthā tad vapuṣe dhāyi darśataṁ devasya bhargaḥ sahaso yato jani |
1.141.01c yad īm upa hvarate sādhate matir ṛtasya dhenā anayanta sasrutaḥ ||

1.141.02a पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।

1.141.02c तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥

1.141.02a pṛkṣo vapuḥ pitumān nitya ā śaye dvitīyam ā saptaśivāsu mātṛṣu |

1.141.02c tṛtīyam asya vṛṣabhasya dohase daśapramatiṃ janayanta yoṣaṇaḥ ||

1.141.03a निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।

1.141.03c यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥

1.141.03a nir yad īm budhnān mahiṣasya varpasa īśānāsaḥ śavasā kranta sūrayaḥ |

1.141.03c yad īm anu pradivo madhva ādhave guhā santam mātariśvā mathāyati ||

1.141.04a प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।

1.141.04c उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥

1.141.04a pra yat pituḥ paramān nīyate pary ā pṛkṣudho vīrudho daṃsu rohati |

1.141.04c ubhā yad asya januṣaṃ yad invata ād id yaviṣṭho abhavad ghṛṇā śuciḥ ||

1.141.05a आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।

1.141.05c अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥

1.141.05a ād in mātṝr āviśad yāsv ā śucir ahiṃsyamāna urviyā vi vāvṛdhe |

1.141.05c anu yat pūrvā aruhat sanājuvo ni navyasīṣv avarāsu dhāvate ||

1.141.06a आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते ।

1.141.06c देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥

1.141.06a ād id dhotāraṃ vṛṇate diviṣṭiṣu bhagam iva papṛcānāsa ṛñjate |

1.141.06c devān yat kratvā majmanā puruṣṭuto martaṃ śaṃsaṃ viśvadhā veti dhāyase ||

1.141.07a वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।

1.141.07c तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥

1.141.07a vi yad asthād yajato vātacodito hvāro na vakvā jaraṇā anākṛtaḥ |

1.141.07c tasya patman dakṣuṣaḥ kṛṣṇajaṃhasaḥ śucijanmano raja ā vyadhvanaḥ ||

1.141.08a रथो न यातः शिक्वभिः कृतो द्यामङ्गेभिररुषेभिरीयते ।

1.141.08c आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥

1.141.08a ratho na yātaḥ śikvabhiḥ kṛto dyām aṅgebhir aruṣebhir īyate |

1.141.08c ād a̍sya̱ te kṛ̱ṣṇāso̍ dakṣi sū̱raya̱ḥ śūra̍syeva tve̱ṣathā̍d īṣate̱ vaya̍ḥ ||

1.141.09a त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।

1.141.09c यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः ॥

1.141.09a tvayā̱ hy a̍gne̱ varu̍ṇo dhṛ̱tavra̍to mi̱traḥ śā̍śa̱dre a̍rya̱mā su̱dāna̍vaḥ |
1.141.09c yat sī̱m anu̱ kratu̍nā vi̱śvathā̍ vi̱bhur a̱rān na ne̱miḥ pa̍ri̱bhūr ajā̍yathāḥ ||

1.141.10a त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि ।

1.141.10c तं त्वा नु नव्यं सहसो युवन्वयं भगं न कारे महिरत्न धीमहि ॥

1.141.10a tvam a̍gne śaśamā̱nāya̍ sunva̱te ratna̍ṁ yaviṣṭha de̱vatā̍tim invasi |
1.141.10c taṁ tvā̱ nu navya̍ṁ sahaso yuvan va̱yam bhaga̱ṁ na kā̱re ma̍hiratna dhīmahi ||

1.141.11a अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।

1.141.11c रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥

1.141.11a a̱sme ra̱yiṁ na svartha̱ṁ damū̍nasa̱m bhaga̱ṁ dakṣa̱ṁ na pa̍pṛcāsi dharṇa̱sim |
1.141.11c ra̱śmīm̐r i̍va̱ yo yama̍ti̱ janma̍nī u̱bhe de̱vānā̱ṁ śaṁsa̍m ṛ̱ta ā ca̍ su̱kratu̍ḥ ||

1.141.12a उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः ।

1.141.12c स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥

1.141.12a u̱ta na̍ḥ su̱dyotmā̍ jī̱rāśvo̱ hotā̍ ma̱ndraḥ śṛ̍ṇavac ca̱ndrara̍thaḥ |
1.141.12c sa no̍ neṣa̱n neṣa̍tamai̱r amū̍ro̱ 'gnir vā̱maṁ su̍vi̱taṁ vasyo̱ accha̍ ||

1.141.13a अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।

1.141.13c अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥

1.141.13a astā̍vy a̱gniḥ śimī̍vadbhir a̱rkaiḥ sāmrā̍jyāya prata̱raṁ dadhā̍naḥ |
1.141.13c a̱mī ca̱ ye ma̱ghavā̍no va̱yaṁ ca̱ miha̱ṁ na sūro̱ ati̱ niṣ ṭa̍tanyuḥ ||

1.142.01a समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।

1.142.01c तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥

1.142.01a sami̍ddho agna̱ ā va̍ha de̱vām̐ a̱dya ya̱tasru̍ce |
1.142.01c tantu̍ṁ tanuṣva pū̱rvyaṁ su̱taso̍māya dā̱śuṣe̍ ||

1.142.02a घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।

1.142.02c यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥

1.142.02a ghṛtavantam upa māsi madhumantaṁ tanūnapāt |
1.142.02c yajñaṁ viprasya māvataḥ śaśamānasya dāśuṣaḥ ||

1.142.03a शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ।

1.142.03c नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥

1.142.03a śuciḥ pāvako adbhuto madhvā yajñam mimikṣati |
1.142.03c narāśaṁsas trir ā divo devo deveṣu yajñiyaḥ ||

1.142.04a ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।

1.142.04c इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥

1.142.04a īḷito agna ā vahendraṁ citram iha priyam |
1.142.04c iyaṁ hi tvā matir mamācchā sujihva vacyate ||

1.142.05a स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।

1.142.05c वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥

1.142.05a stṛṇānāso yatasruco barhir yajñe svadhvare |
1.142.05c vṛñje devavyacastamam indrāya śarma saprathaḥ ||

1.142.06a वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः ।

1.142.06c पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥

1.142.06a vi śrayantām ṛtāvṛdhaḥ prayai devebhyo mahīḥ |
1.142.06c pāvakāsaḥ puruspṛho dvāro devīr asaścataḥ ||

1.142.07a आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।

1.142.07c यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥

1.142.07a ā bhandamāne upāke naktoṣāsā supeśasā |
1.142.07c yahvī ṛtasya mātarā sīdatām barhir ā sumat ||

1.142.08a मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।

1.142.08c यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥

1.142.08a mandrajihvā jugurvaṇī hotārā daivyā kavī |
1.142.08c yajñaṁ no yakṣatām imaṁ sidhram adya divispṛśam ||

1.142.09a शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।

1.142.09c इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥

1.142.09a śucir deveṣv arpitā hotrā marutsu bhāratī |
1.142.09c iḷā sarasvatī mahī barhiḥ sīdantu yajñiyāḥ ||

1.142.10a तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।

1.142.10c त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥

1.142.10a tan nas turīpam adbhutam puru vāram puru tmanā |
1.142.10c tvaṣṭā poṣāya vi ṣyatu rāye nābhā no asmayuḥ ||

1.142.11a अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।

1.142.11c अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥

1.142.11a avasṛjann upa tmanā devān yakṣi vanaspate |
1.142.11c agnir havyā suṣūdati devo deveṣu medhiraḥ ||

1.142.12a पूषण्वते मरुत्वते विश्वदेवाय वायवे ।

1.142.12c स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥

1.142.12a pūṣaṇvate marutvate viśvadevāya vāyave |
1.142.12c svāhā gāyatravepase havyam indrāya kartana ||

1.142.13a स्वाहाकृतान्या गह्युप हव्यानि वीतये ।

1.142.13c इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥

1.142.13a svāhākṛtāny ā gahy upa havyāni vītaye |
1.142.13c indrā gahi śrudhī havaṁ tvāṁ havante adhvare ||

1.143.01a प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।

1.143.01c अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीदद्दृत्वियः ॥

1.143.01a pra tavyasīṁ navyasīṁ dhītim agnaye vāco matiṁ sahasaḥ sūnave bhare |
1.143.01c apāṁ napād yo vasubhiḥ saha priyo hotā pṛthivyāṁ ny asīdad ṛtviyaḥ ||

1.143.02a स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।

1.143.02c अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥

1.143.02a sa jāyamānaḥ parame vyomany āvir agnir abhavan mātariśvane |
1.143.02c asya kratvā samidhānasya majmanā pra dyāvā śociḥ pṛthivī arocayat ||

1.143.03a अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।

1.143.03c भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्तो अजराः ॥

1.143.03a asya tveṣā ajarā asya bhānavaḥ susandṛśaḥ supratīkasya sudyutaḥ |
1.143.03c bhātvakṣaso aty aktur na sindhavo 'gne rejante asasanto ajarāḥ ||

1.143.04a यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।

1.143.04c अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥

1.143.04a yam erire bhṛgavo viśvavedasaṁ nābhā pṛthivyā bhuvanasya majmanā |
1.143.04c agniṁ taṁ gīrbhir hinuhi sva ā dame ya eko vasvo varuṇo na rājati ||

1.143.05a न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।

1.143.05c अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून्स वना न्यृञ्जते ॥

1.143.05a na yo varāya marutām iva svanaḥ seneva sṛṣṭā divyā yathāśaniḥ |
1.143.05c agnir jambhais tigitair atti bharvati yodho na śatrūn sa vanā ny ṛñjate ||

1.143.06a कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत् ।

1.143.06c चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥

1.143.06a kuvin no agnir ucathasya vīr asad vasuṣ kuvid vasubhiḥ kāmam āvarat |
1.143.06c codaḥ kuvit tutujyāt sātaye dhiyaḥ śucipratīkaṁ tam ayā dhiyā gṛṇe ||

1.143.07a घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते ।

1.143.07c इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥

1.143.07a ghṛtapratīkaṁ va ṛtasya dhūrṣadam agnim mitraṁ na samidhāna ṛñjate |
1.143.07c indhāno akro vidatheṣu dīdyac chukravarṇām ud u no yaṁsate dhiyam ||

1.143.08a अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।

1.143.08c अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥

1.143.08a aprayucchann aprayucchadbhir agne śivebhir naḥ pāyubhiḥ pāhi śagmaiḥ |
1.143.08c adabdhebhir adṛpitebhir iṣṭe 'nimiṣadbhiḥ pari pāhi no jāḥ ||

1.144.01a एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।

1.144.01c अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥

1.144.01a eti pra hotā vratam asya māyayordhvāṁ dadhānaḥ śucipeśasaṁ dhiyam |
1.144.01c abhi srucaḥ kramate dakṣiṇāvṛto yā asya dhāma prathamaṁ ha niṁsate ||

1.144.02a अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।

1.144.02c अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥

1.144.02a abhīm ṛtasya dohanā anūṣata yonau devasya sadane parīvṛtāḥ |
1.144.02c apām upasthe vibhṛto yad āvasad adha svadhā adhayad yābhir īyate ||

1.144.03a युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः ।

1.144.03c आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्समयंस्त सारथिः ॥

1.144.03a yuyūṣataḥ savayasā tad id vapuḥ samānam arthaṁ vitaritratā mithaḥ |
1.144.03c ād īm bhago na havyaḥ sam asmad ā voḻhur na raśmīn sam ayaṁsta sārathiḥ ||

1.144.04a यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।

1.144.04c दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥

1.144.04a yam īṁ dvā savayasā saparyataḥ samāne yonā mithunā samokasā |
1.144.04c divā na naktam palito yuvājani purū carann ajaro mānuṣā yugā ||

1.144.05a तमीं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।

1.144.05c धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥

1.144.05a tam īṁ hinvanti dhītayo daśa vriśo devam martāsa ūtaye havāmahe |
1.144.05c dhanor adhi pravata ā sa ṛṇvaty abhivrajadbhir vayunā navādhita ||

1.144.06a त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।

1.144.06c एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥

1.144.06a tvaṁ hy agne divyasya rājasi tvam pārthivasya paśupā iva tmanā |
1.144.06c enī ta ete bṛhatī abhiśriyā hiraṇyayī vakvarī barhir āśāte ||

1.144.07a अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।

1.144.07c यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः ॥

1.144.07a agne juṣasva prati harya tad vaco mandra svadhāva ṛtajāta sukrato |
1.144.07c yo viśvataḥ pratyaṅṅ asi darśato raṇvaḥ sandṛṣṭau pitumām̐ iva kṣayaḥ ||

1.145.01a तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।

1.145.01c तस्मिन्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥

1.145.01a tam pṛcchatā sa jagāmā sa veda sa cikitvām̐ īyate sā nv īyate |
1.145.01c tasmin santi praśiṣas tasminn iṣṭayaḥ sa vājasya śavasaḥ śuṣmiṇas patiḥ ||

1.145.02a तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।

1.145.02c न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥

1.145.02a tam it pṛcchanti na simo vi pṛcchati sveneva dhīro manasā yad agrabhīt |
1.145.02c na mṛṣyate prathamaṁ nāparaṁ vaco 'sya kratvā sacate apradṛpitaḥ ||

1.145.03a तमिद्गच्छन्ति जुह्व१स्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे ।

1.145.03c पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥

1.145.03a tam id gacchanti juhva1s tam arvatīr viśvāny ekaḥ śṛṇavad vacāṁsi me |
1.145.03c purupraiṣas taturir yajñasādhano 'cchidrotiḥ śiśur ādatta saṁ rabhaḥ ||

1.145.04a उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।

1.145.04c अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ॥

1.145.04a upasthāyaṁ carati yat samārata sadyo jātas tatsāra yujyebhiḥ |
1.145.04c abhi śvāntam mṛśate nāndye mude yad īṁ gacchanty uśatīr apiṣṭhitam ||

1.145.05a स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।

1.145.05c व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥

1.145.05a sa īm mṛgo apyo vanargur upa tvacy upamasyāṁ ni dhāyi |
1.145.05c vy abravīd vayunā martyebhyo 'gnir vidvām̐ ṛtacid dhi satyaḥ ||

1.146.01a त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।

1.146.01c निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥

1.146.01a trimūrdhānaṁ saptaraśmiṁ gṛṇīṣe 'nūnam agnim pitror upasthe |
1.146.01c niṣattam asya carato dhruvasya viśvā divo rocanāpaprivāṁsam ||

1.146.02a उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिरृष्वः ।

1.146.02c उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥

1.146.02a ukṣā mahām̐ abhi vavakṣa ene ajaras tasthāv itaūtir ṛṣvaḥ |
1.146.02c urvyāḥ pado ni dadhāti sānau rihanty ūdho aruṣāso asya ||

1.146.03a समानं वत्समभि संचरन्ती विष्वग्धेनू वि चरतः सुमेके ।

1.146.03c अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥

1.146.03a samānaṁ vatsam abhi sañcarantī viṣvag dhenū vi carataḥ sumeke |
1.146.03c anapavṛjyām̐ adhvano mimāne viśvān ketām̐ adhi maho dadhāne ||

1.146.04a धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।

1.146.04c सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन् ॥

1.146.04a dhīrāsaḥ padaṁ kavayo nayanti nānā hṛdā rakṣamāṇā ajuryam |
1.146.04c siṣāsantaḥ pary apaśyanta sindhum āvir ebhyo abhavat sūryo nṝn ||

1.146.05a दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।

1.146.05c पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥

1.146.05a didṛkṣeṇyaḥ pari kāṣṭhāsu jenya īḻenyo maho arbhāya jīvase |
1.146.05c purutrā yad abhavat sūr ahaibhyo garbhebhyo maghavā viśvadarśataḥ ||

1.147.01a कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।

1.147.01c उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयन्त देवाः ॥

1.147.01a kathā te agne śucayanta āyor dadāśur vājebhir āśuṣāṇāḥ |

1.147.01c ubhe yat toke tanaye dadhānā ṛtasya sāman raṇayanta devāḥ ||

1.147.02a बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।

1.147.02c पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥

1.147.02a bodhā me asya vacaso yaviṣṭha maṁhiṣṭhasya prabhṛtasya svadhāvaḥ |
1.147.02c pīyati tvo anu tvo gṛṇāti vandārus te tanvaṁ vande agne ||

1.147.03a ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।

1.147.03c ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥

1.147.03a ye pāyavo māmateyaṁ te agne paśyanto andhaṁ duritād arakṣan |
1.147.03c rarakṣa tān sukṛto viśvavedā dipsanta id ripavo nāha debhuḥ ||

1.147.04a यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन ।

1.147.04c मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥

1.147.04a yo no agne ararivām̐ aghāyur arātīvā marcayati dvayena |
1.147.04c mantro guruḥ punar astu so asmā anu mṛkṣīṣṭa tanvaṁ duruktaiḥ ||

1.147.05a उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन ।

1.147.05c अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः ॥

1.147.05a uta vā yaḥ sahasya pravidvān marto martam marcayati dvayena |
1.147.05c ataḥ pāhi stavamāna stuvantam agne mākir no duritāya dhāyīḥ ||

1.148.01a मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।

1.148.01c नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥

1.148.01a mathīd yad īṁ viṣṭo mātariśvā hotāraṁ viśvāpsuṁ viśvadevyam |
1.148.01c ni yaṁ dadhur manuṣyāsu vikṣu sva1r ṇa citraṁ vapuṣe vibhāvam ||

1.148.02a ददानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।

1.148.02c जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥

1.148.02a dadānam in na dadabhanta manmāgnir varūtham mama tasya cākan |
1.148.02c juṣanta viśvāny asya karmopastutim bharamāṇasya kāroḥ ||

1.148.03a नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।

1.148.03c प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥

1.148.03a nitye cin nu yaṁ sadane jagr̥bhre praśastibhir dadhire yajñiyāsaḥ |
1.148.03c pra sū nayanta gr̥bhayanta iṣṭāv aśvāso na rathyo rārahāṇāḥ ||

1.148.04a पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ।

1.148.04c आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥

1.148.04a purūṇi dasmo ni riṇāti jambhair ād rocate vana ā vibhāvā |
1.148.04c ād asya vāto anu vāti śocir astur na śaryām asanām anu dyūn ||

1.148.05a न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।

1.148.05c अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन् ॥

1.148.05a na yaṁ ripavo na riṣaṇyavo garbhe santaṁ reṣaṇā reṣayanti |
1.148.05c andhā apaśyā na dabhann abhikhyā nityāsa īm pretāro arakṣan ||

1.149.01a महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ ।

1.149.01c उप ध्रजन्तमद्रयो विधन्नित् ॥

1.149.01a mahaḥ sa rāya eṣate patir dann ina inasya vasunaḥ pada ā |
1.149.01c upa dhrajantam adrayo vidhann it ||

1.149.02a स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।

1.149.02c प्र यः सस्राणः शिश्रीत योनौ ॥

1.149.02a sa yo vr̥ṣā narāṁ na rodasyoḥ śravobhir asti jīvapītasargaḥ |
1.149.02c pra yaḥ sasrāṇaḥ śiśrīta yonau ||

1.149.03a आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा ।

1.149.03c सूरो न रुरुक्वाञ्छतात्मा ॥

1.149.03a ā yaḥ puraṁ nārmiṇīm adīded atyaḥ kavir nabhanyo3 nārvā |
1.149.03c sūro na rurukvāñ chatātmā ||

1.149.04a अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।

1.149.04c होता यजिष्ठो अपां सधस्थे ॥

1.149.04a abhi dvijanmā trī rocanāni viśvā rajāṁsi śuśucāno asthāt |
1.149.04c hotā yajiṣṭho apāṁ sadhasthe ||

1.149.05a अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।

1.149.05c मर्तो यो अस्मै सुतुको ददाश ॥

1.149.05a ayaṁ sa hotā yo dvijanmā viśvā dadhe vāryāṇi śravasyā |
1.149.05c marto yo asmai sutuko dadāśa ||

1.150.01a पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा ।

1.150.01c तोदस्येव शरण आ महस्य ॥

1.150.01a puru tvā dāśvān voce 'rir agne tava svid ā |
1.150.01c todasyeva śaraṇa ā mahasya ||

1.150.02a व्यनिनस्य धनिनः प्रहोषे चिदररुषः ।

1.150.02c कदा चन प्रजिगतो अदेवयोः ॥

1.150.02a vy aninasya dhaninaḥ prahoṣe cid araruṣaḥ |
1.150.02c kadā cana prajigato adevayoḥ ||

1.150.03a स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि ।

1.150.03c प्रप्रेत्ते अग्ने वनुषः स्याम ॥

1.150.03a sa candro vipra martyo maho vrādhantamo divi |
1.150.03c pra-pret te agne vanuṣaḥ syāma ||

1.151.01a मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।

1.151.01c अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ॥

1.151.01a mitraṁ na yaṁ śimyā goṣu gavyavaḥ svādhyo vidathe apsu jījanan |
1.151.01c arejetāṁ rodasī pājasā girā prati priyaṁ yajataṁ janusām avaḥ ||

1.151.02a यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।

1.151.02c अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥

1.151.02a yad dha̱ tyad vā̍m purumī̱ḻhasya̍ so̱minaḥ pra mi̱trāso̱ na da̍dhi̱re svā̱bhuva̍ḥ |
1.151.02c adha̱ kratu̍ṁ vidataṁ gā̱tum arca̍ta u̱ta śru̍taṁ vṛ̍ṣaṇā pa̱styā̍vataḥ ||

1.151.03a आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।

1.151.03c यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥

1.151.03a ā vā̍m bhūṣan kṣ̱itayo̱ janma̱ roda̍syoḥ pra̱vāca̍yaṁ vṛ̱ṣa̱ṇā̱ dakṣa̍se ma̱he |
1.151.03c yad ī̍m ṛ̱tāya̱ bhara̍tho̱ yad arva̍te̱ pra hotra̍yā̱ śimyā̍ vītho adhva̱ram ||

1.151.04a प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ।

1.151.04c युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ॥

1.151.04a pra sā kṣ̱itir a̍sura̱ yā mahi̍ pri̱ya ṛ̱tā̍vānāv ṛ̱tam ā gho̍ṣatho bṛ̱hat |
1.151.04c yu̱vaṁ di̱vo bṛ̍ha̱to dakṣa̱m ā̱bhuva̱ṁ gāṁ na dhu̱ry upa̍ yuñjāthe a̱paḥ ||

1.151.05a मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।

1.151.05c स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥

1.151.05a ma̱hī atra̍ ma̱hi̱nā vāra̍m ṛ̱ṇvatho 're̱ṇava̱s tuja̱ ā sadma̍n dhe̱nava̍ḥ |
1.151.05c svara̍nti̱ tā u̍pa̱ratā̍ti̱ sūrya̱m ā ni̱mruca̍ u̱ṣasa̍s takva̱vīr i̍va ||

1.151.06a आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।

1.151.06c अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥

1.151.06a ā vā̍m ṛ̱tāya̍ ke̍śinī̍r anūṣa̱ta mitra̱ yatra̱ varu̍ṇa gā̱tum arca̍thaḥ |
1.151.06c ava̱ tmanā̍ sṛ̱jata̱m pinva̍ta̱ṁ dhiyo̍ yu̱vaṁ vipra̍sya̱ manma̍nām irajyathaḥ ||

1.151.07a यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।

1.151.07c उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥

1.151.07a yo vā̍ṁ yajñaiḥ śa̍śamā̱no ha̱ dā̍śa̍ti ka̱vir hotā̱ yaja̍ti manma̱sādha̍naḥ |
1.151.07c upāha̱ taṁ gaccha̍tho vī̱tho a̍dhva̱ram acchā̱ gira̍ḥ suma̱tiṁ ga̍ntam asma̱yū ||

1.151.08a युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।

1.151.08c भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥

1.151.08a yu̱vāṁ ya̱jñaiḥ pra̍tha̱mā gobhi̍r añjata̱ ṛ̱tāvā̍nā̱ mana̍so̱ na prayu̍ktiṣu |

1.151.08c bharanti vām manmanā saṁyatā giro 'dṛpyatā manasā revad āśāthe ||

1.151.09a रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।

1.151.09c न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥

1.151.09a revad vayo dadhāthe revad āśāthe narā māyābhir itaūti māhinam |

1.151.09c na vāṁ dyāvo 'habhir nota sindhavo na devatvam paṇayo nānaśur magham ||

1.152.01a युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।

1.152.01c अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥

1.152.01a yuvaṁ vastrāṇi pīvasā vasāthe yuvor acchidrā mantavo ha sargāḥ |

1.152.01c avātiratam anṛtāni viśva ṛtena mitrāvaruṇā sacethe ||

1.152.02a एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।

1.152.02c त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥

1.152.02a etac cana tvo vi ciketad eṣāṁ satyo mantraḥ kaviśasta ṛghāvān |

1.152.02c triraśriṁ hanti caturaśrir ugro devanido ha prathamā ajūryan ||

1.152.03a अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।

1.152.03c गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥

1.152.03a apād eti prathamā padvatīnāṁ kas tad vām mitrāvaruṇā ciketa |

1.152.03c garbho bhāram bharaty ā cid asya ṛtam piparty anṛtaṁ ni tārīt ||

1.152.04a प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।

1.152.04c अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥

1.152.04a prayantam it pari jāraṁ kanīnām paśyāmasi nopanipadyamānam |

1.152.04c anavapṛgṇā vitatā vasānam priyam mitrasya varuṇasya dhāma ||

1.152.05a अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।

1.152.05c अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥

1.152.05a anaśvo jāto anabhīśur arvā kanikradat patayad ūrdhvasānuḥ |

1.152.05c acittam brahma jujuṣur yuvānaḥ pra mitre dhāma varuṇe gṛṇantaḥ ||

1.152.06a आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्सस्मिन्नूधन् ।

1.152.06c पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥

1.152.06a ā dhenavo māmateyam avantīr brahmapriyam pīpayan sasminn ūdhan |
1.152.06c pitvo bhikṣeta vayunāni vidvān āsāvivāsann aditim uruṣyet ||

1.152.07a आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।

1.152.07c अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥

1.152.07a ā vām mitrāvaruṇā havyajuṣṭiṁ namasā devāv avasā vavṛtyām |
1.152.07c asmākam brahma pṛtanāsu sahyā asmākaṁ vṛṣṭir divyā supārā ||

1.153.01a यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।

1.153.01c घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥

1.153.01a yajāmahe vām mahaḥ sajoṣā havyebhir mitrāvaruṇā namobhiḥ |
1.153.01c ghṛtair ghṛtasnū adha yad vām asme adhvaryavo na dhītibhir bharanti ||

1.153.02a प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।

1.153.02c अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥

1.153.02a prastutir vāṁ dhāma na prayuktir ayāmi mitrāvaruṇā suvṛktiḥ |
1.153.02c anakti yad vāṁ vidatheṣu hotā sumnaṁ vāṁ sūrir vṛṣaṇāv iyakṣan ||

1.153.03a पीपाय धेनुरदितिरृताय जनाय मित्रावरुणा हविर्दे ।

1.153.03c हिनोति यद्वां विदथे सपर्यन्स रातहव्यो मानुषो न होता ॥

1.153.03a pīpāya dhenur aditir ṛtāya janāya mitrāvaruṇā havirde |
1.153.03c hinoti yad vāṁ vidathe saparyan sa rātahavyo mānuṣo na hotā ||

1.153.04a उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।

1.153.04c उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥

1.153.04a uta vāṁ vikṣu madyāsv andho gāva āpaś ca pīpayanta devīḥ |
1.153.04c uto no asya pūrvyaḥ patir dan vītam pātam payasa usriyāyāḥ ||

1.154.01a विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।

1.154.01c यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥

1.154.01a viṣṇor nu kaṁ vīryāṇi pra vocaṁ yaḥ pārthivāni vimame rajāṁsi |
1.154.01c yo askabhāyad uttaraṁ sadhasthaṁ vicakramāṇas tredhorugāyaḥ ||

1.154.02a प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

1.154.02c यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥

1.154.02a pra tad viṣṇu stavate vīryeṇa mṛgo na bhīmaḥ kucaro giriṣṭhāḥ |
1.154.02c yasyoruṣu triṣu vikramaṇeṣv adhikṣiyanti bhuvanāni viśvā ||

1.154.03a प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।

1.154.03c य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥

1.154.03a pra viṣṇave śūṣam etu manma girikṣita urugāyāya vṛṣṇe |
1.154.03c ya idaṁ dīrgham prayataṁ sadhastham eko vimame tribhir it padebhiḥ ||

1.154.04a यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।

1.154.04c य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥

1.154.04a yasya trī pūrṇā madhunā padāny akṣīyamāṇā svadhayā madanti |
1.154.04c ya u tridhātu pṛthivīm uta dyām eko dādhāra bhuvanāni viśvā ||

1.154.05a तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।

1.154.05c उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥

1.154.05a tad asya priyam abhi pātho aśyāṁ naro yatra devayavo madanti |
1.154.05c urukramasya sa hi bandhur itthā viṣṇoḥ pade parame madhva utsaḥ ||

1.154.06a ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।

1.154.06c अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥

1.154.06a tā vāṁ vāstūny uśmasi gamadhyai yatra gāvo bhūriśṛṅgā ayāsaḥ |
1.154.06c atrāha tad urugāyasya vṛṣṇaḥ paramam padam ava bhāti bhūri ||

1.155.01a प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।

1.155.01c या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥

1.155.01a pra vaḥ pāntam andhaso dhiyāyate mahe śūrāya viṣṇave cārcata |
1.155.01c yā sānuni parvatānām adābhyā mahas tasthatur arvateva sādhunā ||

1.155.02a त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।

1.155.02c या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥

1.155.02a tveṣam itthā samaraṇaṁ śimīvator indrāviṣṇū sutapā vām uruṣyati |
1.155.02c yā martyāya pratidhīyamānam it kṛśānor astur asanām uruṣyathaḥ ||

1.155.03a ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।

1.155.03c दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥

1.155.03a tā īṁ vardhanti mahy asya pauṁsyaṁ ni mātarā nayati retase bhuje |
1.155.03c dadhāti putro 'varam param pitur nāma tṛtīyam adhi rocane divaḥ ||

1.155.04a तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।

1.155.04c यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥

1.155.04a tat-tad id asya pauṁsyaṁ gṛṇīmasīnasya trātur avṛkasya mīḷhuṣaḥ |
1.155.04c yaḥ pārthivāni tribhir id vigāmabhir uru kramiṣṭorugāyāya jīvase ||

1.155.05a द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।

1.155.05c तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥

1.155.05a dve id asya kramaṇe svardṛśo 'bhikhyāya martyo bhuraṇyati |
1.155.05c tṛtīyam asya nakir ā dadharṣati vayaś cana patayantaḥ patatriṇaḥ ||

1.155.06a चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतींरवीविपत् ।

1.155.06c बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ॥

1.155.06a caturbhiḥ sākaṁ navatiṁ ca nāmabhiś cakraṁ na vṛttaṁ vyatīm̐r avīvipat |
1.155.06c bṛhaccharīro vimimāna ṛkvabhir yuvākumāraḥ praty ety āhavam ||

1.156.01a भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।

1.156.01c अधा ते विष्णो विदुषा चिदर्ध्य स्तोमो यज्ञश्च राध्यो हविष्मता ॥

1.156.01a bhavā mitro na śevyo ghṛtāsutir vibhūtadyumna evayā u saprathāḥ |
1.156.01c adhā te viṣṇo viduṣā cid ardhya stomo yajñaś ca rādhyo haviṣmatā ||

1.156.02a यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।

1.156.02c यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥

1.156.02a yaḥ pūrvyāya vedhase navīyase sumajjānaye viṣṇave dadāśati |
1.156.02c yo jātam asya mahato mahi bravat sed u śravobhir yujyaṁ cid abhy asat ||

1.156.03a तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।

1.156.03c आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥

1.156.03a tam u stotāraḥ pūrvyaṁ yathā vida ṛtasya garbhaṁ januṣā pipartana |
1.156.03c āsya jānanto nāma cid vivaktana mahas te viṣṇo sumatim bhajāmahe ||

1.156.04a तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।

1.156.04c दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥

1.156.04a tam asya rājā varuṇas tam aśvinā kratuṁ sacanta mārutasya vedhasaḥ |
1.156.04c dādhāra dakṣam uttamam aharvidaṁ vrajaṁ ca viṣṇuḥ sakhivām̐ aporṇute ||

1.156.05a आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः ।

1.156.05c वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥

1.156.05a ā yo vivāya sacathāya daivya indrāya viṣṇuḥ sukṛte sukṛttaraḥ |
1.156.05c vedhā ajinvat triṣadhastha āryam ṛtasya bhāge yajamānam ābhajat ||

1.157.01a अबोध्यग्निर्ज्म उदेति सूर्यो व्यु१षाश्चन्द्रा मह्यावो अर्चिषा ।

1.157.01c आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥

1.157.01a abodhy agnir jma ud eti sūryo vy u1ṣāś candrā mahy āvo arciṣā |
1.157.01c āyukṣātām aśvinā yātave ratham prāsāvīd devaḥ savitā jagat pṛthak ||

1.157.02a यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।

1.157.02c अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥

1.157.02a yad yuñjāthe vṛṣaṇam aśvinā rathaṁ ghṛtena no madhunā kṣatram ukṣatam |
1.157.02c asmākam brahma pṛtanāsu jinvataṁ vayaṁ dhanā śūrasātā bhajemahi ||

1.157.03a अर्वाङ्त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।

1.157.03c त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥

1.157.03a a̱rvāṅ tri̍ca̱kro ma̍dhu̱vāha̍no̱ ratho̍ jī̱rāśvo̍ a̱śvino̍r yātu̱ suṣṭu̍taḥ |
1.157.03c tri̱va̱ndhu̱ro ma̱ghavā̍ vi̱śvasau̍bhaga̱ḥ śaṁ na̱ ā va̍kṣad dvi̱pade̱ catu̍ṣpade ||

1.157.04a आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम् ।

1.157.04c प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥

1.157.04a ā na̱ ūrja̍ṁ vahatam aśvinā yu̱vam madhu̍matyā na̱ḥ kaśa̍yā mimikṣatam |
1.157.04c prāyu̱s tāri̍ṣṭa̱ṁ nī rapā̍ṁsi mṛkṣata̱ṁ sedha̍ta̱ṁ dveṣo̱ bhava̍taṁ sacā̱bhuvā̍ ||

1.157.05a युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।

1.157.05c युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम् ॥

1.157.05a yu̱vaṁ ha̱ garbha̱ṁ jaga̍tīṣu dhattho yu̱vaṁ viśve̍ṣu̱ bhuva̍neṣv a̱ntaḥ |
1.157.05c yu̱vam a̱gniṁ ca̍ vṛ̱ṣa̱ṇāv a̱paś ca̱ vana̱spatī̍m̐r aśvinā̱v aira̍yethām ||

1.157.06a युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या३ राथ्येभिः ।

1.157.06c अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥

1.157.06a yu̱vaṁ ha̍ stho bhi̱ṣa̱jā̍ bheṣa̱jebhi̱r atho̍ ha stho ra̱thyā̱3 rāthye̍bhiḥ |
1.157.06c atho̍ ha kṣa̱tram adhi̍ dhattha ugrā̱ yo vā̍ṁ ha̱viṣmā̱n mana̍sā da̱dāśa̍ ||

1.158.01a वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणावभिष्टौ ।

1.158.01c दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती ॥

1.158.01a vasū̍ ru̱drā pu̍ru̱mantū̍ vṛ̱dhantā̍ daśa̱syata̍ṁ no vṛṣa̱ṇāv a̱bhiṣṭau̍ |
1.158.01c dasrā̍ ha̱ yad rekṇa̍ auca̱thyo vā̱m pra yat sa̱srāthe̱ aka̍vābhir ū̱tī ||

1.158.02a को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।

1.158.02c जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥

1.158.02a ko vā̍ṁ dāśat suma̱taye̍ cid a̱syai vasū̱ yad dhethe̱ nama̍sā pa̱de goḥ |
1.158.02c ji̱gṛ̱tam a̱sme re̱vatī̱ḥ pura̍ndhīḥ kāma̱preṇe̍va̱ mana̍sā̱ caranta̍ ||

1.158.03a युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः ।

1.158.03c उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः ॥

1.158.03a yukto ha yad vāṁ taugryāya perur vi madhye arṇaso dhāyi pajraḥ |
1.158.03c upa vām avaḥ śaraṇaṁ gameyaṁ śūro nājma patayadbhir evaiḥ ||

1.158.04a उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम् ।

1.158.04c मा मामेधो दशतयश्चितो धाक्प्र यद्वां बद्धस्त्मनि खादति क्षाम् ॥

1.158.04a upastutir aucathyam uruṣyen mā mām ime patatriṇī vi dugdhām |
1.158.04c mā mām edho daśatayaś cito dhāk pra yad vām baddhas tmani khādati kṣām ||

1.158.05a न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः ।

1.158.05c शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥

1.158.05a na mā garan nadyo mātṛtamā dāsā yad īṁ susamubdham avādhuḥ |
1.158.05c śiro yad asya traitano vitakṣat svayaṁ dāsa uro aṁsāv api gdha ||

1.158.06a दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।

1.158.06c अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥

1.158.06a dīrghatamā māmateyo jujurvān daśame yuge |
1.158.06c apām arthaṁ yatīnām brahmā bhavati sārathiḥ ||

1.159.01a प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।

1.159.01c देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥

1.159.01a pra dyāvā yajñaiḥ pṛthivī ṛtāvṛdhā mahī stuṣe vidatheṣu pracetasā |
1.159.01c devebhir ye devaputre sudaṁsasetthā dhiyā vāryāṇi prabhūṣataḥ ||

1.159.02a उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।

1.159.02c सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥

1.159.02a uta manye pitur adruho mano mātur mahi svatavas tad dhavīmabhiḥ |
1.159.02c suretasā pitarā bhūma cakratur uru prajāyā amṛtaṁ varīmabhiḥ ||

1.159.03a ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।

1.159.03c स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥

1.159.03a te sūnavaḥ svapasaḥ sudaṁsaso mahī jajñur mātarā pūrvacittaye |
1.159.03c sthātuś ca satyaṁ jagataś ca dharmaṇi putrasya pāthaḥ padam advayāvinaḥ ||

1.159.04a ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।

1.159.04c नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥

1.159.04a te māyino mamire supracetaso jāmī sayonī mithunā samokasā |
1.159.04c navyaṁ-navyaṁ tantum ā tanvate divi samudre antaḥ kavayaḥ sudītayaḥ ||

1.159.05a तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।

1.159.05c अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥

1.159.05a tad rādho adya savitur vareṇyaṁ vayaṁ devasya prasave manāmahe |
1.159.05c asmabhyaṁ dyāvāpṛthivī sucetunā rayiṁ dhattaṁ vasumantaṁ śatagvinam ||

1.160.01a ते हि द्यावापृथिवी विश्वशम्भुव ऋतावरी रजसो धारयत्कवी ।

1.160.01c सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥

1.160.01a te hi dyāvāpṛthivī viśvaśambhuva ṛtāvarī rajaso dhārayatkavī |
1.160.01c sujanmanī dhiṣaṇe antar īyate devo devī dharmaṇā sūryaḥ śuciḥ ||

1.160.02a उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।

1.160.02c सुधृष्टमे वपुष्ये३ न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥

1.160.02a uruvyacasā mahinī asaścatā pitā mātā ca bhuvanāni rakṣataḥ |
1.160.02c sudhṛṣṭame vapuṣye3 na rodasī pitā yat sīm abhi rūpair avāsayat ||

1.160.03a स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।

1.160.03c धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥

1.160.03a sa vahniḥ putraḥ pitroḥ pavitravān punāti dhīro bhuvanāni māyayā |
1.160.03c dhenuṁ ca pṛśniṁ vṛṣabhaṁ suretasaṁ viśvāhā śukram payo asya dukṣata ||

1.160.04a अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशम्भुवा ।

1.160.04c वि यो ममे रजसी सुक्रतूययाजरेभि स्कम्भनेभिः समानृचे ॥

1.160.04a ayaṁ devānām apasām apastamo yo jajāna rodasī viśvaśambhuvā |
1.160.04c vi yo mame rajasī sukratūyayājarebhi skambhanebhiḥ sam ānṛce ||

1.160.05a ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।

1.160.05c येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥

1.160.05a te no gṛṇāne mahinī mahi śravaḥ kṣatraṁ dyāvāpṛthivī dhāsatho bṛhat |
1.160.05c yenābhi kṛṣṭīs tatanāma viśvahā panāyyam ojo asme sam invatam ||

1.161.01a किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम ।

1.161.01c न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥

1.161.01a kim u śreṣṭhaḥ kiṁ yaviṣṭho na ājagan kim īyate dūtyaṁ1 kad yad ūcima |
1.161.01c na nindima camasaṁ yo mahākulo 'gne bhrātar druṇa id bhūtim ūdima ||

1.161.02a एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।

1.161.02c सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥

1.161.02a ekaṁ camasaṁ caturaḥ kṛṇotana tad vo devā abruvan tad va āgamam |
1.161.02c saudhanvanā yady evā kariṣyatha sākaṁ devair yajñiyāso bhaviṣyatha ||

1.161.03a अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।

1.161.03c धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥

1.161.03a agniṁ dūtam prati yad abravītanāśvaḥ kartvo ratha uteha kartvaḥ |
1.161.03c dhenuḥ kartvā yuvaśā kartvā dvā tāni bhrātar anu vaḥ kṛtvy emasi ||

1.161.04a चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।

1.161.04c यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्न्यानजे ॥

1.161.04a cakṛvāṁsa ṛbhavas tad apṛcchata kved abhūd yaḥ sya dūto na ājagan |
1.161.04c yadāvākhyac camasāñ caturaḥ kṛtān ād it tvaṣṭā gnāsv antar ny ānaje ||

1.161.05a हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।

1.161.05c अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभि स्परत् ॥

1.161.05a hanāmainām̐ iti tvaṣṭā yad abravīc camasaṁ ye devapānam anindiṣuḥ |
1.161.05c anyā nāmāni kṛṇvate sute sacām̐ anyair enān kanyā3 nāmabhi sparat ||

1.161.06a इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।

1.161.06c ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥

1.161.06a indro harī yuyuje aśvinā ratham bṛhaspatir viśvarūpām upājata |
1.161.06c ṛbhur vibhvā vājo devām̐ agacchata svapaso yajñiyam bhāgam aitana ||

1.161.07a निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।

1.161.07c सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥

1.161.07a niś carmaṇo gām ariṇīta dhītibhir yā jarantā yuvaśā tākṛṇotana |
1.161.07c saudhanvanā aśvād aśvam atakṣata yuktvā ratham upa devām̐ ayātana ||

1.161.08a इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुञ्जनेजनम् ।

1.161.08c सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥

1.161.08a idam udakam pibatety abravītanedaṁ vā ghā pibatā muñjanejanam |
1.161.08c saudhanvanā yadi tan neva haryatha tṛtīye ghā savane mādayādhvai ||

1.161.09a आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।

1.161.09c वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ॥

1.161.09a āpo bhūyiṣṭhā ity eko abravīd agnir bhūyiṣṭha ity anyo abravīt |
1.161.09c vadharyantīm bahubhyaḥ praiko abravīd ṛtā vadantaś camasām̐ apiṁśata ||

1.161.10a श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।

1.161.10c आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥

1.161.10a śroṇām eka udakaṁ gām avājati māṁsam ekaḥ piṁśati sūnayābhṛtam |
1.161.10c ā nimrucaḥ śakṛd eko apābharat kiṁ svit putrebhyaḥ pitarā upāvatuḥ ||

1.161.11a उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः ।

1.161.11c अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥

1.161.11a udvatsv asmā akṛṇotanā tṛṇaṁ nivatsv apaḥ svapasyayā naraḥ |
1.161.11c agohyasya yad asastanā gṛhe tad adyedam ṛbhavo nānu gacchatha ||

1.161.12a सम्मील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।

1.161.12c अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥

1.161.12a sammīlya yad bhuvanā paryasarpata kva svit tātyā pitarā va āsatuḥ |

1.161.12c aśapata yaḥ karasnaṁ va ādade yaḥ prābravīt pro tasmā abravītana ||

1.161.13a सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।

1.161.13c श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥

1.161.13a suṣupvāṁsa ṛbhavas tad apṛcchatāgohya ka idaṁ no abūbudhat |
1.161.13c śvānam basto bodhayitāram abravīt saṁvatsara idam adyā vy akhyata ||

1.161.14a दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।

1.161.14c अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥

1.161.14a divā yānti maruto bhūmyāgnir ayaṁ vāto antarikṣeṇa yāti |
1.161.14c adbhir yāti varuṇaḥ samudrair yuṣmām̐ icchantaḥ śavaso napātaḥ ||

1.162.01a मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।

1.162.01c यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥

1.162.01a mā no mitro varuṇo aryamāyur indra ṛbhukṣā marutaḥ pari khyan |
1.162.01c yad vājino devajātasya sapteḥ pravakṣyāmo vidathe vīryāṇi ||

1.162.02a यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।

1.162.02c सुप्राङ्जो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥

1.162.02a yan nirṇijā rekṇasā prāvṛtasya rātiṁ gṛbhītām mukhato nayanti |
1.162.02c suprāṅ ajo memyad viśvarūpa indrāpūṣṇoḥ priyam apy eti pāthaḥ ||

1.162.03a एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।

1.162.03c अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥

1.162.03a eṣa cchāgaḥ puro aśvena vājinā pūṣṇo bhāgo nīyate viśvadevyaḥ |
1.162.03c abhipriyaṁ yat puroḷāśam arvatā tvaṣṭed enaṁ sauśravasāya jinvati ||

1.162.04a यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।

1.162.04c अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥

1.162.04a yad dhaviṣyam ṛtuśo devayānaṁ trir mānuṣāḥ pary aśvaṁ nayanti |
1.162.04c atrā pūṣṇaḥ prathamo bhāga eti yajñaṁ devebhyaḥ prativedayann ajaḥ ||

1.162.05a होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।

1.162.05c तेन यज्ञेन स्वरंकृतेन स्वैष्टेन वक्षणा आ पृणध्वम् ॥

1.162.05a hotādhvaryur āvayā agnimindho grāvagrābha uta śaṁstā suvipraḥ |
1.162.05c tena yajñena svaraṅkṛtena svaiṣṭena vakṣaṇā ā pṛṇadhvam ||

1.162.06a यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।

1.162.06c ये चार्वते पचनं सम्भरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥

1.162.06a yūpavraskā uta ye yūpavāhāś caṣālaṁ ye aśvayūpāya takṣati |
1.162.06c ye cārvate pacanaṁ sambharanty uto teṣām abhigūrtir na invatu ||

1.162.07a उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।

1.162.07c अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥

1.162.07a upa prāgāt suman me 'dhāyi manma devānām āśā upa vītapṛṣṭhaḥ |
1.162.07c anv enaṁ viprā ṛṣayo madanti devānām puṣṭe cakṛmā subandhum ||

1.162.08a यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।

1.162.08c यद्वा घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥

1.162.08a yad vājino dāma sandānam arvato yā śīrṣaṇyā raśanā rajjur asya |
1.162.08c yad vā ghāsya prabhṛtam āsye3 tṛṇaṁ sarvā tā te api deveṣv astu ||

1.162.09a यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।

1.162.09c यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥

1.162.09a yad aśvasya kraviṣo makṣikāśa yad vā svarau svadhitau riptam asti |
1.162.09c yad dhastayoḥ śamitur yan nakheṣu sarvā tā te api deveṣv astu ||

1.162.10a यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।

1.162.10c सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥

1.162.10a yad ūvadhyam udarasyāpavāti ya āmasya kraviṣo gandho asti |
1.162.10c sukṛtā tac chamitāraḥ kṛṇvantūta medhaṁ śṛtapākam pacantu ||

1.162.11a यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।

1.162.11c मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥

1.162.11a yat te gātrād agninā pacyamānād abhi śūlaṁ nihatasyāvadhāvati |
1.162.11c mā tad bhūmyām ā śriṣan mā tṛṇeṣu devebhyas tad uśadbhyo rātam astu ||

1.162.12a ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।

1.162.12c ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥

1.162.12a ye vājinam paripaśyanti pakvaṁ ya īm āhuḥ surabhir nir hareti |
1.162.12c ye cārvato māṁsabhikṣām upāsata uto teṣām abhigūrtir na invatu ||

1.162.13a यन्नीक्षणं माँस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।

1.162.13c ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥

1.162.13a yan nīkṣaṇam māṁ̐spacanyā ukhāyā yā pātrāṇi yūṣṇa āsecanāni |
1.162.13c ūṣmaṇyāpidhānā carūṇām aṅkāḥ sūnāḥ pari bhūṣanty aśvam ||

1.162.14a निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।

1.162.14c यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥

1.162.14a nikramaṇaṁ niṣadanaṁ vivartanaṁ yac ca paḍbīśam arvataḥ |
1.162.14c yac ca papau yac ca ghāsiṁ jaghāsa sarvā tā te api deveṣv astu ||

1.162.15a मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।

1.162.15c इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥

1.162.15a mā tvāgnir dhvanayīd dhūmagandhir mokhā bhrājanty abhi vikta jaghriḥ |
1.162.15c iṣṭaṁ vītam abhigūrtaṁ vaṣaṭkṛtaṁ taṁ devāsaḥ prati gṛbhṇanty aśvam ||

1.162.16a यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।

1.162.16c संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥

1.162.16a yad aśvāya vāsa upastṛṇanty adhīvāsaṁ yā hiraṇyāny asmai |
1.162.16c sandānam arvantam paḍbīśam priyā deveṣv ā yāmayanti ||

1.162.17a यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।

1.162.17c स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥

1.162.17a yat te sāde mahasā śūkṛtasya pārṣṇyā vā kaśayā vā tutoda |

1.162.17c sruceva tā haviṣo adhvareṣu sarvā tā te brahmaṇā sūdayāmi ||

1.162.18a चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।

1.162.18c अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥

1.162.18a catustriṁśad vājino devabandhor vaṅkrīr aśvasya svadhitiḥ sam eti |
1.162.18c acchidrā gātrā vayunā kṛṇota paruṣ-parur anughuṣyā vi śasta ||

1.162.19a एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।

1.162.19c या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥

1.162.19a ekas tvaṣṭur aśvasyā viśastā dvā yantārā bhavatas tatha ṛtuḥ |
1.162.19c yā te gātrāṇām ṛtuthā kṛṇomi tā-tā piṇḍānām pra juhomy agnau ||

1.162.20a मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते ।

1.162.20c मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥

1.162.20a mā tvā tapat priya ātmāpiyantam mā svadhitis tanva1 ā tiṣṭhipat te |
1.162.20c mā te gṛdhnur aviśastātihāya chidrā gātrāṇy asinā mithū kaḥ ||

1.162.21a न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।

1.162.21c हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥

1.162.21a na vā u etan mriyase na riṣyasi devām̐ id eṣi pathibhiḥ sugebhiḥ |
1.162.21c harī te yuñjā pṛṣatī abhūtām upāsthād vājī dhuri rāsabhasya ||

1.162.22a सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम् ।

1.162.22c अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥

1.162.22a sugavyaṁ no vājī svaśvyam puṁsaḥ putrām̐ uta viśvāpuṣaṁ rayim |
1.162.22c anāgāstvaṁ no aditiḥ kṛṇotu kṣatraṁ no aśvo vanatāṁ haviṣmān ||

1.163.01a यदक्रन्दः प्रथमं जायमान उद्यन्समुद्रादुत वा पुरीषात् ।

1.163.01c श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥

1.163.01a yad akrandaḥ prathamaṁ jāyamāna udyan samudrād uta vā purīṣāt |
1.163.01c śyenasya pakṣā hariṇasya bāhū upastutyam mahi jātaṁ te arvan ||

1.163.02a यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्।

1.163.02c गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥

1.163.02a yamena dattaṁ trita enam āyunag indra eṇam prathamo adhy atiṣṭhat |
1.163.02c gandharvo asya raśanām agṛbhṇāt sūrād aśvaṁ vasavo nir ataṣṭa ||

1.163.03a असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।

1.163.03c असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥

1.163.03a asi yamo asy ādityo arvann asi trito guhyena vratena |
1.163.03c asi somena samayā vipṛkta āhus te trīṇi divi bandhanāni ||

1.163.04a त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।

1.163.04c उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम्॥

1.163.04a trīṇi ta āhur divi bandhanāni trīṇy apsu trīṇy antaḥ samudre |
1.163.04c uteva me varuṇaś chantsy arvan yatrā ta āhuḥ paramaṁ janitram ||

1.163.05a इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।

1.163.05c अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥

1.163.05a imā te vājinn avamārjanānīmā śaphānāṁ sanitur nidhānā |
1.163.05c atrā te bhadrā raśanā apaśyam ṛtasya yā abhirakṣanti gopāḥ ||

1.163.06a आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतंगम्।

1.163.06c शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥

1.163.06a ātmānaṁ te manasārād ajānām avo divā patayantam pataṅgam |
1.163.06c śiro apaśyam pathibhiḥ sugebhir areṇubhir jehamānam patatri ||

1.163.07a अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।

1.163.07c यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥

1.163.07a atrā te rūpam uttamam apaśyaṁ jigīṣamāṇam iṣa ā pade goḥ |
1.163.07c yadā te marto anu bhogam ānaḷ ād id grasiṣṭha oṣadhīr ajīgaḥ ||

1.163.08a अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम्।

1.163.08c अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥

1.163.08a anu tvā ratho anu maryo arvann anu gāvo 'nu bhagaḥ kanīnām |
1.163.08c anu vrātāsas tava sakhyam īyur anu devā mamire vīryaṁ te ||

1.163.09a हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।

1.163.09c देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥

1.163.09a hiraṇyaśṛṅgo 'yo asya pādā manojavā avara indra āsīt |
1.163.09c devā id asya haviradyam āyan yo arvantam prathamo adhyatiṣṭhat ||

1.163.10a ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।

1.163.10c हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥

1.163.10a īrmāntāsaḥ silikamadhyamāsaḥ saṁ śūraṇāso divyāso atyāḥ |
1.163.10c haṁsā iva śreṇiśo yatante yad ākṣiṣur divyam ajmam aśvāḥ ||

1.163.11a तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् ।

1.163.11c तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥

1.163.11a tava śarīram patayiṣṇv arvan tava cittaṁ vāta iva dhrajīmān |
1.163.11c tava śṛṅgāṇi viṣṭhitā purutrāraṇyeṣu jarbhurāṇā caranti ||

1.163.12a उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।

1.163.12c अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥

1.163.12a upa prāgāc chasanaṁ vājy arvā devadrīcā manasā dīdhyānaḥ |
1.163.12c ajaḥ puro nīyate nābhir asyānu paścāt kavayo yanti rebhāḥ ||

1.163.13a उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च ।

1.163.13c अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥

1.163.13a upa prāgāt paramaṁ yat sadhastham arvām̐ acchā pitaram mātaraṁ ca |
1.163.13c adyā devāñ juṣṭatamo hi gamyā athā śāste dāśuṣe vāryāṇi ||

1.164.01a अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।

1.164.01c तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥

1.164.01a asya vāmasya palitasya hotus tasya bhrātā madhyamo asty aśnaḥ |
1.164.01c tṛtīyo bhrātā ghṛtapṛṣṭho asyātrāpaśyaṁ viśpatiṁ saptaputram ||

1.164.02a सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।

1.164.02c त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥

1.164.02a sapta yuñjanti ratham ekacakram eko aśvo vahati saptanāmā |
1.164.02c trinābhi cakram ajaram anarvaṁ yatremā viśvā bhuvanādhi tasthuḥ ||

1.164.03a इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।

1.164.03c सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥

1.164.03a imaṁ ratham adhi ye sapta tasthuḥ saptacakraṁ sapta vahanty aśvāḥ |
1.164.03c sapta svasāro abhi saṁ navante yatra gavāṁ nihitā sapta nāma ||

1.164.04a को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।

1.164.04c भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥

1.164.04a ko dadarśa prathamaṁ jāyamānam asthanvantaṁ yad anasthā bibharti |
1.164.04c bhūmyā asur asṛg ātmā kva svit ko vidvāṁsam upa gāt praṣṭum etat ||

1.164.05a पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।

1.164.05c वत्से बष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥

1.164.05a pākaḥ pṛcchāmi manasāvijānan devānām enā nihitā padāni |
1.164.05c vatse baṣkaye 'dhi sapta tantūn vi tatnire kavaya otavā u ||

1.164.06a अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।

1.164.06c वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥

1.164.06a acikitvāñ cikituṣaś cid atra kavīn pṛcchāmi vidmane na vidvān |
1.164.06c vi yas tastambha ṣaḷ imā rajāṁsy ajasya rūpe kim api svid ekam ||

1.164.07a इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।

1.164.07c शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥

1.164.07a iha bravītu ya īm aṅga vedāsya vāmasya nihitam padaṁ veḥ |
1.164.07c śīrṣṇaḥ kṣīraṁ duhrate gāvo asya vavriṁ vasānā udakam padāpuḥ ||

1.164.08a माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।

1.164.08c सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥

1.164.08a mātā pitaram ṛta ā babhāja dhīty agre manasā saṁ hi jagme |
1.164.08c sā bībhatsur garbharasā nividdhā namasvanta id upavākam īyuḥ ||

1.164.09a युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।

1.164.09c अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥

1.164.09a yuktā mātāsīd dhuri dakṣiṇāyā atiṣṭhad garbho vṛjanīṣv antaḥ |
1.164.09c amīmed vatso anu gām apaśyad viśvarūpyaṁ triṣu yojaneṣu ||

1.164.10a तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।

1.164.10c मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥

1.164.10a tisro mātṝs trīn pitṝn bibhrad eka ūrdhvas tasthau nem ava glāpayanti |
1.164.10c mantrayante divo amuṣya pṛṣṭhe viśvavidaṁ vācam aviśvaminvām ||

1.164.11a द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।

1.164.11c आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥

1.164.11a dvādaśāraṁ nahi taj jarāya varvarti cakram pari dyām ṛtasya |
1.164.11c ā putrā agne mithunāso atra sapta śatāni viṁśatiś ca tasthuḥ ||

1.164.12a पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।

1.164.12c अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥

1.164.12a pañcapādam pitaraṁ dvādaśākṛtiṁ diva āhuḥ pare ardhe purīṣiṇam |
1.164.12c atheme anya upare vicakṣaṇaṁ saptacakre ṣaḷara āhur arpitam ||

1.164.13a पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।

1.164.13c तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥

1.164.13a pañcāre cakre parivartamāne tasminn ā tasthur bhuvanāni viśvā |
1.164.13c tasya nākṣas tapyate bhūribhāraḥ sanād eva na śīryate sanābhiḥ ||

1.164.14a सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।

1.164.14c सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥

1.164.14a sanemi cakram ajaraṁ vi vāvṛta uttānāyāṁ daśa yuktā vahanti |
1.164.14c sūryasya cakṣū rajasaity āvṛtaṁ tasminn ārpitā bhuvanāni viśvā ||

1.164.15a साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।

1.164.15c तेषामिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः ॥

1.164.15a sākañjānāṁ saptatham āhur ekajaṁ ṣaḷ id yamā ṛṣayo devajā iti |
1.164.15c teṣām iṣṭāni vihitāni dhāmaśa sthātre rejante vikṛtāni rūpaśaḥ ||

1.164.16a स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।

1.164.16c कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥

1.164.16a striyaḥ satīs tām̐ u me puṁsa āhuḥ paśyad akṣaṇvān na vi cetad andhaḥ |
1.164.16c kavir yaḥ putraḥ sa īm ā ciketa yas tā vijānāt sa pituṣ pitāsat ||

1.164.17a अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।

1.164.17c सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः ॥

1.164.17a avaḥ pareṇa para enāvareṇa padā vatsam bibhratī gaur ud asthāt |
1.164.17c sā kadrīcī kaṁ svid ardham parāgāt kva svit sūte nahi yūthe antaḥ ||

1.164.18a अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।

1.164.18c कवीयमानः क इह प्र वोचद्देवं मनः कुतो अधि प्रजातम् ॥

1.164.18a avaḥ pareṇa pitaraṁ yo asyānuveda para enāvareṇa |
1.164.18c kavīyamānaḥ ka iha pra vocad devam manaḥ kuto adhi prajātam ||

1.164.19a ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः ।

1.164.19c इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥

1.164.19a ye arvāñcas tām̐ u parāca āhur ye parāñcas tām̐ u arvāca āhuḥ |
1.164.19c indraś ca yā cakrathuḥ soma tāni dhurā na yuktā rajaso vahanti ||

1.164.20a द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।

1.164.20c तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥

1.164.20a dvā suparṇā sayujā sakhāyā samānaṁ vṛkṣam pari ṣasvajāte |

1.164.20c tayor anyaḥ pippalaṁ svādv atty anaśnann anyo abhi cākaśīti ||

1.164.21a यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।

1.164.21c इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥

1.164.21a yatrā suparṇā amṛtasya bhāgam animeṣaṁ vidathābhisvaranti |
1.164.21c ino viśvasya bhuvanasya gopāḥ sa mā dhīraḥ pākam atrā viveśa ||

1.164.22a यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।

1.164.22c तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥

1.164.22a yasmin vṛkṣe madhvadaḥ suparṇā niviśante suvate cādhi viśve |
1.164.22c tasyed āhuḥ pippalaṁ svādv agre tan non naśad yaḥ pitaraṁ na veda ||

1.164.23a यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।

1.164.23c यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥

1.164.23a yad gāyatre adhi gāyatram āhitaṁ traiṣṭubhād vā traiṣṭubhaṁ nirataksata |
1.164.23c yad vā jagaj jagaty āhitam padaṁ ya it tad vidus te amṛtatvam ānaśuḥ ||

1.164.24a गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।

1.164.24c वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥

1.164.24a gāyatreṇa prati mimīte arkam arkeṇa sāma traiṣṭubhena vākam |
1.164.24c vākena vākaṁ dvipadā catuṣpadākṣareṇa mimate sapta vāṇīḥ ||

1.164.25a जगता सिन्धुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यपश्यत् ।

1.164.25c गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥

1.164.25a jagatā sindhuṁ divy astabhāyad rathantare sūryam pary apaśyat |
1.164.25c gāyatrasya samidhas tisra āhus tato mahnā pra ririce mahitvā ||

1.164.26a उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।

1.164.26c श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥

1.164.26a upa hvaye sudughāṁ dhenum etāṁ suhasto godhug uta dohad enām |
1.164.26c śreṣṭhaṁ savaṁ savitā sāviṣan no 'bhīddho gharmas tad u ṣu pra vocam ||

1.164.27a हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।

1.164.27c दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥

1.164.27a hiṅkṛṇvatī vasupatnī vasūnāṁ vatsam icchantī manasābhy āgāt |
1.164.27c duhām aśvibhyām payo aghnyeyaṁ sā vardhatām mahate saubhagāya ||

1.164.28a गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।

1.164.28c सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥

1.164.28a gaur amīmed anu vatsam miṣantam mūrdhānaṁ hiṅṅ akṛṇon mātavā u |
1.164.28c sṛkvāṇaṁ gharmam abhi vāvaśānā mimāti māyum payate payobhiḥ ||

1.164.29a अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।

1.164.29c सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥

1.164.29a ayaṁ sa śiṅkte yena gaur abhīvṛtā mimāti māyuṁ dhvasanāv adhi śritā |
1.164.29c sā cittibhir ni hi cakāra martyaṁ vidyud bhavantī prati vavrim auhata ||

1.164.30a अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।

1.164.30c जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥

1.164.30a anac chaye turagātu jīvam ejad dhruvam madhya ā pastyānām |
1.164.30c jīvo mṛtasya carati svadhābhir amartyo martyenā sayoniḥ ||

1.164.31a अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।

1.164.31c स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥

1.164.31a apaśyaṁ gopām anipadyamānam ā ca parā ca pathibhiś carantam |
1.164.31c sa sadhrīcīḥ sa viṣūcīr vasāna ā varīvarti bhuvaneṣv antaḥ ||

1.164.32a य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।

1.164.32c स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥

1.164.32a ya īṁ cakāra na so asya veda ya īṁ dadarśa hirug in nu tasmāt |
1.164.32c sa mātur yonā parivīto antar bahuprajā nirṛtim ā viveśa ||

1.164.33a द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।

1.164.33c उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥

1.164.33a dyaur me pitā janitā nābhir atra bandhur me mātā pṛthivī mahīyam |

1.164.33c uttānayoś camvo3r yonir antar atrā pitā duhitur garbham ādhāt ||

1.164.34a पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।

1.164.34c पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥

1.164.34a pṛcchāmi tvā param antam pṛthivyāḥ pṛcchāmi yatra bhuvanasya nābhiḥ |
1.164.34c pṛcchāmi tvā vṛṣṇo aśvasya retaḥ pṛcchāmi vācaḥ paramaṁ vyoma ||

1.164.35a इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।

1.164.35c अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥

1.164.35a iyaṁ vediḥ paro antaḥ pṛthivyā ayaṁ yajño bhuvanasya nābhiḥ |
1.164.35c ayaṁ somo vṛṣṇo aśvasya reto brahmāyaṁ vācaḥ paramaṁ vyoma ||

1.164.36a सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।

1.164.36c ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥

1.164.36a saptārdhagarbhā bhuvanasya reto viṣṇos tiṣṭhanti pradiśā vidharmaṇi |
1.164.36c te dhītibhir manasā te vipaścitaḥ paribhuvaḥ pari bhavanti viśvataḥ ||

1.164.37a न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।

1.164.37c यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥

1.164.37a na vi jānāmi yad ivedam asmi niṇyaḥ sannaddho manasā carāmi |
1.164.37c yadā māgan prathamajā ṛtasyād id vāco aśnuve bhāgam asyāḥ ||

1.164.38a अपाङ्प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।

1.164.38c ता शश्वन्ता विषूचीना वियन्ता न्यश्न्यं चिक्युर्न नि चिक्युरन्यम् ॥

1.164.38a apāṅ prāṅ eti svadhayā gṛbhīto 'martyo martyenā sayoniḥ |
1.164.38c tā śaśvantā viṣūcīnā viyantā ny a1nyaṁ cikyur na ni cikyur anyam ||

1.164.39a ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।

1.164.39c यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥

1.164.39a ṛco akṣare parame vyoman yasmin devā adhi viśve niṣeduḥ |
1.164.39c yas tan na veda kim ṛcā kariṣyati ya it tad vidus ta ime sam āsate ||

1.164.40a सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।

1.164.40c अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥

1.164.40a sūyavasād bhagavatī hi bhūyā atho vayam bhagavantaḥ syāma |
1.164.40c addhi tṛṇam aghnye viśvadānīm piba śuddham udakam ācarantī ||

1.164.41a गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।

1.164.41c अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

1.164.41a gaurīr mimāya salilāni takṣaty ekapadī dvipadī sā catuṣpadī |
1.164.41c aṣṭāpadī navapadī babhūvuṣī sahasrākṣarā parame vyoman ||

1.164.42a तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।

1.164.42c ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥

1.164.42a tasyāḥ samudrā adhi vi kṣaranti tena jīvanti pradiśaś catasraḥ |
1.164.42c tataḥ kṣaraty akṣaraṁ tad viśvam upa jīvati ||

1.164.43a शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।

1.164.43c उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥

1.164.43a śakamayaṁ dhūmam ārād apaśyaṁ viṣūvatā para enāvareṇa |
1.164.43c ukṣāṇam pṛśnim apacanta vīrās tāni dharmāṇi prathamāny āsan ||

1.164.44a त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।

1.164.44c विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥

1.164.44a trayaḥ keśina ṛtuthā vi cakṣate saṁvatsare vapata eka eṣām |
1.164.44c viśvam eko abhi caṣṭe śacībhir dhrājir ekasya dadṛśe na rūpam ||

1.164.45a चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।

1.164.45c गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

1.164.45a catvāri vāk parimitā padāni tāni vidur brāhmaṇā ye manīṣiṇaḥ |
1.164.45c guhā trīṇi nihitā neṅgayanti turīyaṁ vāco manuṣyā vadanti ||

1.164.46a इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।

1.164.46c एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥

1.164.46a indram mitraṁ varuṇam agnim āhur atho divyaḥ sa suparṇo garutmān |

1.164.46c ekaṁ sad viprā bahudhā vadanty agniṁ yamam mātariśvānam āhuḥ ||

1.164.47a कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।

1.164.47c त आववृत्रन्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥

1.164.47a kr̥ṣṇaṁ niyānaṁ harayaḥ suparṇā apo vasānā divam ut patanti |
1.164.47c ta āvavr̥tran sadanād r̥tasyād id ghr̥tena pr̥thivī vy udyate ||

1.164.48a द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।

1.164.48c तस्मिन्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ॥

1.164.48a dvādaśa pradhayaś cakram ekaṁ trīṇi nabhyāni ka u tac ciketa |
1.164.48c tasmin sākaṁ triśatā na śaṅkavo 'rpitāḥ ṣaṣṭir na calācalāsaḥ ||

1.164.49a यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।

1.164.49c यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥

1.164.49a yas te stanaḥ śaśayo yo mayobhūr yena viśvā puṣyasi vāryāṇi |
1.164.49c yo ratnadhā vasuvid yaḥ sudatraḥ sarasvati tam iha dhātave kaḥ ||

1.164.50a यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

1.164.50c ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

1.164.50a yajñena yajñam ayajanta devās tāni dharmāṇi prathamāny āsan |
1.164.50c te ha nākaṁ mahimānaḥ sacanta yatra pūrve sādhyāḥ santi devāḥ ||

1.164.51a समानमेतदुदकमुच्चैत्यव चाहभिः ।

1.164.51c भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥

1.164.51a samānam etad udakam uc caity ava cāhabhiḥ |
1.164.51c bhūmim parjanyā jinvanti divaṁ jinvanty agnayaḥ ||

1.164.52a दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् ।

1.164.52c अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥

1.164.52a divyaṁ suparṇaṁ vāyasam br̥hantam apāṁ garbhaṁ darśatam oṣadhīnām |
1.164.52c abhīpato vr̥ṣṭibhis tarpayantaṁ sarasvantam avase johavīmi ||

1.165.01a कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः ।

1.165.01c कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥

1.165.01a kayā śubhā savayasaḥ sanīḷāḥ samānyā marutaḥ sam mimikṣuḥ |
1.165.01c kayā matī kuta etāsa ete 'rcanti śuṣmaṁ vṛṣaṇo vasūyā ||

1.165.02a कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ।

1.165.02c श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥

1.165.02a kasya brahmāṇi jujuṣur yuvānaḥ ko adhvare maruta ā vavarta |
1.165.02c śyenām̐ iva dhrajato antarikṣe kena mahā manasā rīramāma ||

1.165.03a कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।

1.165.03c सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥

1.165.03a kutas tvam indra māhinaḥ sann eko yāsi satpate kiṁ ta itthā |
1.165.03c sam pṛcchase samarāṇaḥ śubhānair voces tan no harivo yat te asme ||

1.165.04a ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।

1.165.04c आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥

1.165.04a brahmāṇi me matayaḥ śaṁ sutāsaḥ śuṣma iyarti prabhṛto me adriḥ |
1.165.04c ā śāsate prati haryanty ukthemā harī vahatas tā no accha ||

1.165.05a अतो वयमन्तमेभिर्युजानाः स्वक्षत्रेभिस्तन्व१ः शुम्भमानाः ।

1.165.05c महोभिरेताँ उप युज्महे न्विन्द्र स्वधामनु हि नो बभूथ ॥

1.165.05a ato vayam antamebhir yujānāḥ svakṣatrebhis tanva1ḥ śumbhamānāḥ |
1.165.05c mahobhir etām̐ upa yujmahe nv indra svadhām anu hi no babhūtha ||

1.165.06a क्व१ स्या वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये ।

1.165.06c अहं ह्यु१ग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥

1.165.06a kva1 syā vo marutaḥ svadhāsīd yan mām ekaṁ samadhattāhihatye |
1.165.06c ahaṁ hy u1gras taviṣas tuviṣmān viśvasya śatror anamaṁ vadhasnaiḥ ||

1.165.07a भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।

1.165.07c भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥

1.165.07a bhūri cakartha yujyebhir asme samānebhir vṛṣabha pauṁsyebhiḥ |
1.165.07c bhūrīṇi hi kṛṇavāmā śaviṣṭhendra kratvā maruto yad vaśāma ||

1.165.08a वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।

1.165.08c अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ॥

1.165.08a vadhīṁ vṛtram maruta indriyeṇa svena bhāmena taviṣo babhūvān |
1.165.08c aham etā manave viśvaścandrāḥ sugā apaś cakara vajrabāhuḥ ||

1.165.09a अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।

1.165.09c न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥

1.165.09a anuttam ā te maghavan nakir nu na tvāvām̐ asti devatā vidānaḥ |
1.165.09c na jāyamāno naśate na jāto yāni kariṣyā kṛṇuhi pravṛddha ||

1.165.10a एकस्य चिन्मे विभ्व१स्त्वोजो या नु दधृष्वान्कृणवै मनीषा ।

1.165.10c अहं ह्यु१ग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥

1.165.10a ekasya cin me vibhv a1stv ojo yā nu dadhṛṣvān kṛṇavai manīṣā |
1.165.10c ahaṁ hy u1gro maruto vidāno yāni cyavam indra id īśa eṣām ||

1.165.11a अमन्दन्मा मरुत स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।

1.165.11c इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥

1.165.11a amandan mā maruta stomo atra yan me naraḥ śrutyam brahma cakra |
1.165.11c indrāya vṛṣṇe sumakhāya mahyaṁ sakhye sakhāyas tanve tanūbhiḥ ||

1.165.12a एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।

1.165.12c संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥

1.165.12a eved ete prati mā rocamānā anedyaḥ śrava eṣo dadhānāḥ |
1.165.12c sañcakṣyā marutaś candravarṇā acchānta me chadayāthā ca nūnam ||

1.165.13a को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।

1.165.13c मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥

1.165.13a ko nv atra maruto māmahe vaḥ pra yātana sakhīm̐r acchā sakhāyaḥ |

1.165.13c manmāni citrā apivātayanta eṣām bhūta navedā ma ṛtānām ||

1.165.14a आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।

1.165.14c ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥

1.165.14a ā yad duvasyād duvase na kārur asmāñ cakre mānyasya medhā |
1.165.14c o ṣu vartta maruto vipram acchemā brahmāṇi jaritā vo arcat ||

1.165.15a एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।

1.165.15c एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥

1.165.15a eṣa va stomo maruta iyaṁ gīr māndāryasya mānyasya kāroḥ |
1.165.15c eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.166.01a तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे ।

1.166.01c ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥

1.166.01a tan nu vocāma rabhasāya janmane pūrvam mahitvaṁ vṛṣabhasya ketave |
1.166.01c aidheva yāman marutas tuviṣvaṇo yudheva śakrās taviṣāṇi kartana ||

1.166.02a नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।

1.166.02c नक्षन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ॥

1.166.02a nityaṁ na sūnum madhu bibhrata upa krīlanti krīlā vidatheṣu ghṛṣvayaḥ |
1.166.02c nakṣanti rudrā avasā namasvinaṁ na mardhanti svatavaso haviṣkṛtam ||

1.166.03a यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।

1.166.03c उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥

1.166.03a yasmā ūmāso amṛtā arāsata rāyas poṣaṁ ca haviṣā dadāśuṣe |
1.166.03c ukṣanty asmai maruto hitā iva purū rajāṁsi payasā mayobhuvaḥ ||

1.166.04a आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।

1.166.04c भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥

1.166.04a ā ye rajāṁsi taviṣībhir avyata pra va evāsaḥ svayatāso adhrajan |
1.166.04c bhayante viśvā bhuvanāni harmyā citro vo yāmaḥ prayatāsv ṛṣṭiṣu ||

1.166.05a यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।

1.166.05c विश्वो वो अज्मन्भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः ॥

1.166.05a yat tveṣayāmā nadayanta parvatān divo vā pṛṣṭhaṁ naryā acucyavuḥ |
1.166.05c viśvo vo ajman bhayate vanaspatī rathīyantīva pra jihīta oṣadhiḥ ||

1.166.06a यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।

1.166.06c यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥

1.166.06a yūyaṁ na ugrā marutaḥ sucetunāriṣṭagrāmāḥ sumatim pipartana |
1.166.06c yatrā vo didyud radati krivirdatī riṇāti paśvaḥ sudhiteva barhaṇā ||

1.166.07a प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।

1.166.07c अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥

1.166.07a pra skambhadeṣṇā anavabhrarādhaso 'lātṛṇāso vidatheṣu suṣṭutāḥ |
1.166.07c arcanty arkam madirasya pītaye vidur vīrasya prathamāni pauṁsyā ||

1.166.08a शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।

1.166.08c जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥

1.166.08a śatabhujibhis tam abhihruter aghāt pūrbhī rakṣatā maruto yam āvata |
1.166.08c janaṁ yam ugrās tavaso virapśinaḥ pāthanā śaṁsāt tanayasya puṣṭiṣu ||

1.166.09a विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता ।

1.166.09c अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥

1.166.09a viśvāni bhadrā maruto ratheṣu vo mithaspṛdhyeva taviṣāṇy āhitā |
1.166.09c aṁseṣv ā vaḥ prapatheṣu khādayo 'kṣo vaś cakrā samayā vi vāvṛte ||

1.166.10a भूरीणि भद्रा नर्येषु बाहुषु वक्षस्सु रुक्मा रभसासो अञ्जयः ।

1.166.10c अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥

1.166.10a bhūrīṇi bhadrā naryeṣu bāhuṣu vakṣassu rukmā rabhasāso añjayaḥ |
1.166.10c aṁseṣv etāḥ paviṣu kṣurā adhi vayo na pakṣān vy anu śriyo dhire ||

1.166.11a महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।

1.166.11c मन्द्राः सुजिह्वाः स्वरितार आसभिः सम्मिश्ला इन्द्रे मरुतः परिष्टुभः ॥

1.166.11a mahānto mahnā vibhvo3 vibhūtayo dūredṛśo ye divyā iva stṛbhiḥ |
1.166.11c mandrāḥ sujihvāḥ svaritāra āsabhiḥ sammiślā indre marutaḥ pariṣṭubhaḥ ||

1.166.12a तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।

1.166.12c इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ॥

1.166.12a tad vaḥ sujātā maruto mahitvanaṁ dīrghaṁ vo dātram aditer iva vratam |
1.166.12c indraś cana tyajasā vi hruṇāti taj janāya yasmai sukṛte arādhvam ||

1.166.13a तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।

1.166.13c अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥

1.166.13a tad vo jāmitvam marutaḥ pare yuge purū yac chaṁsam amṛtāsa āvata |
1.166.13c ayā dhiyā manave śruṣṭim āvyā sākaṁ naro daṁsanair ā cikitrire ||

1.166.14a येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।

1.166.14c आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्याम् ॥

1.166.14a yena dīrgham marutaḥ śūśavāma yuṣmākena parīṇasā turāsaḥ |
1.166.14c ā yat tatanan vṛjane janāsa ebhir yajñebhis tad abhīṣṭim aśyām ||

1.166.15a एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।

1.166.15c एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥

1.166.15a eṣa va stomo maruta iyaṁ gīr māndāryasya mānyasya kāroḥ |
1.166.15c eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.167.01a सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।

1.167.01c सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥

1.167.01a sahasraṁ ta indrotayo naḥ sahasram iṣo harivo gūrtatamāḥ |
1.167.01c sahasraṁ rāyo mādayadhyai sahasriṇa upa no yantu vājāḥ ||

1.167.02a आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।

1.167.02c अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयन्त पारे ॥

1.167.02a ā no 'vobhir maruto yāntv acchā jyeṣṭhebhir vā bṛhaddivaiḥ sumāyāḥ |

1.167.02c adha yad eṣāṁ niyutaḥ paramāḥ samudrasya cid dhanayanta pāre ||

1.167.03a मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।

1.167.03c गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥

1.167.03a mimyakṣa yeṣu sudhitā ghṛtācī hiraṇyanirṇig uparā na ṛṣṭiḥ |

1.167.03c guhā carantī manuṣo na yoṣā sabhāvatī vidathyeva saṁ vāk ||

1.167.04a परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।

1.167.04c न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥

1.167.04a parā śubhrā ayāso yavyā sādhāraṇyeva maruto mimikṣuḥ |

1.167.04c na rodasī apa nudanta ghorā juṣanta vṛdhaṁ sakhyāya devāḥ ||

1.167.05a जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।

1.167.05c आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥

1.167.05a joṣad yad īm asuryā sacadhyai viṣitastukā rodasī nṛmaṇāḥ |

1.167.05c ā sūryeva vidhato rathaṁ gāt tveṣapratīkā nabhaso netyā ||

1.167.06a आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ।

1.167.06c अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥

1.167.06a āsthāpayanta yuvatiṁ yuvānaḥ śubhe nimiślāṁ vidatheṣu pajrām |

1.167.06c arko yad vo maruto haviṣmān gāyad gāthaṁ sutasomo duvasyan ||

1.167.07a प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति ।

1.167.07c सचा यदीं वृषमणा अहंयु स्थिरा चिज्जनीर्वहते सुभागाः ॥

1.167.07a pra taṁ vivakmi vakmyo ya eṣām marutām mahimā satyo asti |

1.167.07c sacā yad īṁ vṛṣamaṇā ahaṁyu sthirā cij janīr vahate subhāgāḥ ||

1.167.08a पान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् ।

1.167.08c उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥

1.167.08a pānti mitrāvaruṇāv avadyāc cayata īm aryamo apraśastān |

1.167.08c uta cyavante acyutā dhruvāṇi vāvṛdha īm maruto dātivāraḥ ||

1.167.09a नही नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः ।

1.167.09c ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥

1.167.09a nahī nu vo maruto anty asme ārāttāc cic chavaso antam āpuḥ |
1.167.09c te dhṛṣṇunā śavasā śūśuvāṁso 'rṇo na dveṣo dhṛṣatā pari ṣṭhuḥ ||

1.167.10a वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ।

1.167.10c वयं पुरा महि च नो अनु द्यून्तन्न ऋभुक्षा नरामनु ष्यात् ॥

1.167.10a vayam adyendrasya preṣṭhā vayaṁ śvo vocemahi samarye |
1.167.10c vayam purā mahi ca no anu dyūn tan na ṛbhukṣā narām anu ṣyāt ||

1.167.11a एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।

1.167.11c एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥

1.167.11a eṣa va stomo maruta iyaṁ gīr māndāryasya mānyasya kāroḥ |
1.167.11c eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.168.01a यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे ।

1.168.01c आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥

1.168.01a yajñā-yajñā vaḥ samanā tuturvaṇir dhiyaṁ-dhiyaṁ vo devayā u dadhidhve |
1.168.01c ā vo 'rvācaḥ suvitāya rodasyor mahe vavṛtyām avase suvṛktibhiḥ ||

1.168.02a वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।

1.168.02c सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥

1.168.02a vavrāso na ye svajāḥ svatavasa iṣaṁ svar abhijāyanta dhūtayaḥ |
1.168.02c sahasriyāso apāṁ normaya āsā gāvo vandyāso nokṣaṇaḥ ||

1.168.03a सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।

1.168.03c ऐषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥

1.168.03a somāso na ye sutās tṛptāṁśavo hṛtsu pītāso duvaso nāsate |
1.168.03c aiṣām aṁseṣu rambhiṇīva rārabhe hasteṣu khādiś ca kṛtiś ca saṁ dadhe ||

1.168.04a अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।

1.168.04c अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ॥

1.168.04a ava svayuktā diva ā vṛthā yayur amartyāḥ kaśayā codata tmanā |
1.168.04c areṇavas tuvijātā acucyavur dṛḷhāni cin maruto bhrājadṛṣṭayaḥ ||

1.168.05a को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।

1.168.05c धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः ॥

1.168.05a ko vo 'ntar maruta ṛṣṭividyuto rejati tmanā hanveva jihvayā |
1.168.05c dhanvacyuta iṣāṁ na yāmani purupraiṣā ahanyo3 naitaśaḥ ||

1.168.06a क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।

1.168.06c यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥

1.168.06a kva svid asya rajaso mahas paraṁ kvāvaram maruto yasminn āyaya |
1.168.06c yac cyāvayatha vithureva saṁhitaṁ vy adriṇā patatha tveṣam arṇavam ||

1.168.07a सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।

1.168.07c भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥

1.168.07a sātir na vo 'mavatī svarvatī tveṣā vipākā marutaḥ pipiṣvatī |
1.168.07c bhadrā vo rātiḥ pṛṇato na dakṣiṇā pṛthujrayī asuryeva jañjatī ||

1.168.08a प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।

1.168.08c अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवन्ति ॥

1.168.08a prati ṣṭobhanti sindhavaḥ pavibhyo yad abhriyāṁ vācam udīrayanti |
1.168.08c ava smayanta vidyutaḥ pṛthivyāṁ yadī ghṛtam marutaḥ pruṣṇuvanti ||

1.168.09a असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।

1.168.09c ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन् ॥

1.168.09a asūta pṛśnir mahate raṇāya tveṣam ayāsām marutām anīkam |
1.168.09c te sapsarāso 'janayantābhvam ād it svadhām iṣirām pary apaśyan ||

1.168.10a एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।

1.168.10c एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥

1.168.10a eṣa va stomo maruta iyaṁ gīr māndāryasya mānyasya kāroḥ |

1.168.10c eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.169.01a महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता ।

1.169.01c स नो वेधो मरुतां चिकित्वान्सुम्ना वनुष्व तव हि प्रेष्ठा ॥

1.169.01a mahaś cit tvam indra yata etān mahaś cid asi tyajaso varūtā |
1.169.01c sa no vedho marutāṁ cikitvān sumnā vanuṣva tava hi preṣṭhā ||

1.169.02a अयुज्रन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।

1.169.02c मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥

1.169.02a ayujran ta indra viśvakṛṣṭīr vidānāso niṣṣidho martyatrā |
1.169.02c marutāṁ pṛtsutir hāsamānā svarmīḻhasya pradhanasya sātau ||

1.169.03a अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।

1.169.03c अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ॥

1.169.03a amyak sā ta indra ṛṣṭir asme sanemy abhvaṁ maruto junanti |
1.169.03c agniś cid dhi ṣmātase śuśukvān āpo na dvīpaṁ dadhati prayāṁsi ||

1.169.04a त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।

1.169.04c स्तुतश्च यास्ते चकनन्त वायो स्तनं न मध्वः पीपयन्त वाजैः ॥

1.169.04a tvaṁ tū na indra taṁ rayiṁ dā ojiṣṭhayā dakṣiṇayeva rātim |
1.169.04c stutaś ca yās te cakananta vāyo stanaṁ na madhvaḥ pīpayanta vājaiḥ ||

1.169.05a त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।

1.169.05c ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥

1.169.05a tve rāya indra tośatamāḥ praṇetāraḥ kasya cid ṛtāyoḥ |
1.169.05c te ṣu ṇo maruto mṛḻayantu ye smā purā gātūyantīva devāḥ ||

1.169.06a प्रति प्र याहीन्द्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व ।

1.169.06c अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः ॥

1.169.06a prati pra yāhīndra mīḻhuṣo nṝn mahaḥ pārthive sadane yatasva |
1.169.06c adha yad eṣāṁ pṛthubudhnāsa etās tīrthe nāryaḥ pauṁsyāni tasthuḥ ||

1.169.07a प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ।

1.169.07c ये मर्त्यं पृतनायन्तमूमैरृणावानं न पतयन्त सर्गैः ॥

1.169.07a prati ghorāṇām etānām ayāsām marutāṁ śṛṇva āyatām upabdiḥ |
1.169.07c ye martyam pṛtanāyantam ūmair ṛṇāvānaṁ na patayanta sargaiḥ ||

1.169.08a त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।

1.169.08c स्तवानेभि स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम् ॥

1.169.08a tvam mānebhya indra viśvajanyā radā marudbhiḥ śurudho goagrāḥ |
1.169.08c stavānebhi stavase deva devair vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.170.01a न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् ।

1.170.01c अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥

1.170.01a na nūnam asti no śvaḥ kas tad veda yad adbhutam |
1.170.01c anyasya cittam abhi sañcareṇyam utādhītaṁ vi naśyati ||

1.170.02a किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।

1.170.02c तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥

1.170.02a kiṁ na indra jighāṁsasi bhrātaro marutas tava |
1.170.02c tebhiḥ kalpasva sādhuyā mā naḥ samaraṇe vadhīḥ ||

1.170.03a किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।

1.170.03c विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥

1.170.03a kiṁ no bhrātar agastya sakhā sann ati manyase |
1.170.03c vidmā hi te yathā mano 'smabhyam in na ditsasi ||

1.170.04a अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः ।

1.170.04c तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥

1.170.04a araṁ kṛṇvantu vediṁ sam agnim indhatām puraḥ |
1.170.04c tatrāmṛtasya cetanaṁ yajñaṁ te tanavāvahai ||

1.170.05a त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः ।

1.170.05c इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥

1.170.05a tvam īśiṣe vasupate vasūnāṁ tvam mitrāṇām mitrapate dheṣṭhaḥ |
1.170.05c indra tvam marudbhiḥ saṁ vadasvādha prāśāna ṛtuthā havīṁṣi ||

1.171.01a प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।

1.171.01c रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ॥

1.171.01a prati va enā namasāham emi sūktena bhikṣe sumatiṁ turāṇām |
1.171.01c rarāṇatā maruto vedyābhir ni heḷo dhatta vi mucadhvam aśvān ||

1.171.02a एष व स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः ।

1.171.02c उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ॥

1.171.02a eṣa va stomo maruto namasvān hṛdā taṣṭo manasā dhāyi devāḥ |
1.171.02c upem ā yāta manasā juṣāṇā yūyaṁ hi ṣṭhā namasa id vṛdhāsaḥ ||

1.171.03a स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः ।

1.171.03c ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥

1.171.03a stutāso no maruto mṛḷayantūta stuto maghavā śambhaviṣṭhaḥ |
1.171.03c ūrdhvā naḥ santu komyā vanāny ahāni viśvā maruto jigīṣā ||

1.171.04a अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः ।

1.171.04c युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥

1.171.04a asmād ahaṁ taviṣād īṣamāṇa indrād bhiyā maruto rejamānaḥ |
1.171.04c yuṣmabhyaṁ havyā niśitāny āsan tāny āre cakṛmā mṛḷatā naḥ ||

1.171.05a येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।

1.171.05c स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभि स्थविरः सहोदाः ॥

1.171.05a yena mānāsaś citayanta usrā vyuṣṭiṣu śavasā śaśvatīnām |
1.171.05c sa no marudbhir vṛṣabha śravo dhā ugra ugrebhi sthaviraḥ sahodāḥ ||

1.171.06a त्वं पाहीन्द्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः ।

1.171.06c सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ॥

1.171.06a tvam pāhīndra sahīyaso nṝn bhavā marudbhir avayātahelāḥ |
1.171.06c supraketebhiḥ sāsahir dadhāno vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.172.01a चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः ।
1.172.01c मरुतो अहिभानवः ॥

1.172.01a citro vo 'stu yāmaś citra ūtī sudānavaḥ |
1.172.01c maruto ahibhānavaḥ ||

1.172.02a आरे सा वः सुदानवो मरुत ऋञ्जती शरुः ।
1.172.02c आरे अश्मा यमस्यथ ॥

1.172.02a āre sā vaḥ sudānavo maruta ṛñjatī śaruḥ |
1.172.02c āre aśmā yam asyatha ||

1.172.03a तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः ।
1.172.03c ऊर्ध्वान्नः कर्त जीवसे ॥

1.172.03a tṛṇaskandasya nu viśaḥ pari vṛṅkta sudānavaḥ |
1.172.03c ūrdhvān naḥ karta jīvase ||

1.173.01a गायत्साम नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
1.173.01c गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥

1.173.01a gāyat sāma nabhanyaṁ1 yathā ver arcāma tad vāvṛdhānaṁ svarvat |
1.173.01c gāvo dhenavo barhiṣy adabdhā ā yat sadmānaṁ divyaṁ vivāsān ||

1.173.02a अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्वो अति यज्जुगुर्यात् ।
1.173.02c प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः ॥

1.173.02a arcad vṛṣā vṛṣabhiḥ sveduhavyair mṛgo nāśno ati yaj juguryāt |
1.173.02c pra mandayur manāṁ gūrta hotā bharate maryo mithunā yajatraḥ ||

1.173.03a नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
1.173.03c क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥

1.173.03a nakṣad dhotā pari sadma mitā yan bharad garbham ā śaradaḥ pṛthivyāḥ |

1.173.03c kranda̱d aśvo̱ naya̍māno ru̱vad gaur a̱ntar dū̱to na roda̍sī cara̱d vāk ||

1.173.04a ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।

1.173.04c जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥

1.173.04a tā ka̱rmāṣa̍tarāsmai̱ pra cyau̱tnāni̍ deva̱yanto̍ bharante |
1.173.04c jujo̍ṣad indro̍ da̱smava̍rcā̱ nāsa̍tyeva̱ sugmyo̍ rathe̱ṣṭhāḥ ||

1.173.05a तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।

1.173.05c प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहन्ता ॥

1.173.05a tam u̍ ṣṭu̱hīndra̱ṁ yo ha̱ satvā̱ yaḥ śūro̍ ma̱ghavā̱ yo̱ ra̍the̱ṣṭhāḥ |
1.173.05c pra̱tī̱caś ci̱d yodhī̍yā̱n vṛṣa̱ṇvān vava̱vru̍ṣaś ci̱t tama̍so viha̱ntā ||

1.173.06a प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३ नास्मै ।

1.173.06c सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम् ॥

1.173.06a pra yad i̱tthā ma̍hi̱nā nṛbhyo̱ asty ara̱ṁ roda̍sī ka̱kṣye̱3 nāsmai̍ |
1.173.06c saṁ vi̍vya̱ indro̍ vṛ̱jana̱ṁ na bhūmā̱ bharti̍ sva̱dhāvā̍ṁ opa̱śam i̍va̱ dyām ||

1.173.07a समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै ।

1.173.07c सजोषस इन्द्रं मदे क्षोणीः सूरिं चिद्ये अनुमदन्ति वाजैः ॥

1.173.07a sa̱matsu̍ tvā śūra sa̱tām u̍rā̱ṇam pra̍pa̱thinta̍mam paritaṁsa̱yadhyai̍ |
1.173.07c sa̱jo̍ṣasa̱ indra̱m made̍ kṣo̱ṇīḥ sūri̱ṁ ci̱d ye a̍nu̱mada̍nti̱ vājai̍ḥ ||

1.173.08a एवा हि ते शं सवना समुद्र आपो यत्त आसु मदन्ति देवीः ।

1.173.08c विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान् ॥

1.173.08a e̱vā hi te̱ śaṁ sava̍nā samu̱dra āpo̱ yat ta̍ ā̱su mada̍nti de̱vīḥ |
1.173.08c viśvā̍ te̱ anu̱ joṣyā̍ bhū̱d gauḥ sū̱rīṁś ci̱d yadi̍ dhi̱ṣā ve̍ṣi̱ janān ||

1.173.09a असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।

1.173.09c असद्यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था ॥

1.173.09a asā̍ma̱ yathā̍ su̱ṣakhāya̍ ena svabhi̱ṣṭayo̍ na̱rāṁ na śaṁsai̍ḥ |
1.173.09c asa̱d yathā̍ na̱ indro̍ vandane̱ṣṭhās tu̱ro na karma̱ naya̍māna u̱kthā ||

1.173.10a विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः ।

1.173.10c मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः ॥

1.173.10a viṣpardhaso narāṁ na śaṁsair asmākāsad indro vajrahastaḥ |
1.173.10c mitrāyuvo na pūrpatiṁ suśiṣṭau madhyāyuva upa śikṣanti yajñaiḥ ||

1.173.11a यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन् ।

1.173.11c तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥

1.173.11a yajño hi ṣmendraṁ kaś cid ṛndhañ juhurāṇaś cin manasā pariyan |
1.173.11c tīrthe nācchā tātṛṣāṇam oko dīrgho na sidhram ā kṛṇoty adhvā ||

1.173.12a मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।

1.173.12c महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥

1.173.12a mo ṣū ṇa indrātra pṛtsu devair asti hi ṣmā te śuṣminn avayāḥ |
1.173.12c mahaś cid yasya mīḷhuṣo yavyā haviṣmato maruto vandate gīḥ ||

1.173.13a एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।

1.173.13c आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जीरदानुम् ॥

1.173.13a eṣa stoma indra tubhyam asme etena gātuṁ harivo vido naḥ |
1.173.13c ā no vavṛtyāḥ suvitāya deva vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.174.01a त्वं राजेन्द्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान् ।

1.174.01c त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥

1.174.01a tvaṁ rājendra ye ca devā rakṣā nṝn pāhy asura tvam asmān |
1.174.01c tvaṁ satpatir maghavā nas tarutras tvaṁ satyo vasavānaḥ sahodāḥ ||

1.174.02a दनो विश इन्द्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।

1.174.02c ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥

1.174.02a dano viśa indra mṛdhravācaḥ sapta yat puraḥ śarma śāradīr dart |
1.174.02c ṛṇor apo anavadyārṇā yūne vṛtram purukutsāya randhīḥ ||

1.174.03a अजा वृत इन्द्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनम् ।

1.174.03c रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥

1.174.03a ajā̱ vṛta̍ indra̱ śūra̍patnī̱r dyāṁ ca̱ yebhi̍ḥ puruhūta nū̱nam |
1.174.03c rakṣo̍ a̱gnim a̱śuṣa̱ṁ tūrva̍yāṇa̱ṁ si̍ṁho na dame̱ apā̍ṁsi̱ vasto̍ḥ ||

1.174.04a शेष॒न्नु त इ॑न्द्र॒ सस्मि॒न्योनौ॒ प्रश॑स्तये॒ पवी॑रवस्य म॒ह्ना ।

1.174.04c सृ॒जद॒र्णां॑स्यव॒ यद्यु॒धा गास्तिष्ठ॒द्धरी॑ धृष॒ता मृ॒ष्ट वाजा॑न् ॥

1.174.04a śeṣa̱n nu ta i̍ndra̱ sasmi̱n yonau̱ praśa̍staye̱ pavī̍ravasya ma̱hnā |
1.174.04c sṛ̱jad arṇā̱̍ṁsy ava̱ yad yu̱dhā gās tiṣṭha̱d dharī̍ dhṛṣa̱tā mṛ̱ṣṭa̱ vājā̍n ||

1.174.05a वह॒ कुत्स॑मिन्द्र॒ यस्मि॑ञ्चा॒कन्स्यू॑म॒न्यू ऋ॒ज्रा वात॒स्याश्वा॑ ।

1.174.05c प्र सू॑रश्च॒क्रं वृ॑हता॒द॒भीके॒ऽभि स्पृधो॑ यासिष॒द्वज्र॑बाहुः ॥

1.174.05a vaha̱ kutsa̍m indra̱ yasmi̍ñ cā̱kan syū̍ma̱nyū ṛ̱jrā vāta̱syāśvā̍ |
1.174.05c pra sūra̍ś ca̱kraṁ vṛ̍hatā̱d a̱bhīke̱ 'bhi spṛdho̍ yāsiṣa̱d vajra̍bāhuḥ ||

1.174.06a ज॒घ॒न्वाँ इ॑न्द्र मि॒त्रेरू॑ञ्चो॒दप्र॑वृद्धो हरिवो॒ अदा॑शून् ।

1.174.06c प्र ये पश्य॑न्नर्य॒मणं॒ सचा॑योस्त्वया॑ शू॒र्ता वह॑माना॒ अप॑त्यम् ॥

1.174.06a ja̱gha̱nvām̐ i̍ndra mi̱trerū̍ñ co̱dapra̍vṛddho harivo̱ adā̍śūn |
1.174.06c pra ye paśya̍nn arya̱maṇa̱ṁ sacā̍yos tvayā̍ śū̱rtā vaha̍mānā̱ apa̍tyam ||

1.174.07a रप॑त्क॒विरि॑न्द्रा॒र्कसा॑तौ॒ क्षां दा॒सायो॑प॒बर्ह॑णीं कः ।

1.174.07c कर॑त्ति॒स्रो म॒घवा॒ दानु॑चित्रा॒ नि दु॑र्यो॒णे कुय॑वाचं मृ॒धि श्रे॑त् ॥

1.174.07a rapa̍t ka̱vir i̍ndrā̱rkasā̍tau̱ kṣāṁ dā̱sāyo̍pa̱barha̍ṇīṁ kaḥ |
1.174.07c kara̍t ti̱sro ma̱ghavā̱ dānu̍citrā̱ ni du̍ryo̱ṇe kuya̍vācam mṛ̱dhi śre̍t ||

1.174.08a स॒ना ता त॑ इन्द्र॒ नव्या॒ आगुः॒ सहो॒ नभोऽवि॑रणाय पू॒र्वीः ।

1.174.08c भि॒नत्पुरो॒ न भिदो॒ अदे॑वीर्न॒नमो॒ वध॒रदे॑वस्य पी॒योः ॥

1.174.08a sanā̱ tā ta̍ indra̱ navyā̱ āgu̱ḥ saho̱ nabho 'vi̍raṇāya pū̱rvīḥ |
1.174.08c bhi̱nat puro̱ na bhido̱ ade̍vīr na̱namo̱ vadha̱r ade̍vasya pī̱yoḥ ||

1.174.09a त्वं धुनि॑रिन्द्र॒ धुनि॑मतीरृ॒णोर॒पः सी॒रा न स्रव॑न्तीः ।

1.174.09c प्र यत्स॑मु॒द्रमति॑ शूर॒ पर्षि॑ पा॒रया॑ तु॒र्वशं॒ यदुं॑ स्व॒स्ति ॥

1.174.09a tvaṁ dhuni̍r indra̱ dhuni̍matīr ṛ̱ṇor a̱paḥ sī̱rā na srava̍ntīḥ |
1.174.09c pra yat sa̍mu̱dram ati̍ śūra̱ parṣi̍ pā̱rayā̍ tu̱rvaśa̱ṁ yadu̍ṁ sva̱sti ||

1.174.10a त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।

1.174.10c स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥

1.174.10a tvam asmākam indra viśvadha syā avṛkatamo narāṁ nṛpātā |
1.174.10c sa no viśvāsāṁ spṛdhāṁ sahodā vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.175.01a मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।

1.175.01c वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥

1.175.01a matsy apāyi te mahaḥ pātrasyeva harivo matsaro madaḥ |
1.175.01c vṛṣā te vṛṣṇa indur vājī sahasrasātamaḥ ||

1.175.02a आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।

1.175.02c सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः ॥

1.175.02a ā nas te gantu matsaro vṛṣā mado vareṇyaḥ |
1.175.02c sahāvām̐ indra sānasiḥ pṛtanāṣāḷ amartyaḥ ||

1.175.03a त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।

1.175.03c सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥

1.175.03a tvaṁ hi śūraḥ sanitā codayo manuṣo ratham |
1.175.03c sahāvān dasyum avratam oṣaḥ pātraṁ na śociṣā ||

1.175.04a मुषाय सूर्यं कवे चक्रमीशान ओजसा ।

1.175.04c वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥

1.175.04a muṣāya sūryaṁ kave cakram īśāna ojasā |
1.175.04c vaha śuṣṇāya vadhaṁ kutsaṁ vātasyāśvaiḥ ||

1.175.05a शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।

1.175.05c वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥

1.175.05a śuṣmintamo hi te mado dyumnintama uta kratuḥ |
1.175.05c vṛtraghnā varivovidā maṁsīṣṭhā aśvasātamaḥ ||

1.175.06a यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।

1.175.06c तामनु॑ त्वा नि॒विदं॑ जोहवीमि वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥

1.175.06a yathā̱ pūrve̍bhyo jari̱tṛbhya̍ indra̱ maya̍ i̱vāpo̱ na tṛṣya̍te ba̱bhūtha̍ |
1.175.06c tām anu̍ tvā ni̱vida̍ṁ johavīmi vi̱dyāme̱ṣaṁ vṛ̱jana̍ṁ jī̱radā̍num ||

1.176.01a मत्सि॑ नो॒ वस्यइ॑ष्टय॒ इन्द्र॑मिन्दो॒ वृषा वि॑श ।

1.176.01c ऋ॒घा॒यमा॑ण इन्वसि॒ शत्रु॒मन्ति॒ न वि॑न्दसि ॥

1.176.01a matsi̍ no̱ vasyai̍ṣṭaya̱ indra̍m indo̱ vṛṣā vi̍śa |
1.176.01c ṛ̱ghā̱yamā̍ṇa invasi̱ śatru̱m anti̱ na vi̍ndasi ||

1.176.02a त॒स्मिन्ना वे॑शया॒ गिरो॒ य एक॑श्चर्षणी॒नाम् ।

1.176.02c अनु॑ स्व॒धा यमु॒प्यते॒ यवं॒ न चर्कृ॑ष॒द्वृषा॑ ॥

1.176.02a tasmi̱nn ā ve̍śayā̱ giro̱ ya eka̍ś carṣaṇī̱nām |
1.176.02c anu̍ sva̱dhā yam u̱pyate̱ yava̱ṁ na carkṛ̍ṣa̱d vṛṣā̍ ||

1.176.03a यस्य॒ विश्वा॑नि॒ हस्त॑योः॒ पञ्च॑ क्षिती॒नां वसु॑ ।

1.176.03c स्पा॒शय॑स्व॒ यो अ॑स्म॒ध्रुग्दि॒व्येवा॒शनि॑र्जहि ॥

1.176.03a yasya̱ viśvā̍ni̱ hasta̍yoḥ̱ pañca̍ kṣitī̱nāṁ vasu̍ |
1.176.03c spā̱śaya̍sva̱ yo a̍sma̱dhrug di̱vyevā̱śani̍r jahi ||

1.176.04a असु॑न्वन्तं समं जहि दू॒णाशं॒ यो न ते॒ मयः॑ ।

1.176.04c अ॒स्मभ्य॑मस्य॒ वेद॑नं द॒द्धि सू॒रिश्चि॑दोहते ॥

1.176.04a asu̍nvantaṁ samaṁ jahi dū̱ṇāśa̱ṁ yo na te̱ maya̍ḥ |
1.176.04c a̱smabhya̍m asya̱ veda̍naṁ da̱ddhi sū̱riś ci̍d ohate ||

1.176.05a आवो॒ यस्य॑ द्वि॒बर्ह॑सो॒ऽर्के॑षु सानु॒षग॑सत् ।

1.176.05c आ॒जाविन्द्र॑स्येन्दो॒ प्रावो॒ वाजे॑षु वा॒जिन॑म् ॥

1.176.05a āvo̱ yasya̍ dvi̱barha̍so̱ 'rke̍ṣu sānu̱ṣag asa̍t |
1.176.05c ā̱jāv indra̍syendo̱ prāvo̱ vāje̍ṣu vā̱jina̍m ||

1.176.06a यथा॒ पूर्वे॑भ्यो जरि॒तृभ्य॑ इन्द्र॒ मय॑ इ॒वापो॒ न तृष्य॑ते ब॒भूथ॑ ।

1.176.06c तामनु॑ त्वा नि॒विदं॑ जोहवीमि वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥

1.176.06a yathā̱ pūrve̍bhyo jari̱tṛbhya̍ indra̱ maya̍ i̱vāpo̱ na tṛṣya̍te ba̱bhūtha̍ |
1.176.06c tām anu̍ tvā ni̱vida̍ṁ johavīmi vi̱dyāme̱ṣaṁ vṛ̱jana̍ṁ jī̱radā̍num ||

1.177.01a आ च॑र्षणि॒प्रा वृ॑ष॒भो जना॑नां॒ राजा॑ कृष्टी॒नां पु॑रुहू॒त इन्द्र॑ः ।

1.177.01c स्तु॒तः श्र॑व॒स्यन्न॒वसोप॑ म॒द्रिग्यु॒क्त्वा हरी॒ वृष॒णा या॑ह्य॒र्वाङ् ॥

1.177.01a ā ca̍rṣaṇi̱prā vṛ̍ṣa̱bho janā̍nā̱ṁ rājā̍ kṛṣṭī̱nām pu̍ruhū̱ta indra̍ḥ |
1.177.01c stu̱taḥ śra̍va̱syann a̱vasopa̍ ma̱drig yu̱ktvā harī̱ vṛṣa̱ṇā yā̍hy a̱rvāṅ ||

1.177.02a ये ते॒ वृष॑णो वृष॒भास॑ इन्द्र ब्रह्म॒युजो॒ वृष॑रथासो॒ अत्या॑ः ।

1.177.02c ताँ आ ति॑ष्ठ॒ तेभि॒रा या॑ह्य॒र्वाङ्हवा॑महे त्वा सु॒त इन्द्र॒ सोमे॑ ॥

1.177.02a ye te̱ vṛṣa̍ṇo vṛṣa̱bhāsa̍ indra brahma̱yujo̱ vṛṣa̍rathāso̱ atyā̍ḥ |
1.177.02c tām̐ ā ti̍ṣṭha̱ tebhi̱r ā yā̍hy a̱rvāṅ havā̍mahe tvā su̱ta indra̱ some̍ ||

1.177.03a आ ति॑ष्ठ॒ रथं॒ वृष॑णं॒ वृषा॑ ते सु॒तः सोम॒ः परि॑षिक्ता॒ मधू॑नि ।

1.177.03c यु॒क्त्वा वृष॑भ्यां वृषभ क्षिती॒नां हरि॑भ्यां याहि प्र॒वतोप॑ म॒द्रिक् ॥

1.177.03a ā ti̍ṣṭha̱ ratha̱ṁ vṛṣa̍ṇa̱ṁ vṛṣā̍ te su̱taḥ soma̱ḥ pari̍ṣiktā̱ madhū̍ni |
1.177.03c yu̱ktvā vṛṣa̍bhyāṁ vṛṣabha kṣitī̱nāṁ hari̍bhyāṁ yāhi pra̱vatopa̍ ma̱drik ||

1.177.04a अ॒यं य॒ज्ञो दे॑व॒या अ॒यं मि॒येध॑ इ॒मा ब्रह्मा॑ण्य॒यमि॑न्द्र॒ सोम॑ः ।

1.177.04c स्ती॒र्णं ब॒र्हिरा तु श॑क्र॒ प्र या॑हि॒ पिबा॑ नि॒षद्य॒ वि मु॑चा॒ हरी॑ इ॒ह ॥

1.177.04a a̱yaṁ ya̱jño de̍va̱yā a̱yam mi̱yedha̍ i̱mā brahmā̍ṇy a̱yam i̍ndra̱ soma̍ḥ |
1.177.04c stī̱rṇam ba̱rhir ā tu śa̍kra̱ pra yā̍hi̱ pibā̍ ni̱ṣadya̱ vi mu̍cā̱ harī̍ i̱ha ||

1.177.05a ओ सुष्टु॑त इन्द्र याह्य॒र्वाङुप॒ ब्रह्मा॑णि मा॒न्यस्य॑ का॒रोः ।

1.177.05c वि॒द्याम॒ वस्तो॒रव॑सा गृ॒णन्तो॑ वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥

1.177.05a o suṣṭu̍ta indra yāhy a̱rvāṅ upa̱ brahmā̍ṇi mā̱nyasya̍ kā̱roḥ |
1.177.05c vi̱dyāma̱ vasto̱r ava̍sā gṛ̱ṇanto̍ vi̱dyāme̱ṣaṁ vṛ̱jana̍ṁ jī̱radā̍num ||

1.178.01a यद्ध॒ स्या त॑ इन्द्र श्रु॒ष्टिरस्ति॒ यया॑ ब॒भूथ॑ जरि॒तृभ्य॑ ऊ॒ती ।

1.178.01c मा नः॒ कामं॑ म॒हय॑न्त॒मा ध॒ग्विश्वा॑ ते अश्यां॒ पर्याप॑ आ॒योः ॥

1.178.01a yad dha̱ syā ta̍ indra śru̱ṣṭir asti̱ yayā̍ ba̱bhūtha̍ jari̱tṛbhya̍ ū̱tī |

1.178.01c mā naḥ kāmam mahayantam ā dhag viśvā te aśyām pary āpa āyoḥ ||

1.178.02a न घा राजेन्द्र आ दभन्नो या नु स्वसारा कृणवन्त योनौ ।

1.178.02c आपश्चिदस्मै सुतुका अवेषन्गमन्न इन्द्रः सख्या वयश्च ॥

1.178.02a na ghā rājendra ā dabhan no yā nu svasārā kṛṇavanta yonau |
1.178.02c āpaś cid asmai sutukā aveṣan gaman na indraḥ sakhyā vayaś ca ||

1.178.03a जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।

1.178.03c प्रभर्ता रथं दाशुष उपाक उद्यन्ता गिरो यदि च त्मना भूत् ॥

1.178.03a jetā nṛbhir indraḥ pṛtsu śūraḥ śrotā havaṁ nādhamānasya kāroḥ |
1.178.03c prabhartā rathaṁ dāśuṣa upāka udyantā giro yadi ca tmanā bhūt ||

1.178.04a एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।

1.178.04c समर्य इष स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥

1.178.04a evā nṛbhir indraḥ suśravasyā prakhādaḥ pṛkṣo abhi mitriṇo bhūt |
1.178.04c samarya iṣa stavate vivāci satrākaro yajamānasya śaṁsaḥ ||

1.178.05a त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान् ।

1.178.05c त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥

1.178.05a tvayā vayam maghavann indra śatrūn abhi ṣyāma mahato manyamānān |
1.178.05c tvaṁ trātā tvam u no vṛdhe bhūr vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.179.01a पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।

1.179.01c मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥

1.179.01a pūrvīr ahaṁ śaradaḥ śaśramāṇā doṣā vastor uṣaso jarayantīḥ |
1.179.01c mināti śriyaṁ jarimā tanūnām apy ū nu patnīr vṛṣaṇo jagamyuḥ ||

1.179.02a ये चिद्धि पूर्व ऋतसाप आसन्साकं देवेभिरवदन्नृतानि ।

1.179.02c ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥

1.179.02a ye cid dhi pūrva ṛtasāpa āsan sākaṁ devebhir avadann ṛtāni |
1.179.02c te cid avāsur nahy antam āpuḥ sam ū nu patnīr vṛṣabhir jagamyuḥ ||

1.179.03a न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव ।

1.179.03c जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥

1.179.03a na mṛṣā śrāntaṁ yad avanti devā viśvā it spṛdho abhy aśnavāva |
1.179.03c jayāved atra śatanītham ājiṁ yat samyañcā mithunāv abhy ajāva ||

1.179.04a नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ।

1.179.04c लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥

1.179.04a nadasya mā rudhataḥ kāma āgann ita ājāto amutaḥ kutaś cit |
1.179.04c lopāmudrā vṛṣaṇaṁ nī riṇāti dhīram adhīrā dhayati śvasantam ||

1.179.05a इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।

1.179.05c यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥

1.179.05a imaṁ nu somam antito hṛtsu pītam upa bruve |
1.179.05c yat sīm āgaś cakṛmā tat su mṛḷatu pulukāmo hi martyaḥ ||

1.179.06a अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।

1.179.06c उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥

1.179.06a agastyaḥ khanamānaḥ khanitraiḥ prajām apatyam balam icchamānaḥ |
1.179.06c ubhau varṇāv ṛṣir ugraḥ pupoṣa satyā deveṣv āśiṣo jagāma ||

1.180.01a युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।

1.180.01c हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥

1.180.01a yuvo rajāṁsi suyamāso aśvā ratho yad vām pary arṇāṁsi dīyat |
1.180.01c hiraṇyayā vām pavayaḥ pruṣāyan madhvaḥ pibantā uṣasaḥ sacethe ||

1.180.02a युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।

1.180.02c स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥

1.180.02a yuvam atyasyāva nakṣatho yad vipatmano naryasya prayajyoḥ |
1.180.02c svasā yad vāṁ viśvagūrtī bharāti vājāyeṭṭe madhupāv iṣe ca ||

1.180.03a युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।

1.180.03c अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥

1.180.03a yuvam paya usriyāyām adhattam pakvam āmāyām ava pūrvyaṁ goḥ |
1.180.03c antar yad vanino vām ṛtapsū hvāro na śucir yajate haviṣmān ||

1.180.04a युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।

1.180.04c तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥

1.180.04a yuvaṁ ha gharmam madhumantam atraye 'po na kṣodo 'vṛṇītam eṣe |
1.180.04c tad vāṁ narāv aśvinā paśvaiṣṭī rathyeva cakrā prati yanti madhvaḥ ||

1.180.05a आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।

1.180.05c अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥

1.180.05a ā vāṁ dānāya vavṛtīya dasrā gor ohena taugryo na jivriḥ |
1.180.05c apaḥ kṣoṇī sacate māhinā vāṁ jūrṇo vām akṣur aṁhaso yajatrā ||

1.180.06a नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।

1.180.06c प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥

1.180.06a ni yad yuvethe niyutaḥ sudānū upa svadhābhiḥ sṛjathaḥ purandhim |
1.180.06c preṣad veṣad vāto na sūrir ā mahe dade suvrato na vājam ||

1.180.07a वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।

1.180.07c अधा चिद्धि ष्माश्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥

1.180.07a vayaṁ cid dhi vāṁ jaritāraḥ satyā vipanyāmahe vi paṇir hitāvān |
1.180.07c adhā cid dhi ṣmāśvināv anindyā pātho hi ṣmā vṛṣaṇāv antidevam ||

1.180.08a युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।

1.180.08c अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥

1.180.08a yuvāṁ cid dhi ṣmāśvināv anu dyūn virudrasya prasravaṇasya sātau |
1.180.08c agastyo narāṁ nṛṣu praśastaḥ kārādhunīva citayat sahasraiḥ ||

1.180.09a प्र यद्वहेथे महिना रथस्य प्र स्यन्द्रा याथो मनुषो न होता ।

1.180.09c धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥

1.180.09a pra yad vahethe mahinā rathasya pra syandrā yātho manuṣo na hotā |

1.180.09c dhattaṁ sūribhya uta vā svaśvyaṁ nāsatyā rayiṣācaḥ syāma ||

1.180.10a तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम् ।

1.180.10c अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥

1.180.10a taṁ vāṁ rathaṁ vayam adyā huvema stomair aśvinā suvitāya navyam |
1.180.10c ariṣṭanemim pari dyām iyānaṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.181.01a कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।

1.181.01c अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥

1.181.01a kad u preṣṭāv iṣāṁ rayīṇām adhvaryantā yad unninītho apām |
1.181.01c ayaṁ vāṁ yajño akṛta praśastiṁ vasudhitī avitārā janānām ||

1.181.02a आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।

1.181.02c मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥

1.181.02a ā vām aśvāsaḥ śucayaḥ payaspā vātaraṁhaso divyāso atyāḥ |
1.181.02c manojuvo vṛṣaṇo vītapṛṣṭhā eha svarājo aśvinā vahantu ||

1.181.03a आ वां रथोऽवनिर्न प्रवत्वान्सृप्रवन्धुरः सुविताय गम्याः ।

1.181.03c वृष्ण स्थातारा मनसो जवीयानहम्पूर्वो यजतो धिष्ण्या यः ॥

1.181.03a ā vāṁ ratho 'vanir na pravatvān sṛpravandhuraḥ suvitāya gamyāḥ |
1.181.03c vṛṣṇa sthātārā manaso javīyān ahampūrvo yajato dhiṣṇyā yaḥ ||

1.181.04a इहेह जाता समवावशीतामरेपसा तन्वा३ नामभिः स्वैः ।

1.181.04c जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥

1.181.04a iheha jātā sam avāvaśītām arepasā tanvā3 nāmabhiḥ svaiḥ |
1.181.04c jiṣṇur vām anyaḥ sumakhasya sūrir divo anyaḥ subhagaḥ putra ūhe ||

1.181.05a प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।

1.181.05c हरी अन्यस्य पीपयन्त वाजैर्मथ्रा रजांस्यश्विना वि घोषैः ॥

1.181.05a pra vāṁ niceruḥ kakuho vaśām̐ anu piśaṅgarūpaḥ sadanāni gamyāḥ |
1.181.05c harī anyasya pīpayanta vājair mathrā rajāṁsy aśvinā vi ghoṣaiḥ ||

1.181.06a प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।

1.181.06c एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥

1.181.06a pra vāṁ śaradvān vṛṣabho na niṣṣāṭ pūrvīr iṣaś carati madhva iṣṇan |
1.181.06c evair anyasya pīpayanta vājair veṣantīr ūrdhvā nadyo na āguḥ ||

1.181.07a असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती ।

1.181.07c उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥

1.181.07a asarji vāṁ sthavirā vedhasā gīr bāḷhe aśvinā tredhā kṣarantī |
1.181.07c upastutāv avataṁ nādhamānaṁ yāmann ayāmañ chṛṇutaṁ havaṁ me ||

1.181.08a उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।

1.181.08c वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥

1.181.08a uta syā vāṁ ruśato vapsaso gīs tribarhiṣi sadasi pinvate nṝn |
1.181.08c vṛṣā vāṁ megho vṛṣaṇā pīpāya gor na seke manuṣo daśasyan ||

1.181.09a युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान् ।

1.181.09c हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ॥

1.181.09a yuvāṁ pūṣevāśvinā purandhir agnim uṣāṁ na jarate haviṣmān |
1.181.09c huve yad vāṁ varivasyā gṛṇāno vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.182.01a अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः ।

1.182.01c धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥

1.182.01a abhūd idaṁ vayunam o ṣu bhūṣatā ratho vṛṣaṇvān madatā manīṣiṇaḥ |
1.182.01c dhiyañjinvā dhiṣṇyā viśpalāvasū divo napātā sukṛte śucivratā ||

1.182.02a इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा ।

1.182.02c पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना ॥

1.182.02a indratamā hi dhiṣṇyā maruttamā dasrā daṁsiṣṭhā rathyā rathītamā |
1.182.02c pūrṇaṁ rathaṁ vahethe madhva ācitaṁ tena dāśvāṁsam upa yātho aśvinā ||

1.182.03a किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते ।

1.182.03c अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥

1.182.03a kim atra dasrā kr̥ṇuthaḥ kim āsāthe jano yaḥ kaś cid ahavir mahīyate |
1.182.03c ati kramiṣṭaṁ juratam paṇer asuṁ jyotir viprāya kr̥ṇutaṁ vacasyave ||

1.182.04a जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।

1.182.04c वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥

1.182.04a jambhayatam abhito rāyataḥ śuno hatam mr̥dho vidathus tāny aśvinā |
1.182.04c vācaṁ-vācaṁ jaritū ratninīṁ kr̥tam ubhā śaṁsaṁ nāsatyāvatam mama ||

1.182.05a युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।

1.182.05c येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥

1.182.05a yuvam etaṁ cakrathuḥ sindhuṣu plavam ātmanvantam pakṣiṇaṁ taugryāya kam |
1.182.05c yena devatrā manasā nirūhathuḥ supaptanī petathuḥ kṣodaso mahaḥ ||

1.182.06a अवविद्धं तौग्र्यमप्स्व१न्तरनारम्भणे तमसि प्रविद्धम् ।

1.182.06c चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥

1.182.06a avaviddhaṁ taugryam apsv a1ntar anārambhaṇe tamasi praviddham |
1.182.06c catasro nāvo jaṭhalasya juṣṭā ud aśvibhyām iṣitāḥ pārayanti ||

1.182.07a कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।

1.182.07c पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥

1.182.07a kaḥ svid vr̥kṣo niṣṭhito madhye arṇaso yaṁ taugryo nādhitaḥ paryaṣasvajat |
1.182.07c parṇā mr̥gasya pataror ivārabha ud aśvinā ūhathuḥ śromatāya kam ||

1.182.08a तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन् ।

1.182.08c अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥

1.182.08a tad vāṁ narā nāsatyāv anu ṣyād yad vām mānāsa ucatham avocan |
1.182.08c asmād adya sadasaḥ somyād ā vidyāmeṣaṁ vr̥janaṁ jīradānum ||

1.183.01a तं युञ्जाथां मनसो यो जवीयान्त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।

1.183.01c येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥

1.183.01a tam yuñjāthām manaso yo javīyān trivandhuro vṛṣaṇā yas tricakraḥ |
1.183.01c yenopayāthaḥ sukṛto duroṇaṁ tridhātunā patatho vir na parṇaiḥ ||

1.183.02a सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमन्तानु पृक्षे ।

1.183.02c वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥

1.183.02a suvṛd ratho vartate yann abhi kṣāṁ yat tiṣṭhathaḥ kratumantānu pṛkṣe |
1.183.02c vapur vapuṣyā sacatām iyaṁ gīr divo duhitroṣasā sacethe ||

1.183.03a आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान् ।

1.183.03c येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥

1.183.03a ā tiṣṭhataṁ suvṛtaṁ yo ratho vām anu vratāni vartate haviṣmān |
1.183.03c yena narā nāsatyeṣayadhyai vartir yāthas tanayāya tmane ca ||

1.183.04a मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत माति धक्तम् ।

1.183.04c अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनाम् ॥

1.183.04a mā vāṁ vṛko mā vṛkīr ā dadharṣīn mā pari varktam uta māti dhaktam |
1.183.04c ayaṁ vām bhāgo nihita iyaṁ gīr dasrāv ime vāṁ nidhayo madhūnām ||

1.183.05a युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान् ।

1.183.05c दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम् ॥

1.183.05a yuvāṁ gotamaḥ purumīḷho atrir dasrā havate 'vase haviṣmān |
1.183.05c diśaṁ na diṣṭām ṛjūyeva yantā me havaṁ nāsatyopa yātam ||

1.183.06a अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।

1.183.06c एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥

1.183.06a atāriṣma tamasas pāram asya prati vāṁ stomo aśvināv adhāyi |
1.183.06c eha yātam pathibhir devayānair vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.184.01a ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।

1.184.01c नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥

1.184.01a tā vām adya tāv aparaṁ huvemocchantyām uṣasi vahnir ukthaiḥ |
1.184.01c nāsatyā kuha cit santāv aryo divo napātā sudāstarāya ||

1.184.02a अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदन्ता ।

1.184.02c श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥

1.184.02a a̱sme ū̱ ṣu vṛ̍ṣaṇā mādayethā̱m ut pa̱ṇī̍m̐r ha̍tam ū̱rmyā mada̍ntā |
1.184.02c śru̱tam me̱ accho̍ktibhir mati̱nām eṣṭā̍ narā̱ nice̍tārā ca̱ karṇai̍ḥ ||

1.184.03a श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।

1.184.03c वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥

1.184.03a śri̱ye pū̍ṣann iṣu̱kṛ̍teva de̱vā nāsa̍tyā vaha̱tuṁ sū̱ryāyā̍ḥ |
1.184.03c va̱cyante̍ vāṁ kaku̱hā a̱psu jā̱tā yu̱gā jū̱rṇeva̱ varu̍ṇasya̱ bhūre̍ḥ ||

1.184.04a अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।

1.184.04c अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥

1.184.04a a̱sme sā vā̍m mādhvī rā̱tir a̍stu̱ stoma̍ṁ hinotam mā̱nyasya̍ kā̱roḥ |
1.184.04c anu̱ yad vā̍ṁ śrava̱syā̍ sudānū su̱vīrya̍̄ya carṣa̱ṇayo̱ mada̍nti ||

1.184.05a एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।

1.184.05c यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥

1.184.05a e̱ṣa vā̱ṁ stomo̍ aśvinā̱v akā̱ri̍ māne̍bhir maghavānā su̱vṛ̱kti |
1.184.05c yā̱taṁ va̱rtis tana̍yāya̱ tmane̍ cā̱gastye̍ nāsatyā̱ mada̍ntā ||

1.184.06a अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।

1.184.06c एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥

1.184.06a atā̍riṣma̱ tama̍sas pā̱ram a̱sya prati̍ vā̱ṁ stomo̍ aśvi̍nāv adhāyi |
1.184.06c eha yā̍tam pa̱thibhi̍r deva̱yānair vi̱dyāme̱ṣaṁ vṛ̱jana̍ṁ jī̱radā̍num ||

1.185.01a कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।

1.185.01c विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥

1.185.01a ka̱ta̱rā pūrvā̍ kata̱rāparā̱yoḥ ka̱thā jā̱te ka̍vaya̱ḥ ko vi ve̍da |
1.185.01c viśva̱ṁ tmanā̍ bibhṛto̱ yad dha̱ nāma̱ vi va̍rtete̱ aha̍nī ca̱kriye̍va ||

1.185.02a भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।

1.185.02c नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.02a bhūriṁ dve acarantī carantam padvantaṁ garbham apadī dadhāte |
1.185.02c nityaṁ na sūnum pitror upasthe dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.03a अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत्।

1.185.03c तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.03a aneho dātram aditer anarvaṁ huve svarvad avadhaṁ namasvat |
1.185.03c tad rodasī janayataṁ jaritre dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.04a अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे।

1.185.04c उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.04a atapyamāne avasāvantī anu ṣyāma rodasī devaputre |
1.185.04c ubhe devānām ubhayebhir ahnāṁ dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.05a संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे।

1.185.05c अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.05a saṅgacchamāne yuvatī samante svasārā jāmī pitror upasthe |
1.185.05c abhijighrantī bhuvanasya nābhiṁ dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.06a उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री।

1.185.06c दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.06a urvī sadmanī bṛhatī ṛtena huve devānām avasā janitrī |
1.185.06c dadhāte ye amṛtaṁ supratīke dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.07a उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन्।

1.185.07c दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.07a urvī pṛthvī bahule dūreante upa bruve namasā yajñe asmin |
1.185.07c dadhāte ye subhage supratūrtī dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.08a देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा।

1.185.08c इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात्॥

1.185.08a devān vā yac cakṛmā kac cid āgaḥ sakhāyaṁ vā sadam ij jāspatiṁ vā |

1.185.08c iyaṁ dhīr bhūyā avayānam eṣāṁ dyāvā rakṣatam pṛthivī no abhvāt ||

1.185.09a उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।

1.185.09c भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥

1.185.09a ubhā śaṁsā naryā mām aviṣṭām ubhe mām ūtī avasā sacetām |
1.185.09c bhūri cid aryaḥ sudāstarāyeṣā madanta iṣayema devāḥ ||

1.185.10a ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।

1.185.10c पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥

1.185.10a ṛtaṁ dive tad avocam pṛthivyā abhiśrāvāya prathamaṁ sumedhāḥ |
1.185.10c pātām avadyād duritād abhīke pitā mātā ca rakṣatām avobhiḥ ||

1.185.11a इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।

1.185.11c भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥

1.185.11a idaṁ dyāvāpṛthivī satyam astu pitar mātar yad ihopabruve vām |
1.185.11c bhūtaṁ devānām avame avobhir vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.186.01a आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।

1.186.01c अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥

1.186.01a ā na iḷābhir vidathe suśasti viśvānaraḥ savitā deva etu |
1.186.01c api yathā yuvāno matsathā no viśvaṁ jagad abhipitve manīṣā ||

1.186.02a आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।

1.186.02c भुवन्यथा नो विश्वे वृधासः करन्सुषाहा विथुरं न शवः ॥

1.186.02a ā no viśva āskrā gamantu devā mitro aryamā varuṇaḥ sajoṣāḥ |
1.186.02c bhuvan yathā no viśve vṛdhāsaḥ karan suṣāhā vithuraṁ na śavaḥ ||

1.186.03a प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।

1.186.03c असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥

1.186.03a preṣṭhaṁ vo atithiṁ gṛṇīṣe 'gniṁ śastibhis turvaṇiḥ sajoṣāḥ |
1.186.03c asad yathā no varuṇaḥ sukīrtir iṣaś ca parṣad arigūrtaḥ sūriḥ ||

1.186.04a उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।

1.186.04c समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥

1.186.04a upa va eṣe namasā jigīṣoṣāsānaktā sudugheva dhenuḥ |
1.186.04c samāne ahan vimimāno arkaṁ viṣurūpe payasi sasminn ūdhan ||

1.186.05a उत नोऽहिर्बुध्न्यो३ मयस्कः शिशुं न पिप्युषीव वेति सिन्धुः ।

1.186.05c येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥

1.186.05a uta no 'hir budhnyo3 mayas kaḥ śiśuṁ na pipyuṣīva veti sindhuḥ |
1.186.05c yena napātam apāṁ junāma manojuvo vṛṣaṇo yaṁ vahanti ||

1.186.06a उत न ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।

1.186.06c आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥

1.186.06a uta na īṁ tvaṣṭā gantv acchā smat sūribhir abhipitve sajoṣāḥ |
1.186.06c ā vṛtrahendraś carṣaṇiprās tuviṣṭamo narāṁ na iha gamyāḥ ||

1.186.07a उत न ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।

1.186.07c तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥

1.186.07a uta na īm matayo 'śvayogāḥ śiśuṁ na gāvas taruṇaṁ rihanti |
1.186.07c tam īṁ giro janayo na patnīḥ surabhiṣṭamaṁ narāṁ nasanta ||

1.186.08a उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।

1.186.08c पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥

1.186.08a uta na īm maruto vṛddhasenāḥ smad rodasī samanasaḥ sadantu |
1.186.08c pṛṣadaśvāso 'vanayo na rathā riśādaso mitrayujo na devāḥ ||

1.186.09a प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।

1.186.09c अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥

1.186.09a pra nu yad eṣām mahinā cikitre pra yuñjate prayujas te suvṛkti |
1.186.09c adha yad eṣāṁ sudine na śarur viśvam eriṇam pruṣāyanta senāḥ ||

1.186.10a प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।

1.186.10c अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥

1.186.10a pro aśvināv avase kṛṇudhvam pra pūṣaṇaṁ svatavaso hi santi |
1.186.10c adveṣo viṣṇur vāta ṛbhukṣā acchā sumnāya vavṛtīya devān ||

1.186.11a इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।

1.186.11c नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥

1.186.11a iyaṁ sā vo asme dīdhitir yajatrā apiprāṇī ca sadanī ca bhūyāḥ |
1.186.11c ni yā deveṣu yatate vasūyur vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.187.01a पितुं नु स्तोषं महो धर्माणं तविषीम् ।

1.187.01c यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥

1.187.01a pituṁ nu stoṣam maho dharmāṇaṁ taviṣīm |
1.187.01c yasya trito vy ojasā vṛtraṁ viparvam ardayat ||

1.187.02a स्वादो पितो मधो पितो वयं त्वा ववृमहे ।

1.187.02c अस्माकमविता भव ॥

1.187.02a svādo pito madho pito vayaṁ tvā vavṛmahe |
1.187.02c asmākam avitā bhava ||

1.187.03a उप नः पितवा चर शिवः शिवाभिरूतिभिः ।

1.187.03c मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ॥

1.187.03a upa naḥ pitav ā cara śivaḥ śivābhir ūtibhiḥ |
1.187.03c mayobhur adviṣeṇyaḥ sakhā suśevo advayāḥ ||

1.187.04a तव त्ये पितो रसा रजांस्यनु विष्ठिताः ।

1.187.04c दिवि वाता इव श्रिताः ॥

1.187.04a tava tye pito rasā rajāṁsy anu viṣṭhitāḥ |
1.187.04c divi vātā iva śritāḥ ||

1.187.05a तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो ।

1.187.05c प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥

1.187.05a tava tye pito dadatas tava svādiṣṭha te pito |
1.187.05c pra svādmāno rasānāṁ tuvigrīvā iverate ||

1.187.06a त्वे पितो महानां देवानां मनो हितम् ।

1.187.06c अकारि चारु केतुना तवाहिमवसावधीत् ॥

1.187.06a tve pito mahānāṁ devānām mano hitam |
1.187.06c akāri cāru ketunā tavāhim avasāvadhīt ||

1.187.07a यददो पितो अजगन्विवस्व पर्वतानाम् ।

1.187.07c अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥

1.187.07a yad ado pito ajagan vivasva parvatānām |
1.187.07c atrā cin no madho pito 'ram bhakṣāya gamyāḥ ||

1.187.08a यदपामोषधीनां परिंशमारिशामहे ।

1.187.08c वातापे पीव इद्भव ॥

1.187.08a yad apām oṣadhīnām pariṁśam āriśāmahe |
1.187.08c vātāpe pīva id bhava ||

1.187.09a यत्ते सोम गवाशिरो यवाशिरो भजामहे ।

1.187.09c वातापे पीव इद्भव ॥

1.187.09a yat te soma gavāśiro yavāśiro bhajāmahe |
1.187.09c vātāpe pīva id bhava ||

1.187.10a करम्भ ओषधे भव पीवो वृक्क उदारथिः ।

1.187.10c वातापे पीव इद्भव ॥

1.187.10a karambha oṣadhe bhava pīvo vṛkka udārathiḥ |
1.187.10c vātāpe pīva id bhava ||

1.187.11a तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।

1.187.11c देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥

1.187.11a taṁ tvā vayam pito vacobhir gāvo na havyā suṣūdima |
1.187.11c devebhyas tvā sadhamādam asmabhyaṁ tvā sadhamādam ||

1.188.01a समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ।

1.188.01c दूतो हव्या कविर्वह ॥

1.188.01a samiddho adya rājasi devo devaiḥ sahasrajit |
1.188.01c dūto havyā kavir vaha ||

1.188.02a तनूनपादृतं यते मध्वा यज्ञः समज्यते ।

1.188.02c दधत्सहस्रिणीरिषः ॥

1.188.02a tanūnapād ṛtaṁ yate madhvā yajñaḥ sam ajyate |
1.188.02c dadhat sahasriṇīr iṣaḥ ||

1.188.03a आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।

1.188.03c अग्ने सहस्रसा असि ॥

1.188.03a ājuhvāno na īḍyo devām̐ ā vakṣi yajñiyān |
1.188.03c agne sahasrasā asi ||

1.188.04a प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् ।

1.188.04c यत्रादित्या विराजथ ॥

1.188.04a prācīnam barhir ojasā sahasravīram astṛṇan |
1.188.04c yatrādityā virājatha ||

1.188.05a विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः ।

1.188.05c दुरो घृतान्यक्षरन् ॥

1.188.05a virāṭ samrāḍ vibhvīḥ prabhvīr bahvīś ca bhūyasīś ca yāḥ |
1.188.05c duro ghṛtāny akṣaran ||

1.188.06a सुरुक्मे हि सुपेशसाधि श्रिया विराजतः ।

1.188.06c उषासावेह सीदताम् ॥

1.188.06a surukme hi supeśasādhi śriyā virājataḥ |
1.188.06c uṣāsāv eha sīdatām ||

1.188.07a प्रथमा हि सुवाचसा होतारा दैव्या कवी ।

1.188.07c यज्ञं नो यक्षतामिमम् ॥

1.188.07a prathamā hi suvācasā hotārā daivyā kavī |
1.188.07c yajñaṁ no yakṣatām imam ||

1.188.08a भारतीळे सरस्वति या वः सर्वा उपब्रुवे ।

1.188.08c ता नश्चोदयत श्रिये ॥

1.188.08a bhāratīḻe sarasvati yā vaḥ sarvā upabruve |
1.188.08c tā naś codayata śriye ||

1.188.09a त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्समानजे ।

1.188.09c तेषां न स्फातिमा यज ॥

1.188.09a tvaṣṭā rūpāṇi hi prabhuḥ paśūn viśvān samānaje |
1.188.09c teṣāṁ na sphātim ā yaja ||

1.188.10a उप त्मन्या वनस्पते पाथो देवेभ्यः सृज ।

1.188.10c अग्निर्हव्यानि सिष्वदत् ॥

1.188.10a upa tmanyā vanaspate pātho devebhyaḥ sṛja |
1.188.10c agnir havyāni siṣvadat ||

1.188.11a पुरोगा अग्निर्देवानां गायत्रेण समज्यते ।

1.188.11c स्वाहाकृतीषु रोचते ॥

1.188.11a purogā agnir devānāṁ gāyatreṇa sam ajyate |
1.188.11c svāhākṛtīṣu rocate ||

1.189.01a अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।

1.189.01c युयोध्य१स्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

1.189.01a agne naya supathā rāye asmān viśvāni deva vayunāni vidvān |
1.189.01c yuyodhy a1smaj juhurāṇam eno bhūyiṣṭhāṁ te namauktiṁ vidhema ||

1.189.02a अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा ।

1.189.02c पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥

1.189.02a agne tvam pārayā navyo asmān svastibhir ati durgāṇi viśvā |
1.189.02c pūś ca pṛthvī bahulā na urvī bhavā tokāya tanayāya śaṁ yoḥ ||

1.189.03a अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।

1.189.03c पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥

1.189.03a agne tvam asmad yuyodhy amīvā anagnitrā abhy amanta kṛṣṭīḥ |
1.189.03c punar asmabhyaṁ suvitāya deva kṣāṁ viśvebhir amṛtebhir yajatra ||

1.189.04a पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।

1.189.04c मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥

1.189.04a pāhi no agne pāyubhir ajasrair uta priye sadana ā śuśukvān |
1.189.04c mā te bhayaṁ jaritāraṁ yaviṣṭha nūnaṁ vidan māparaṁ sahasvaḥ ||

1.189.05a मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।

1.189.05c मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥

1.189.05a mā no agne 'va sṛjo aghāyāviṣyave ripave ducchunāyai |
1.189.05c mā datvate daśate mādate no mā rīṣate sahasāvan parā dāḥ ||

1.189.06a वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथम् ।

1.189.06c विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥

1.189.06a vi gha tvāvām̐ ṛtajāta yaṁsad gṛṇāno agne tanve3 varūtham |
1.189.06c viśvād ririkṣor uta vā ninitsor abhihrutām asi hi deva viṣpaṭ ||

1.189.07a त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।

1.189.07c अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥

1.189.07a tvaṁ tām̐ agna ubhayān vi vidvān veṣi prapitve manuṣo yajatra |
1.189.07c abhipitve manave śāsyo bhūr marmṛjenya uśigbhir nākraḥ ||

1.189.08a अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।

1.189.08c वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥

1.189.08a avocāma nivacanāny asmin mānasya sūnuḥ sahasāne agnau |
1.189.08c vayaṁ sahasram ṛṣibhiḥ sanema vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.190.01a अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।

1.190.01c गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥

1.190.01a anarvāṇaṁ vṛṣabham mandrajihvam bṛhaspatiṁ vardhayā navyam arkaiḥ |
1.190.01c gāthānyaḥ suruco yasya devā āśṛṇvanti navamānasya martāḥ ||

1.190.02a तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।

1.190.02c बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥

1.190.02a tam ṛtviyā upa vācaḥ sacante sargo na yo devayatām asarji |
1.190.02c bṛhaspatiḥ sa hy añjo varāṁsi vibhvābhavat sam ṛte mātariśvā ||

1.190.03a उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।

1.190.03c अस्य क्रत्वाहन्यो३ यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥

1.190.03a upastutiṁ namasa udyatiṁ ca ślokaṁ yaṁsat saviteva pra bāhū |
1.190.03c asya kratvāhanyo3 yo asti mṛgo na bhīmo arakṣasas tuviṣmān ||

1.190.04a अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः ।

1.190.04c मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥

1.190.04a asya śloko divīyate pṛthivyām atyo na yaṁsad yakṣabhṛd vicetāḥ |
1.190.04c mṛgāṇāṁ na hetayo yanti cemā bṛhaspater ahimāyāṁ̐ abhi dyūn ||

1.190.05a ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।

1.190.05c न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥

1.190.05a ye tvā devosrikam manyamānāḥ pāpā bhadram upajīvanti pajrāḥ |
1.190.05c na dūḍhye3 anu dadāsi vāmam bṛhaspate cayasa it piyārum ||

1.190.06a सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।

1.190.06c अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥

1.190.06a supraituḥ sūyavaso na panthā durniyantuḥ pariprīto na mitraḥ |
1.190.06c anarvāṇo abhi ye cakṣate no 'pīvṛtā aporṇuvanto asthuḥ ||

1.190.07a सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।

1.190.07c स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥

1.190.07a saṁ yaṁ stubho 'vanayo na yanti samudraṁ na sravato rodhacakrāḥ |
1.190.07c sa vidvāṁ̐ ubhayaṁ caṣṭe antar bṛhaspatis tara āpaś ca gṛdhraḥ ||

1.190.08a एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः ।

1.190.08c स न स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥

1.190.08a evā mahas tuvijātas tuviṣmān bṛhaspatir vṛṣabho dhāyi devaḥ |
1.190.08c sa na stuto vīravad dhātu gomad vidyāmeṣaṁ vṛjanaṁ jīradānum ||

1.191.01a कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः ।

1.191.01c द्वाविति प्लुषी इति न्य१दृष्टा अलिप्सत ॥

1.191.01a kaṅkato na kaṅkato 'tho satīnakaṅkataḥ |
1.191.01c dvāv iti pluṣī iti ny a1dṛṣṭā alipsata ||

1.191.02a अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।

1.191.02c अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥

1.191.02a adṛṣṭān hanty āyaty atho hanti parāyatī |
1.191.02c atho avaghnatī hanty atho pinaṣṭi piṁṣatī ||

1.191.03a शरासः कुशरासो दर्भासः सैर्या उत ।

1.191.03c मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥

1.191.03a śarāsaḥ kuśarāso darbhāsaḥ sairyā uta |
1.191.03c mauñjā adṛṣṭā vairiṇāḥ sarve sākaṁ ny alipsata ||

1.191.04a नि गावो गोष्ठे असदन्नि मृगासो अविक्षत ।

1.191.04c नि केतवो जनानां न्य१दृष्टा अलिप्सत ॥

1.191.04a ni gāvo goṣṭhe asadan ni mṛgāso avikṣata |
1.191.04c ni ketavo janānāṁ ny a1dṛṣṭā alipsata ||

1.191.05a एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।

1.191.05c अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥

1.191.05a eta u tye praty adṛśran pradoṣaṁ taskarā iva |
1.191.05c adṛṣṭā viśvadṛṣṭāḥ pratibuddhā abhūtana ||

1.191.06a द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।

1.191.06c अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥

1.191.06a dyaur vaḥ pitā pṛthivī mātā somo bhrātāditiḥ svasā |
1.191.06c adṛṣṭā viśvadṛṣṭās tiṣṭhatelayatā su kam ||

1.191.07a ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।

1.191.07c अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥

1.191.07a ye aṁsyā ye aṅgyāḥ sūcīkā ye prakaṅkatāḥ |
1.191.07c adṛṣṭāḥ kiṁ caneha vaḥ sarve sākaṁ ni jasyata ||

1.191.08a उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।

1.191.08c अदृष्टान्सर्वाञ्जम्भयन्सर्वाश्च यातुधान्यः ॥

1.191.08a ut purastāt sūrya eti viśvadṛṣṭo adṛṣṭahā |
1.191.08c adṛṣṭān sarvāñ jambhayan sarvāś ca yātudhānyaḥ ||

1.191.09a उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।

1.191.09c आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥

1.191.09a ud apaptad asau sūryaḥ puru viśvāni jūrvan |
1.191.09c ādityaḥ parvatebhyo viśvadṛṣṭo adṛṣṭahā ||

1.191.10a सूर्ये विषमा सजामि दृतिं सुरावतो गृहे ।

1.191.10c सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥

1.191.10a sūrye viṣam ā sajāmi dṛtiṁ surāvato gṛhe |
1.191.10c so cin nu na marāti no vayam marāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā
cakāra ||

1.191.11a इयत्तिका शकुन्तिका सका जघास ते विषम् ।

1.191.11c सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥

1.191.11a iyattikā śakuntikā sakā jaghāsa te viṣam |
1.191.11c so cin nu na marāti no vayam marāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā

cakāra ||

1.191.12a त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् ।

1.191.12c ताश्चिन्नु न मरन्ति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥

1.191.12a triḥ sapta viṣpuliṅgakā viṣasya puṣyam akṣan |
1.191.12c tāś cin nu na maranti no vayam marāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā cakāra ||

1.191.13a नवानां नवतीनां विषस्य रोपुषीणाम् ।

1.191.13c सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥

1.191.13a navānāṁ navatīnāṁ viṣasya ropuṣīṇām |
1.191.13c sarvāsām agrabhaṁ nāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā cakāra ||

1.191.14a त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः ।

1.191.14c तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥

1.191.14a triḥ sapta mayūryaḥ sapta svasāro agruvaḥ |
1.191.14c tās te viṣaṁ vi jabhrira udakaṁ kumbhinīr iva ||

1.191.15a इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना ।

1.191.15c ततो विषं प्र वावृते पराचीरनु संवतः ॥

1.191.15a iyattakaḥ kuṣumbhakas takam bhinadmy aśmanā |
1.191.15c tato viṣam pra vāvṛte parācīr anu saṁvataḥ ||

1.191.16a कुषुम्भकस्तदब्रवीद्गिरेः प्रवर्तमानकः ।

1.191.16c वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥

1.191.16a kuṣumbhakas tad abravīd gireḥ pravartamānakaḥ |
1.191.16c vṛścikasyārasaṁ viṣam arasaṁ vṛścika te viṣam ||

Notes by Detlef Eichler (detlefeichler(at)gmx.net):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This combined version of Rigveda is from two ITRANS files which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The used fonts are Ancient Sanskrit 99 and URW Palladio IT. In the the word hiraṇyapraügam̐ (1.035.05a) the font Times New Roman is used for the character ü to show Hiatus between a and u. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 26 March 2009